
बृहत्-कर्मकाण्डसमुच्चय



खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

बृहत्
कर्मकाण्डसमुच्चयः

वेदसंहिताचतुष्टयब्राह्मणसूत्रस्मृतिपुराणागमान्यतमप्रा-
चीनग्रन्थविवेचितपूर्वप्रतीकः पंडितदिवाकरशर्म्म-
मैठाणीचतुर्वेदिसंगृहीतः

सोऽयं

स्वस्ति श्री १०८ श्रीमन्महाराजाधिराजसर्वविजयिनां (के, सी,
यस, आई.) पदालंकृतानां बदरीशदेशभूपतीनां कीर्त्तिशाह-
देवानां सेवायां समर्पितः

खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

संस्करण : मई २०१८, संवत् २०७५

मूल्य : १६० रुपये मात्र

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

भूमिका।

भवतु मनितमेतद्यदस्मिन् विष्टपे स्वभावतो मनुष्यमात्रस्य चेतसि दुःखनिवृत्तिपूर्वकसुखोपलब्ध्याकांक्षा तिष्ठति, परञ्च सा महर्षिरचितपरमपुनीतसिद्धान्तावगतिगम्या। यतः "पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः। न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः॥" वयं सुखिनः स्यामेति सर्वे कामयन्ते परञ्च तत्साधकभूतानि कर्म्माणि सर्वे दैवोपेक्षन्ते। तत्सत्कर्म्मदर्शनेच्छया स्वयं परमात्मा वेदरूपेणाविर्भूय ब्राह्मणद्वारा कर्म्माणि प्रकटितवान्। या० व० "एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता। वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश" स च परमात्मा वेदः कर्म्मकाण्डोपासनाकाण्डज्ञानकाण्डभेदात् त्रिविधः। तत्रापि पूर्वाचार्य्यैः प्रथमं कर्मकाण्डस्यैव गणना विहिता। दृष्टान्तोप्यत्र यथैकं शुष्कं काष्ठं कारुयन्त्रकर्म्मद्वारा संस्कृतं बहुमूल्यं जायते तद्वदेव कर्म्मकाण्डद्वारा संस्कृतशरीरः काण्डद्वयाधिकारी सम्पद्यते यथा "यः क्षत्रदेहं परितंक्य टंकैः स गाधिपुत्रो गृहमभ्युपैति" इत्यादि। ब्र० सू० "शास्त्रयोनित्वात्" क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्। संस्कारपरामर्शात्तदभावाभिलापाच्च। याज्ञवल्क्यः "मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्। ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥ निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित्॥" मानवे- "राजा राजसूयेन स्वाराज्यकामो ज्योतिष्टोमेन यजेत॥" ई० उ०- "कुर्व्वन्नेवेह कर्म्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे॥ यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति। यदेव विद्यया करोति श्रद्धोपनिषदा तदेव वीर्य्यवत्तरं भवति"। छां० उ० "आचार्यकुलाद्वेदमधीत्य यथाभिधानं गुरोःकर्म्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः" बृ० दा० "जनकोहं वैदेहो बहुदक्षिणेन यज्ञेनेजे॥" छां० उ०- "यक्ष्माणोऽहं वै भगवन्तोऽहमस्मि"। य० वे० "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" उल्लिखितकर्म्मकाण्डकर्त्तव्यताकसप्रमाणश्रुतिस्मृतिनियमानुसारेण कर्म्मकाण्डमावश्यकीयं बुद्ध्वा प्रयासोन्वकारि॥ प्रसिद्धमेव कर्म्मकाण्डसमुच्चयाभिधसंस्कारविधिमरी-

चिमाली वाजसनेयमाध्यन्दिनादिद्विजातिकमलगणप्रमादेमादेमना व्यतिभाते तत्प्रव्यक्तमेवास चात्रानेहोविनिमयविषयवैक्लव्येन पूर्णतावच्छिन्नसार्थषडङ्गावच्छेदकवेदाध्ययनप्रथागभस्तिह्रासेन विशेषतया वृंदारकभारत्यनभिज्ञलेखस्वर्भानुसाध्वसत्रस्तामलप्रत्यंचकलानिधिकलाबृंहणसुधाभिषेकाविद्यावारिधीनामवहेलनया च वर्णच्युतिकादाम्बिनीपरिच्छिन्न इव लक्ष्यते । प्रायो वैदिकविधिगीर्वाणस्वरालिनीमुकुलितलपनारविन्दावनिमरुद्भिः स्वेच्छाशैवालिनीभङ्गरिङ्गितज्ञातिभिश्चालिततत्तालाङ्करूपपारम्पर्य्यलेखक्रमगतानुगतिकप्रातिप्रत्यन्तरगतेषु तालाङ्केष्वपि कतिशो हरितालद्युतिभाञ्जि चावलोक्यन्ते। दिष्टान्तरे कतिपयैः पौरोहित्यपरैः शाखान्तरमनुसंस्कारकरणदोषास्मरणमालभ्यापरशाखयिपुस्तकेषु पाठवैशिष्ट्यमालोक्य तत्रत्यमन्वाहरणेन पुस्तकानि विस्तृतिं प्रापितानि।एवं ज्ञातसाङ्कर्य्यदोषो मत्पिता तत्सर्वप्रतीकसम्पन्नताविर्भावसाधनार्थं पूर्वत एवास्माकीनेयं कुलविद्येति मह्यं समादिदेश। मयाप्यनन्यलब्धपितृसाहाय्येनैव तदनुज्ञां शिरसाधाय स्वपूर्वजकराञ्चितवेदसंहिताचतुष्टयब्राह्मणसर्वस्वपारस्कारादिगृह्यसूत्रस्मृतिपुराणागमकर्म्मकांडादिपुस्तकानि यथामति समालोक्य पितारि जीवत्येवासौ पूर्णप्रतीकितामनायि,येन स्वधर्म्मरक्षा लोकोपकृतिश्च भवेत् । सम्प्रति तृतीयावृत्तौ यत्रकुत्राचिद्भूयो न्यूनाधिक्यकरणं केनचिद्वैत्वन्तरेणावश्यकीयं वृत्तम् ।किन्तु न तत्रावश्याकीयविनियुक्तिध्यानमंत्रह्रासो दर्शितः। यत्रकुत्राप्यत्र प्रमादो भवेत्साद्भिः सानुकम्पं क्षन्तव्यश्च्युतिरपि विलोकनीया ॥

भवदीयो ग्रंथसंग्रहकर्ता—

दिवाकरशर्म्मा मैठाणी चतुर्वेदी,

श्रीनगर गढवाल निवासी.

ग्रन्थसंग्रहकर्तृवंशवर्णनम् ।

वन्दे तं सच्चिदानन्दमवाङ्मनसगोचरम् ।
व्याप्तं यत्सत्तया चित्र विश्वमेतच्चराचरम् ॥

सम्प्राप्तो बदरीशदर्शनमनाः श्रीवीरभूमिच्छका-
ताग्रामादिह रूपचन्द्र इति योऽनूचान आदौ गढे ।
श्रीमत्कश्यपसंज्ञकर्षिकुलजो जात्याद्यगौडः सरो-
लामैठाण्युपजातिमाप गढदेशेऽभ्यर्प्पितां श्रोत्रियः ॥
तद्वंशे प्रथितोऽभवद्दिनमणिः प्राज्ञाग्रणीर्वेदविद्
येनालम्भि निजैककर्म्ममतिविद्याभिस्तथा चार्य्यता ।
तस्मात्सूर्य्यमणिः श्रुतिस्मृतिपुरावृत्तातिगूढार्थवि-
ज्जातः श्रीनगरान्तिके सुवसथे मैठाणसंज्ञे सुधीः ॥
तदात्मजः पित्र्यगुणैरनूनो बभूव नारायणदत्तशर्म्मा ।
रहस्यवित्त्रय्युपलब्धकर्म्मकाण्डस्य दक्षः सुतरां स्वकृत्ये ॥
सूनुस्तस्य दिवाकरो निजकुलीनां कर्म्मकाण्डाभिधां
विद्यां प्राप्य निजे गृहे पितृपदाच्छास्त्राण्यथाधीत्य यः ।
प्राप्तः प्राज्ञपदं च साम्प्रतमिह श्रीटीहरीपत्तने
सोऽहं श्रीबदरीशमूर्त्तिनृपतेर्विद्यालयेऽध्यापकः ॥
मतप्रभेदं पुरुकर्म्मकांडग्रन्थेष्विदानीं प्रविचार्य्य दृष्ट्वा ।
श्रुतिस्मृतिब्राह्मणसंहितामन्त्रसूत्रकल्पादिकपुस्तकानि ॥
पितुः समक्षं विधुबाणनन्दभूमिर्मितेऽब्देपरिपूर्णरूपम् ।
तस्यानुमत्यासमनायिकर्म्मकाण्डस्य तालांकमदो मयापि ॥

संशोधकस्याप्यविचारणत्वा-
द्वितीयसंस्कारविधिर्व्यधायि ।
निजाल्पमत्यैव दिवाकरेण
च्युतिं क्षमन्तां सुधियां पुरोगाः ॥

॥ प्रशंसापत्रद्वयम् ॥

दिवाकरेण विदुषा कर्म्मकाण्डसमुच्चयः ।
यथाशास्त्रं संगृहीतो भूयाद्धर्म्मविदां मुदे ॥
पण्डितो ज्वालाप्रसादमिश्रो विद्यावारिधिर्मुरा-
दाबादपत्तनस्थः २४।४।१९०२

अयं कर्मकाण्डसमुच्चयनामा ग्रन्थो विद्वद्वरदिवाकरशर्म्मविरचितो मया टिहरीनगरसमीपस्थमुरलीधराश्रमे वसता समवलोकितः, तत्र कर्म्मेतिकर्त्तव्यतायाः स्पष्टतरतामवलोक्य प्रसन्नतरचेतसा परमेश्वरः प्रार्थ्यते "एतद्ग्रन्थानुसारेण सर्वे माध्यन्दिनीयाः कर्म्मजातेः सौकर्य्यं प्राप्य ग्रन्थकारं चिरायुष्ट्वाद्याशिषो योजयन्तु" इति शम् ।

लवपुरीयविश्वविद्यालयसंस्कृतप्रधानाध्यापक-
महामहोपाध्यायशिवदत्तशर्म्मा १९-८-१९०८।

साधारणसामग्रीविवरणम् ।

पञ्चाङ्गपूजनसा०

पिठाई
हलदी
नाले
टूललाल
टूलपीली
पंचरत्न
हिरण्य
सप्तमृत्तिका
सर्वौषधी
जव
साटी
तिल
घी
सुपारी २७
श्रीफल २
अष्टांग दशांग धूप
बत्ती
कपूर
नैवेद्य
पंचमेवा
पंचमिठाई
पंचामृत
मधुपर्क
अष्टांगार्घ्य
घंटा
धुपाना
आरती
आचमन
गिलास
गंगाजल
गोमय
फूल
दूर्वा
उद्वर्त्तन
यज्ञोपवीत
आमान्न ४
अक्षत
चौकी
अर्घा
तिपाई
फल
आसन
सरसोंके बीज
आम्रके पत्ते
पीपलके पत्ते
पंचपल्लव

पंचगव्यसा०

गोमूत्र
गोमय
दही
दूध
घी
कुश
जल
सुवर्ण
ताम्रपात्र

जातकर्मसा०

कलश ५
कांसीकी कटोरी
घी
शहद
जाल
तंडुलतुष
सरसों

षष्ठीकी सा०

८ बटकमाला
दीपक ८
कौडी ४०
हिरण्य
छाग
वस्त्र
चावल
सौभाग्यद्रव्य

नामकर्मसा०

अष्टसुगंध
पंचगव्य
शंख
पीपलका पत्ता
सोनेकी कलम
आमान्न १
प्रणीता
प्रोक्षणी
स्रुवा

निष्क्रमणसा०

ताम्रपात्र
अष्टगंध
कपूर

ग्रहदानसा०

घी सुवर्ण
दही चावल
गुड़ मसूर
मूंग कांसी
चणा हलदी
चावल चांदी
तिल लोहा
उडद लोहा
निमक गेहूँ
तिल सुवर्ण

अन्नप्राशनसा०

कलजेंटमांस
षड्रसभोजन
सफेद वस्त्र १ हाथ
पुस्तक
कलम
दावात
मोहर
सुवर्ण
सुवर्णशलाका
यज्ञपात्र
वस्त्र
भूषण

कर्णवेधसा०

सोनेके सूत
चांदीके सूत

चावल
मिठाई
फल

जन्मोत्सवसा० ।

रक्षासूत्र
गुड
दूध
तिल उद्वर्तन
नवीन वस्त्र

अक्षरारंभ व विद्यारंभकी सा०

सुवर्णशलाका
सुवर्णप्रतिमा
बालाशकील
पट्टी
पुस्तक

स्तंभपूजनसा०

चंदोया
कलश १६
दीवे १६
तेल
माषबलि
दही
चावल
उडद आमके पत्ते
पपिलके पत्ते
सुपारी ३२
श्रीफल १
बत्ती तेलकी ६०
बत्ती घीकी ६०
नैवेद्य ५ प्रकारका
वेदीकी पगडी
मंडपकी पगडी
दरवाजे ४ बड़े
केलेके सफलस्तं१६
देवदारुकेस्तंभ १६
स्थूणा०
पँथेकी डाल १६
पंचरत्न
सप्तमृत्तिका
हिरण्य
जवकी पुडकी १६
साटीकी पुडकी१६
ध्वजा १० प्रकारकी

सर्वतोभद्रकीसा.

सोनेकी प्रतिमा १
चांदीकी प्रतिमा८३
सुपारी ८५
श्रीफल २
कलशा तांबेका १
चंदोया १
रकाबी तांबेकी १
यज्ञोपवीत १
चन्दन
अष्टगंध
कपूर
रंग ९ प्रकारके
दोरा ९सूतका१६हाथ

ग्रहयागकी सा.

स्थण्डिल
सुवर्णप्रतिमा २
रजतप्रतिमा २५
चंदोया
सुपारी ३०
दही
उडद
चावल
श्रीफल १
दीवा १
कलशा १
वस्त्र ९ रंगके
रक्त
श्वेत
रक्त
पीत
हरित
श्वेत
कृष्ण
नील
धूम्र
नैवेद्य ९ प्रकार

अग्निस्थापनकी सा०

कुंड या वेदी
दीवा १
कलशा १
श्रीफल २
इन्धन
जव
घी
चावल
तिल
मेवा आमान्न १
जवपुटक १
धान्यपुटक १
यज्ञपात्र ४
समिधा १० प्रकार
आंक
ढाक
सज्जी
(पीपलपिलखा)
उमरा
शमी
दूर्वा
कुश
कांस्यस्थाली
घी होमके
दरियाई
नाला
पिष्ट
चरु
बिल्वफल

वास्तुकी सा०

लोहेकी कील ४
खैरके शंकु ४
स्तंभ ४
चंदोया
वेदी
वेदीका कपडा ९
कलश १
सुवर्णशलाका १

सुवर्णप्रतिमा १
वस्त्र ९
भूषण
छागबलि
बलिसामग्री
सुपारी ९९
बेलके दाने
बिल्वपत्र
घी
उड़द
दही
चावल
बत्तीघीकी १००
रंग कईप्रकारके
मच्छी
कछुवाका चर्म
मेषजिह्वा
दीवा १
जव पुडकी
धान्य पुडकी १
ताम्रकलश १
जव
तिल
सुवर्ण
ताम्र
सुवर्णनाग
मत्स्याकार पैसा
पंचरत्न
सर्वौषधी
हिरण्य
अष्टसुगंध

केशाविवासनसा.

कांस्यस्थाली
नवनीत
दही
दूध
रक्तवृषभगोमय
सफेदकपडा २ हाथ
तांबेके वेंडका उस्तरा५
पोटली ५
सरसों
जव
सुपारी
तिल
सुवर्ण
शल्लकीकंटक ३
कुश ७
नाला
दरियाई पीली
मयूरपिच्छ

चूडाकर्मसा०

आमान्न १
यज्ञपात्र ३
आचार्य १
नापित
वेदी
उष्णजल
शीतलजल
पूजनसामग्री
चावलथालीपर
मिठाई

उपनयनसा०

चन्दन
पुष्पमाला
फूल
कौपीन ३
झोली १ श्रीफल २
सुपारी १३
यज्ञोपवीत ३
मुंजकटिसूत्र १
कृष्णमृगचर्म
भूर्जपत्र
ढाकका दंड३॥हाथ
कलश ८
चावल
ग्रहदान ९
आमान्न
दही
तिल
दूर्वा
ढाककी समिधा
घी
यज्ञपात्र
वेदी
वरणद्रव्य

वेदारम्भसा०

वेदी
समिधा
घी
यज्ञपाठ
वेदपुस्तक
वरणद्रव्य

समावर्तनसा०

कलश ८
सुपारी ९
वेदी
गंगाजल
तिल
दही
उमराका दतून १
समिधा
आमान्न १
घी
उद्वर्त्तन
उष्णजल
दर्पण
कज्जल
चन्दन
छत्री
खडाऊँ २
बांसकी लठी १
वस्त्र
भूषण
पीढा
कौपीन
यज्ञोपवीत
उस्तरा

वाग्दानसा०।

श्रीफल
यज्ञोपवीत
तिल
दही
सुवर्ण

पंचामृत
सौभाग्यद्रव्य
कंठसूत्र
भषण
वस्त्र
सुवर्णप्रतिमा
दीवा
पूजासामग्री
कलश १

धूल्यर्घसा० ।

खडाऊँ २
पीढा
पलंग
वर्त्तन
वस्त्र
भूषण
उष्णजल
शीतलजल
गंध
अक्षत
पुष्प
दूर्षा
विष्टर २
तिल
सुवर्ण
शंख
अष्टांगार्घ
मधुपर्क
बेरके पत्ते
तुलसीपत्र
जव
दही
चावल
सरसों
दूध
कांसीकि कटोरी २
वरणद्रव्य

विवाहसा०

छोलिका ७
जव
अक्षत सरसों
चावल
आमान्न १
कुश
तुलसीपत्र
फल
तिल शंख
सुवण
फल
श्रीफल
अन्तरपट
खील
दही
चावल
उडद
बत्ती घीकी २०
नाले
कटुतैल
दर्पण
चूडी ४
कंघी
डब्बी
वेंदी
कज्जल
मेहँदी
सुमङ्गली
मालीमुकुट
सुहागपुडा
सिंदूर
मिठाई
घी
यज्ञपात्र ४
ग्रहदान
कांस्यस्थाली
पीढा
वेदी
सुपारी १२
सुगन्धद्रव्य
कंकण
सेहरा
मावड
सूप
चटाई
अञ्चलवस्त्र

चतुर्थीसा० ।

युगकीलक
गरम पानी
हलकी मिट्टी
उगाल
वेदी
केलेके पेड ४
देवारकी शाखा ४
दूर्वा
फूल
कलश ४
दीवा ४
जवकी पुडकी ५
साटीकी पुडकी ५
आमान्न १
यज्ञपात्र ३
घी
कसार
नैवेद्य
सुपारी ६
वेदीका कपडा।
काँसीकी थाली ।

गोदानसा० ।

प्रवालपुच्छ
काँसीकी थाली
तामेकी पीठ
सोनाके सींग २
चांदीके खर ४
कपडा
नैवेद्य
धूपवत्ती
तिल
थाली
लोटा
दूर्वा
घंटी
तुलसीदल
जव

अक्षत	तिल	अन्न	आमके पत्ते
चन्दन	घी	लोहा	पीपलके पत्ते
वटसा० ।	आमान्न १	पंचरत्न	फूल
खैरके खम्भ २	यज्ञपात्र ३	अष्टधातु	दूर्वा
कपडे २	ग्रहद्रव्य	सप्तधान्य	पीठा
सूतडोरे ४हाथ ३ ॥	वेदी	वत्ती वीकी २०	पिठाई
सोने चांदी	कांसीकी थाली	तिल	हलदी
तांबे के सूत ३	श्रीफल १	उडद	खज्ञ
चौकी	सुपारी १२	चावल	नाले
रस्से	गोमय	दही	
जव	टूल १ गज	माषबलि	



विषयानुक्रमः ।

इति कर्मकाण्डसमुच्चयविषयानुक्रमणिका ।

॥ श्रीः ॥

अथ कर्म्मकाण्डसमुच्चयः प्रारभ्यते ।

श्रीगणेशाय नमः ॥ स्नात्वा नित्यकर्म्म कृत्वा नवमहतं वासः परिधाय सामग्रीं सम्पाद्य सपत्नीकः शुद्धासने प्राङ्मुखः समुपविश्य पूर्वमुखं तैलदीपं संस्थाप्य स्थिरचेताः ॐविष्णुर्विष्णुर्हरिर्हरिः, त्रिराचम्य वामहस्तस्थं जलं दक्षिणहस्तेन ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरे शुचिः ॥ अभिमन्त्र्य ॐ पुण्डरीकाक्षः पुनातु तज्जलं दक्षिणहस्तेन स्वशिरसि समुत्क्षिप्य गौरसर्षपाक्षतान् दक्षिणहस्तेन ॐ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥ चतसृषु दिक्षु क्षिप्त्वा हिरण्यवर्णेति मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो देवताऽऽसनोपवेशनार्थं पृथ्वीपूजने विनियोगः॥ ॐहिरण्यवर्णा सुभगा हिरण्यकशिपुर्महीं। तस्या हिरण्यं दापये सत्या अकरं नमः । अक्षतान् क्षिप्त्वा पृथ्वि इहागच्छेति पाद्यादीनि पूजोपचारवस्तूनि समर्पयामि पृथिव्यै नमः सम्पूज्य भूमौ दक्षिणहस्तमुत्तानं निवेश्य । पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥त्वं च धारय मां भद्रे पवित्रं कुरु चासनम् । सम्प्रार्थ्य पाद्यादीन् समर्पयामि । सर्ववाद्यमयीघण्टायै नमः ॥ गन्धर्वदेवाय धूपपात्राय नमः। वह्निदेवाय दीपपात्राय नमः।सम्पूज्य ॐ आगमार्थं हि देवानां निर्गमार्थं तु रक्षसाम् ॥ सर्वभूतहितार्थाय घण्टानादं करोम्यहमिति घण्टां वादयित्वा वामपार्श्वे कुशेषु धूपदीपपात्रे दक्षिणपार्श्वे स्थापयेत् । पूर्वदिङ्मुखं

दीपमाधारे संस्थाप्य पाद्यादीन्समर्पयामि । दीपनाथभैरवाय नमः सम्पूज्य । ॐ करकलितकपालः कुण्डली दण्डपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती। क्रतुसमयसपर्य्यो विघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥ सम्प्रार्थ्य ब्राह्मणद्वारा भाले तिलकं कारयित्वा भूमौ त्रिकोणषट्कोणवृत्तचतुरस्रं कुङ्कुमादिभिर्विलिख्य तदुपरि त्रिपादिकां तदुपरि ताम्रमयार्घपात्रं च संस्थाप्य तत्र जलं स्थापयेत्। ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्म्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्येन देवेश तीर्थं देहि दिवाकर॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आयान्तु मम रक्षार्थं दुरितक्षयकारणात्॥ ततोऽक्षतान्क्षिपेत् । दश कलात्मने धर्म्मप्रदवह्निमण्डलाय नमः । द्वादशकलात्मने अर्थप्रदसूर्य्यमण्डलाय नमः । षोडशकलात्मने कामप्रदचन्द्रमण्डलाय नमः । सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः । ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेभवत्सरित् ॥ ॐभूर्भुवः स्वः गंगादिसप्तसरित इहागच्छतेह तिष्ठतेह सुप्रतिष्ठिता वरदा भवत ॥ पाद्यादीन्समर्प्पयामि। ताम्रमयार्घपात्रस्थगंगादिसप्तसरिद्भ्यो नमः । सम्पूज्य । ॐ एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकरेति तदर्घोदकेन सूर्यं त्रिरर्घयित्वाऽवशिष्टजलेन सामग्रीं च सिक्त्वा प्राणायामं कुर्य्यात् ॥

शान्तिपाठः ।

ॐआनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः । देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥ देवानां भद्रा सुमतिर्ऋजूयतां देवाना ँ रातिरभिनो

निवर्त्तताम्।देवाना॑ᳫ सख्यमुपसेदिमावयं देवा नऽआयुः प्रतिरन्तु जीवसे॥ २ ॥ तान्पूर्वयानि विदामहे वयं भगं मित्रमदितिं दक्षमस्रिधम्। अर्य्यमणं वरुण॑ᳫ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३॥ तन्नो वातो मयोभुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥४॥ तमीशानञ्जगतस्तस्थुषस्पतिं धियं जिन्वमवसेहूमहे वयम्। पूषा नो यथावेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ५ ॥ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसागमन्निह॥ ७ ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा॑ᳫ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्तिदेवा यत्रानश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १०॥ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये। वागोजः सहौजो मयि प्राणापानौ ॥ ११ ॥ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वा तितृणम् ॥ बृहस्पतिर्मे तद्दधातु शन्नो भवतु भुवनस्य यस्पतिः॥१२॥ कयानश्चित्रऽआभुव दूती सदा वृधः सखा। कया शचिष्ठया वृता ॥ १३ ॥ कस्त्वा सत्योमदानाम्म॑ᳫहिष्ठोमत्सदन्धसः। दृढाचिदारुजेवसु ॥१४॥ अभीषुणः सखीनामविता जरितॄणाम्।शतं भवा स्यूतिभिः॥ १५॥ कयात्वन्नऽऊत्याभिप्रमन्दसे वृषन्। कयास्तोतृभ्यऽआभर ॥ १६॥

इन्द्रो विश्वस्य राजति। शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे ॥ १७ ॥ शन्नो मित्रश्शंवरुणः शन्नो भवत्वर्यमा। शन्नऽइन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः ॥ १८ ॥ शन्नो वातः पवता ँ शन्नस्तपतु सूर्यः। शन्नः कनिक्रदद्देवः पर्जन्योऽअभिवर्षतु ॥ १९ ॥ अहानिशं भवन्तु नः शँ रात्रीः प्रतिधीयताम्। शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रा वरुणा रातहव्या ॥ २० ॥ शन्नऽइन्द्रा पूषणा वाजसातौ समिन्द्रासौ मासुविताय शंय्योः ॥२१॥ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः ॥ २२ ॥ स्योना पृथिविनो भवान्नृक्षरानिवेशनी। यच्छान्नः शर्म्म स प्रथाः ॥ २३ ॥ द्यौःशांतिरन्तरिक्ष ँ शांतिः पृथिवी शांतिरपिः शांतिरोषधयः शांतिः। वनस्पतयश्शान्तिर्विश्वेदेवाःशान्तिर्ब्रह्म शांतिः सर्व ँशांतिः शांतिरेव शांतिः सामा शांतिरेधि ॥ २४ ॥ विश्वानि देवसवितर्दुरितानि परासुव॥यद्भद्रं तन्नऽआसुव॥२५॥शांतिः ३॥ दूर्वाक्षतपुष्पहस्तःॐसुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।लम्बोदरश्च विकटोविघ्ननाशोगणाधिपः।धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्याये सर्वविघ्नोपशान्तये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ स्मृते सकलकल्याणभाजनं यत्र जायते। पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ सर्वेष्वारम्भकार्य्येषु यस्त्रिभुवनेश्वराः।

देवा दिशंतु नः सिद्धिं ब्रह्मविष्णुमहेश्वराः ॥ सर्वदा सर्वकार्य्येषु नास्ति तेषाममंगलम्। येषां हृदिस्थो भगवान्मंगलायतनं हरिः॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं योगबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥ इति सम्प्रार्थ्य दूर्वाक्षतपुष्पाणि काष्ठपीठस्थगोमयनिर्मितगणपतिसमीपे संस्थाप्य तिलकुशजलानि दक्षिणहस्ते निधाय श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्याद्य ब्रह्मणो द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्य्यावर्त्तान्तरभूमौ हिमवत्पर्वतैकदेशे केदारखण्डान्तर्गतसुमेरुदक्षिणपार्श्वेऽलकनन्दासरिद्वामकूले शुद्धश्रीक्षेत्रे स्वगृहे षष्टिसंवत्सराणां मध्येऽमुकसँव्वत्सरेऽमुकायनेऽमुकर्त्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकवासरे रात्रौ वाऽमुकराशिस्थिते सूर्य्ये चन्द्रे भौमे बुधे बृहस्पतौ शुक्रे शनौ राहौ केतावेवंगुणविशिष्टे मुहूर्तेऽमुकगोत्रोऽमुकराशिः परिग्रहपुत्रादिपरिवारयुतोऽमुकशर्मा वर्मा गुप्तो दासो वाऽहं मम करिष्यमाणामुकक्कर्म्मणि पूर्वाङ्गतया पञ्चाङ्गसंज्ञकगणपतिपुण्याहवाचननीराजनपूर्वाङ्गवरुणमातृकाऽच्युतात्मकवसुधारार्चनकर्माणि करिष्ये । उत्तराङ्गतया सूर्य्यादिग्रहार्चनञ्च करिष्ये इति सङ्कल्पजलं गणपतिसमीपे क्षिप्त्वा रक्ताक्षतैः, हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज । सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितः पितः ॥ नागास्य नागहार त्वं गणराज चतुर्भुज।भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः । इहागत्य गृहाण त्वं पूजाकर्तुश्च रक्ष मे ॥ आवाह्यैवं गणेशं तं पूजाद्रव्यैः प्रपूजयेत्॥ॐ

एतन्तेदेवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवासऽइह मादयन्तामों प्रतिष्ठेति प्रतिष्ठाप्य। गणानान्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गणपतिर्देवता गणपत्यावाहने विनियोगः ॥ ॐगणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसोमम। आहमजानि गर्भधमात्वमजासि गर्भधम्॥ ॐभूर्भुवः स्वः गणपत इहागच्छेहतिष्ठेह सुप्रतिष्ठितो वरदो भवेत्यावाह्य,आसनम् सुमुखाय नमस्तुभ्यं गणाधिपतये नमः। गृहाणासनमीश त्वं विघ्नपुञ्जं निवारय॥ पाद्यम्। उमापुत्राय देवाय सिद्धवन्द्याय ते नमः। पाद्यं गृहाण देवेश विघ्नराज नमोऽस्तु ते ॥ अर्घ्यम्। एकदन्त महाकाय नागयज्ञोपवीतक। गणाधिदेव देवेश गृहाणार्घ्यं नमोऽस्तुते॥ पञ्चामृतम् । पयोदधिघृतक्षौद्रशर्कराभिश्च यत्कृतम् । पञ्चामृतं गृहाणेदं स्नानार्थं विघ्नभञ्जन ॥ स्नानीयजलम् । स्वर्धुनीनर्मदाचन्द्रभागासङ्गमजैर्जलैः । स्नापितोऽसि मया देव विघ्नसंघं निवारय ॥ उपवीतम् । सूर्यकोटिसमाभास नागयज्ञोपवीतक । सुवर्णसूत्रे रचितमुपवीतं गृहाण मे ॥ वस्त्रयुग्मम् । रक्ताम्बरधराधीश पाशाङ्कुशधरेश्वर। वस्त्रयुग्मं मया दत्तं गृहाण परमेश्वर ॥ आचमनीयम्। सुगन्धमिश्रं तीर्थादिपूतं पानीयमुत्तमम्। आचमार्थं गृहाण त्वं विघ्नराज वरप्रद ॥ गन्धम्। ईशपुत्र नमस्तुभ्यं नमो मूषकवाहन । गन्धं गृहाण देवेश सर्वसौख्यं विवर्धय ॥ अक्षतान् । रक्तचन्दनसम्मिश्रैरक्षतैर्धौतयामि भोः । सर्वभूतहितार्थाय विघ्नराज जगद्गुरो॥पुष्पाणि । पाटलामल्लिकादूर्वाशतपत्राणि विघ्नहृत्। पुष्पाणि गृह्ण देवेश विबुधप्रिय सर्वतः ॥ धूपम् । लम्बोदर विशालाक्ष धूम्रकेतो गजानन। धूपं गृहाण देवेश विघ्नपुञ्जं निवा

रय ॥ दीपम् । भालचन्द्र नमस्तुभ्यं विघ्नहन्मोदकप्रिय । घृताक्तवर्तिसंयुक्तं दत्तं पश्य सुरेश्वर ॥ नैवेद्यम् । रुद्रप्रिय दयालो त्वं रसैः षड्भिः समन्वितम् । नैवेद्यं मोदकापूपं गृह्ण भक्त्या मयार्प्पितम् ॥ जलम् । लम्बोदर महाकाय गौरीसुत षडानन । करानन-विशुद्ध्यर्थं जलं गृह्ण नमोऽस्तु ते ॥ उपायनम् । हिरण्यं रजतं ताम्रं यत्किञ्चिदुपकल्पितम् । उपायनं गृहाणेदं सिद्धिबुद्धीश ते नमः ॥ नारिकेलाद्यन्यतमफलोपेतसर्घपात्रंवामहस्तेनिधाय तदुपर्य्युत्तानं दक्षिणहस्तं कृत्वा । रक्ष रक्ष गणाध्यक्ष त्र्यक्ष त्रैलोक्यरक्षक । भक्तानामभयं कृत्वा त्राता भव भवार्णवात् ॥ द्वैमातुर कृपा-सिन्धो षाण्मातुराग्रज प्रभो । वरद त्वं वरं देहि वाञ्छितं वाञ्छि-तार्थद । अनेन फलदानेन फलदोऽस्तु सदा मम ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ इति फलं गणपतये निवेद्यार्घजलेन तं स्नापयित्वा प्रार्थयेत् । विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय । नागाननाय निगमाध्वरभूषिताय गौरीसुताय गण-नाथ नमो नमस्ते ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय । विद्याधराय विकटाय च वामनाय भक्त-प्रसन्नवरदाय नमो नमस्ते ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः । नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ शिवरूपस्वरूपाय नमस्ते ब्रह्मचारिणे । भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तिप्रदेति सुखदेति फलप्र-देति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ अविघ्नं कुरु मे देव सर्वकार्य्येषु सर्वदा ॥ वरुणपूजनम् । भूमिं स्पृष्ट्वा ॐ महीद्यौः पृथिवी च नऽइमं यज्ञं मिमिक्षताम् । पिपृतां नो भरी-

मभि:॥ यवान् क्षिप्त्वा। ॐ ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तꣳ राजन् पारयामसि ॥ कलशं संस्थाप्य ॐ आजिघ्र कलशं मह्या त्वाविशन्त्विन्दवः। पुनरूर्ज्जा निवर्त्त-स्वसानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः॥ जलं पूरयेत्। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतस-दनमासीद ॥ गन्धम्। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषि-णीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ सर्वौषधीः कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचन्दनम् ॥ वचाचम्पकमुस्ताश्च सर्वौषध्य इमाः स्मृताः॥ ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा। मनैनुबभ्रूणामहꣳ शतं धामानि सप्त च ॥ सप्तमृत्तिकाः। गोग-जाश्वह्रदरथैलेशवल्मीकसम्भवाः। प्रक्षिपेन्मृत्तिकाः सप्त वरुण-स्यान्तरे बुधः ॥ ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी। यच्छानः शर्मस प्रथाः ॥ दूर्वाः। ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ पञ्चपल्ल-वान्। अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधसम्भवान्। कलशस्यान्तरे पञ्च स्थापयेत्पल्लवान्बुधः ॥ ॐ अश्वत्थेवो निषदनं पर्णे वो वसति-ष्कृता। गोभाजऽइत्किलासथयत्सनवथ पूरुषम् ॥ पूगफलम्। ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः। बृहस्पतिप्र-सूतास्तानो मुञ्चन्त्वꣳहसः॥ पञ्चरत्नानि। कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्। एतानि पञ्चरत्नानि कलशस्यान्तरे क्षिपेत् ॥ ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥ हिरण्यम्। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ वस्त्रम्। ॐ युवासुवासाः परिवीत आगात्सउ श्रेयान्भ

वति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ धान्यपात्रम् । ॐधान्यमसि धिनुहि देवाः प्राणायत्वो- दानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषेधान्देवो वः सवि- ता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि॥नारिकेलफलम् ।ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या- वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणा मुम्मइषाण सर्वलोकम्म इषाण ॥ तत्त्वायामीति शुनःशेप ऋषि- स्त्रिष्टुप्छन्दो वरुणो देवता वरुणावाहने विनियोगः । ध्यानम् । वरुणः पाशभृत्सौम्यः प्रतीच्यां मकराश्रयः । पाशहस्तात्मको देवो जलराश्यधिपो महान्॥ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्त- दाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहबोध्युरुश॑ समान आयुः प्रमोषीः ।एतन्तेति प्रतिष्ठाप्य ॐभूर्भुवः स्वः भो वरुणेहागच्छेति आसनम् । पुष्पासनं महादिव्यं सर्वरंगविरं- जितम् । जलाधिप गृहाण त्वं सर्वसौख्यविवर्धन ॥ पाद्यम् । गंगादितीर्थसम्भूतं सुतप्तं जलमुत्तमम् । पाद्यं गृहाण वरुण मार्गश्र- महरं मुदा ॥ अर्घ्यम् । सुतीर्थजजलं शुद्धं गन्धाक्षतसमन्वितम् । अर्घपात्रस्थितं गृह्ण जलेश्वर नमोऽस्तु ते ॥पञ्चामृतम्।पयोदधिघृ- तक्षौद्रशर्करासम्भवं परम्। पञ्चामृतं गृहाण त्वं वरुण स्नानहेतवे ॥ स्नानीयजलम् । गंगाकलिन्दजाकृष्णासरयूवाग्भवं जलम्।नाना- सुगन्धसम्मिश्रं स्नानार्थं गृह्ण वारिप ॥ उपवीतम् । कार्पासतन्तु- सुप्रोतं वेदमन्त्राभिमन्त्रितम् । उपवीतं गृहाण त्वं जलाधिप नमो- ऽस्तु ते॥ वस्त्रयुग्मम् । ऊर्णाकार्पाससन्तानैर्निर्मितं वस्त्रयुग्मकम् । गृहाण सुमुखो भूत्वा जलाधिप नमोऽस्तु ते ॥ आचमनीयम् । नानातीर्थाहृतं वारि ताम्रपात्रस्थमुत्तमम् । आचमार्थं गृहाण त्वं वरुणापांपते मुदा॥गन्धम् ।श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुम-

नोहरम् । विलेपनं सुरश्रेष्ठ गृहाणेश्वर वारिप॥अक्षतान्।शुद्धमुक्ता फलाभैस्तैरक्षतैःशशिसन्निभैः।द्योतयामि जलेश त्वां सर्वसम्पत्करो भव ॥ पुष्पाणि ।मालतीमल्लिकादीनि पुष्पाणि ऋतुजानि मे। समर्प्पितानि वरुण गृहाण परया मुदा॥धूपम् ।चन्दनागरुचन्द्रैश्च संयुतं गुग्गुलान्वितम् । वह्निदीप्तं घृतालीढं धूपं गृह्ण जलेश मे ॥ दीपम्।साज्यसद्वर्तिकायुक्तं वह्निना योजितं मया।दीपं गृहाण देवेश जलाधिप नमोऽस्तु ते॥नैवेद्यम्। शर्कराघृतसम्मिश्रं गोधूमं स्वादु सत्कृतम् । नैवेद्यं गृह्ण देवेश सदा सौख्यविवर्धन ॥ जलम् । सुशीतलं जलं शुद्धं करपादास्यशोधनम् । गृहाण परया प्रीत्या तृप्तिदं जलनायक॥उपायनम् । हैमराजतताम्राद्यन्यतमं यन्मयाहृतम्।उपायनं जलेश त्वं गृहाण मम सिद्धये॥ वरुणे गंगाद्यावाहनं कार्य्यम् ।सर्वे समुद्रास्सरितस्तीर्थानि जलदा नदाः।आयान्तु मम कार्य्यस्य दुरितक्षयकारकाः ॥ कलशाभिमन्त्रणं दक्षिणहस्तेन । कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले ब्रह्मा तथा मध्ये मातृकाणां तु यो गणः। कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा॥ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।अङ्गैश्च सहिताःसर्वे कलशन्तु समाश्रिताः॥ वरुणप्रार्थनां साक्षतपुष्पहस्तः कुर्य्यात्। देवदानवसंवादे मथ्यमाने महोदधौ।उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्।त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ पुण्याहवाचनम् । पाद्यादीन्समर्पयामि । वासोंऽगुलीयासनेभ्यो नमः । संपूज्य पाद्येन त्रीन् ब्राह्मणान् पूजयेत् ।

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्र-नाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ॐ आपद्घ-नध्वान्तसहस्रभानवस्समीहितार्थार्प्पणकामधेनवः । अपारसंसार-समुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥ गन्धेन ॐअꣳशुना ते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ।अक्षतैः ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मइषाण सर्वलोकम्म इषाण ॥ प्रार्थना ।भूसुरा यज्ञपुरुषा ब्रह्मणोत्पादिताः पुरा । युष्माभिर्मत्कृता पूजा गृह्यतां वो नमोनमः । अद्येत्यादि अमुकोऽहं ममास्मिन्कर्मणि पूर्वाङ्गतया पुण्याहवाचनकर्म कर्तुमे-भिर्वांसोङ्कुलीयासनैबृहस्पत्य ग्निवनस्पतिदैवतैरमुकगोत्रानमुकश-र्मणो ब्राह्मणान् युष्मान् वृणे । स्वस्तीति प्रतिवचनम् । सोङ्कारं ब्राह्मणस्यैव निरोङ्कारं तु भूभुजः।उपांशु वैश्यस्य तथा स्वस्ति शूद्र-स्य वाचनम् ॥ अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना वरुणं ब्राह्मणद्वारा तत्र धारयित्वा भूमावेव वा पुण्याहं वाचयेत् ।ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु । शिवा आपः सन्तु । सौमनस्यमस्तु।अक्षतं चारिष्टं चास्तु । गन्धाः पान्तु सौमंगल्यं चास्तु । पुष्पाणि पान्तु सौश्रियमस्तु। अक्षताः पान्तु बहुदेय च नोऽस्तु। शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो बहुपुत्रं चायुष्यं चास्तु ।यं कृत्वा सर्ववेदयज्ञक्रियारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाथ-र्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। वाच्यताम । ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितं

यदायुः।देवानां भद्रा सुमतिर्ऋजूयतां देवानारातिरभिनोनिवर्त्तताम्।
देवानासख्यमुपसेदिमावयं देवा नआयुःप्रतिरन्तुजीवसे।दीर्घायुस्त
ओषधेखनितायस्मै च त्वा खनाम्यहम्।अथोत्वंदीर्घायुर्भूत्वा सद-
वल्शाविरोहतात् न च तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः
प्रथमज ꣳ ह्येतत यो बिभर्ति दाक्षायणहिरण्य ꣳ स देवेषु कृणुते
दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः। द्रविणोदा द्रविणसस्तुर-
स्य द्रविणोदाः स नरस्य प्रयंसत् । द्रविणोदा वीरवती मिषन्नो
द्रविणोदारा स ते दीर्घमायुः ।नवोनवो भवतु जायमानोह्नांकेतु-
रुषसामेत्यग्रम्। भागं देवेभ्यो विदधात्यायन्प्रचन्द्रमा स्तिरते दीर्घ-
मायुः। उच्चा दिविदक्षिणावन्तो अस्थुर्य्ये अश्वदाः सहते सूर्य्येण।
हिरण्यदा अमृतत्वं भजन्ते वासोदाःसोमःप्रतिरन्त आयुः।व्रतजप-
यमनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां
मनः समाधीयताम्। समाहितमनसः स्मः। प्रसीदन्तु भवन्तः।
प्रसन्नाः स्मः। शान्तिरस्तु। पुष्टिरस्तु। तुष्टिरस्तु। वृद्धिरस्तु।
ऋद्धिरस्तु। अविघ्नमस्तु। आरोग्यमस्तु। शिवमस्तु।शिवं कर्मा-
स्तु। कर्म्मसमृद्धिरस्तु। वेदसमृद्धिरस्तु। शास्त्रसमृद्धिरस्तु। पुत्रपौ-
त्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसंपदस्तु। ततो बहिरक्ष-
तान् क्षिपेत्। अरिष्टनिरसनमस्तु। यत्पापं रोगं शोकमकल्याणं
तद्दूरे प्रतिहतमस्तु। ततः पुनमर्जानम्। यच्छ्रेयस्तदस्तु।
उत्तरे कर्मण्यविघ्नमस्तु। उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरोत्तराः
क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्। तिथिकरणमुहूर्त्तनक्षत्र-
ग्रहलग्नसम्पदस्तु। तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीय-
न्ताम्।तिथिकरणे समुहूर्त्ते सनक्षत्रे सग्रहे सलग्ने सदैवते प्रीयेताम्।
दुर्गापाञ्चाल्यौ प्रीयेताम्। अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्।
इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्। वसिष्ठपुरोगा ऋषिगणाः प्रीय-

न्ताम् । माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ब्रह्म-पुरोगाः सर्वे वेदाः प्रीयन्ताम् । आदित्यपुरोगाः सर्वे ग्रहाः प्रीय-न्ताम् । ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । श्रीसरस्वत्यौ प्रीयेताम् । श्रद्धामेधे प्रीयेताम् । भगवती कात्यायनी प्रीयताम् । भगवती माहेश्वरी प्रीयताम् । भगवती ऋद्धिकरी प्रीयताम् । भगवती वृद्धिकरी प्रीय-ताम् । भगवती तुष्टिकरी प्रीयताम् । भगवती पुष्टिकरी प्रीयताम् । भगवन्तौ विघ्ननायकेश्वरौ प्रीयेताम् । सर्वाः कुलदेवताः प्रीयन्ताम् । सर्वा ग्रामदेवताः प्रीयन्ताम् । सर्वा इष्टदेवताः प्रीयन्ताम् । पुनर क्षतान् बहिः क्षिपेत् । हताश्च ब्रह्मद्विषो हताश्च परिपन्थिनः । हताश्च विघ्नकर्तारः । शत्रवः पराभवं यान्तु । शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्त्वीतयः । पुनर्मार्जनम् । शुभानि वर्द्धन्ताम् । शिवा आपः सन्तु । शिवा ऋतवः सन्तु । शिवा अग्नयः सन्तु । शिवा वनस्पतयः सन्तु । शिवा ओषधयः सन्तु । अहोरात्रे शिवे स्याताम् । निकामे निकामे नः पर्जन्यो अभिवर्षतु । फलवत्यो न ओषधयः पच्यन्ताम् । योगक्षेमो नः कल्पताम् । इति योगक्षेमौ वै तत्र कल्पेते यत्रैतेन यज्ञेन यजन्ते । क्लृप्तः प्रजानां योगक्षेमो भवति । शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदि-त्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् । भगवान्पर्जन्यः प्रीयताम् । भगवान्स्वामीमहासेनः प्रीयताम् । भगवान्नारायणः प्रीयताम् । पुण्यं पुण्याहं वाचयिष्ये । ब्राह्मणा ब्रूयुर्वाच्यताम् । ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणा मम गृहेऽस्मिन्कर्मणि पुण्याहं भवन्तो ब्रुवन्तु । ॐ पुण्याहम् ३ । पुनन्तु मां देवजनाः पुनन्तुः मनसा धियः पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम् ॥ पृथिव्यामुद्धृता

यान्तु यत्कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत्क-
ल्याणं ब्रुवन्तु नः । भो ब्राह्मणाः मम गृहेऽस्मिन्कर्मणि पुण्याहं
भवन्तोब्रुवन्तु । ॐकल्याणम् ३ । यथेमां वाचं कल्याणी
मावदानि जनेभ्य। ब्रह्मराजन्याभ्या ँ शूद्राय चार्य्याय च स्वाय
चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे
कामः समृद्ध्यतामुपमादो नमतु ॥ सागरस्य यथा ऋद्धिर्महाल-
क्ष्म्यादिभिः कृता । सम्पूर्णा सुप्रभावा च ताञ्च ऋद्धिं ब्रुवन्तु नः॥
भो ब्राह्मणा मम गृहेऽस्मिन्कर्मणि ऋद्धिं भवन्तो ब्रुवन्तु ।
ॐऋद्ध्यन्ताम् ३ । ॐसत्रस्य ऋद्धिरस्यगन्मज्योतिरमृता अभूम
दिवं पृथिव्या अध्यारुहामाविदाम देवान् स्वज्योतिः ॥ स्वस्ति-
र्यास्त्यविनाशाख्या पुण्यकल्याणवृद्धिदा । विनायकप्रिया
नित्यं ताञ्च स्वस्ति ब्रुवन्तु नः॥ भो ब्राह्मणा मम गृहेऽस्मिन्कर्मणि
स्वस्ति भवन्तो ब्रुवन्तु । ॐआयुष्मते स्वस्ति ३ । तत आम्रपल्ल-
वगृहीतेन भूमिस्थापितवरुणजलेन ब्राह्मणा यजमानमभिषिञ्चेयुः ।
ॐस्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाविश्ववेदाः । स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥पयः पृथिव्यां
पय औषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः
सन्तु मह्यम्॥विष्णोररराटमसि विष्णोः श्नप्त्रेस्थो विष्णोःस्यूरसि
विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा । अग्निर्देवता वातो
देवता सूर्य्योदेवता चन्द्रमा देवता वसवो देवता रुद्रा देवता
आदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो
देवता वरुणो देवता मूर्धासि राड्ध्रुवासि धरुणा धर्त्र्यसि धरणी
आयुषेत्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा द्यौः शान्तिरन्तरिक्ष-
ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः
शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं ँ शान्तिः शान्तिरेव

शान्तिः सामा शन्तिरेधि । विश्वानि देवसवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव । ततो वरुणं यथावत्स्थापयेत् । पाद्यादीनि समर्पयामि । सोपस्करणदक्षिणामान्नेभ्यो नमः पूर्वार्चितब्राह्मणेभ्यो नमः । सम्पूज्य अमुकोऽहं ममास्मिन्कर्मणि कारितस्य ब्राह्मणद्वारा पुण्याहवाचनकर्म्मणः साङ्गत्वसिद्ध्यै तद्दक्षिणार्थमेतानि सोपस्करदक्षिणामान्नानि प्रजापतिदैवतानि पूर्वार्चितब्राह्मणेभ्यो विभज्य सम्प्रददे।नीराजनम्।दीपपात्रे कार्पासनिर्म्मितां घृताक्तां ज्वलन्तीं वर्त्तिकां संस्थाप्य तया यजमानं नीराजयेत्॥ॐअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा सूर्य्योज्योतिर्ज्योतिः सूर्य्यः स्वाहा अग्निर्वर्चोज्योतिर्वर्चः स्वाहा ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥ यजमानशिरसि तिलकम्॥ भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सुराः सर्वे सम्पदः सन्तु सुस्थिराः॥ आयुरारोग्यमैश्वर्य्यं यशस्तेजोज्ज्वला मतिः। ब्रह्मपुत्रभवं तेजस्तिलकेन कृतेन ते ॥ मन्त्रपाठः।ॐ अंहो मुच्चमाङ्गिरसं जयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्।प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संवादेष्वभयं नोऽस्तु । पुण्याहसम्पत्तिरस्तु। मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ अव्याधिना शरीरेण मनसा च निराधिना। पूरयन्नर्थिनामाशां त्वं जीव शरदां शतम् ॥ सपत्ना दुर्ग्रहाः पापा दुष्टसत्त्वाद्युपद्रवाः। तमालपत्रमालोक्य सदा सौम्या भवन्तु ते। पुरोहिताय दक्षिणां दद्यात् ॥

षोडशमातृकापूजनम् ।

पञ्चोर्ध्वाः पञ्च तिर्य्यञ्च इह समुदिता रेखिकास्तत्पदानि स्युः स्थित्यैषोडशान्तःशिवभवककुभो दक्षमार्गाच्चतस्रः।गौर्य्याद्यास्तत्र ब्राह्मेशदिशमनुसमारभ्य सावित्रिकाद्याः शेषाः सम्पूजयेद् द्वादश

हि निगममन्त्रैर्नैरुक्तं च कैश्चित् ॥ जलाक्षतपुष्पैः आयंगौरिति कद्रूर्ऋषिर्गायत्रीछन्दो, गौरी देवता, गौर्य्यावाहने विनियोगः। ध्यानम्। हिमाद्रितनया देवी खड्गदण्डवराभया। चतुर्भुजा सत्त्वमूर्त्तिर्गौरी त्रिदशवन्दिता ॥ऋक्।ॐ आयंगौः पृश्निरक्रमी-दसदन्मातरं पुरः।पितरं च प्रयन्त्स्वः॥ॐ भूर्भुवः स्वः गौरीहाग-च्छेति।हिरण्यरूपेति वरुणऋषिस्त्रिष्टुप्छन्दः पद्मा देवता पद्मावाहने विनियोगः। ध्यानम्। शुभ्रवस्त्रपरीधाना पद्मासनसमाश्रिता। वरदा मण्डिता पद्मा विष्णुवक्षःस्थलप्रिया॥ ऋक् ॐ हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदिथः सूर्य्यश्च। आरोहतं वरुण मित्र-गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि वरुणोऽसि॥ॐभूर्भुवस्वः पद्मे इहागच्छेति। कदाचन इति विवस्वानृषिस्त्रिष्टुप्छन्दः शची देवता शच्यावाहने विनियोगः। ध्यानम्। उत्पलाक्षी सुदर्शना मणिकुण्डलधारिणी। द्विभुजारुणनेत्रान्ता शची सौभाग्यमं-ण्डिता ॥ ऋक्। ॐकदाचनस्तरीरसि नेन्द्रसश्च सिदाशिषे। उपो-पेन्नु मघवन् भूय इन्नुते दानं देवस्य पचते आदित्येभ्य रुचा ॥ ॐ भूर्भुवः स्वः शचीहागच्छेति ॥ मेधामिति परमेष्ठी ऋषिस्त्रिष्टु-प्छन्दो मेधा देवता मेधावाहने विनियोगः। ध्यानम्। श्वेतपद्म-समासीना श्वेतवस्त्रसमावृता। वराभयाक्षमालापुस्तकहस्ता च मेधिका ॥ ऋक्। ॐमेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे ॥ ॐ भूर्भुवः स्वः मेधे इहागच्छेति ॥ तत्सवितुरिति विश्वामित्रऋषिर्गायत्रीछन्दःसावित्री देवता सावित्र्यावाहने विनियोगः। ध्यानम्। ॐकारबीजतत्त्वार्थो चन्द्रमौलिश्चिदाकृतिः। वरदाऽभयदा देवी सावित्रीसर्वमोहिनी ॥ ऋक्। ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि। धियो योनःप्रचो-दयात् ॥ ॐ भूर्भुवः स्वः सावित्रीहाच्छेति ॥ विज्ज्यमिति

प्रजापतिर्ऋषिरनुष्टुप्छन्दो विजया देवता विजयावाहने विनियोगः । ध्यानम् । चतुर्भुजा विशालाक्षी शक्तिदण्डवराभया । गीर्वाणवन्दिता देवी विजया विजयप्रदा ॥ ऋक् । ॐ विज्ज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ उत । अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ ॐ भूर्भुवः स्वः विजये इहागच्छेति ॥ यात इति परमेष्ठी ऋषिरनुष्टुप्छन्दो जया देवता जयावाहने विनियोगः । ध्यानम् । रक्ताम्बरा शूलखड्गधारिणी त्रिदशार्चिता । दैत्यप्रध्वंसनकरी जया सर्वाङ्गसुन्दरी ॥ ऋक् । ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशंताऽभि चाकशीहि ॥ ॐ भूर्भुवः स्वः जय इहागच्छेति ॥ देवानामिति प्रजापतिर्ऋषिरनुष्टुप्छन्दो देवसेना देवता देवसेनावाहने विनियोगः । ध्यानम् । शक्तिखड्गधनुर्बाणहस्ता श्वेताम्बरावृता । मयूरवाहना देवी देवसेना वरप्रदा ॥ ऋक् । ॐ देवानां भद्रा सुमतिर्ऋजूयतां देवाना ᳪ रातिरभिनो निवर्त्तताम् । देवाना ᳪ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ ॐ भूर्भुवः स्वः देवसेने इहागच्छेति ॥ उदीरतामिति शंखऋषिस्त्रिष्टुप्छन्दः स्वधा देवता स्वधावाहने विनियोगः । ध्यानम् । पाशमुद्गरविश्रान्तहस्ता श्वेताम्बरावृता । स्वधादेवी महाकाया पितृयज्ञप्रतिष्ठिता ॥ ऋक् । ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्तेनोवन्तु पितरो हवेषु ॥ ॐ भूर्भुवः स्वः स्वधे इहागच्छेति ॥ स्वाहेति विश्वामित्र ऋषिः शक्करी छंदः स्वाहा देवता स्वाहावाहने विनियोगः ॥ ध्यानम् । चतुर्हस्ता विशालाक्षी वराभयकरी शुभा । रक्ताम्बरधरादेवी स्वाहा यज्ञफलेश्वरी ॥ ऋक् । ॐ स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात्स्वाहा । द्यावापृथिवीभ्या ᳪ स्वाहा वातादारभेस्वाहा ॥ ॐभूर्भुवःस्वः

स्वाहे इहागच्छेति ॥ आप इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मातृका देवता मातृकावाहने विनियोगः । ध्यानम् । द्विभुजा श्वेतवसना वराभयकरी सदा । मातृकागणसंजुष्टा देवी सर्वार्थदायिनी ॥ ऋक् ॥ ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳहिरिप्रंप्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि । दीक्षातपसोस्तनूरसि तांत्वा शिवाꣳशग्मां परिदधे भद्रं वर्णपुष्पम्॥ ॐ भूर्भुवः स्वः मातृके इहागच्छेति॥भवतमिति गोतमऋषिःपंक्तिश्छन्दो लोकमातृका देवता लोकमातृकावाहनेविनियोगः।ध्यानम्। वराभयत्रिशूलासिधारिणी लोकधारिणी । श्वेताम्बरधरा दिव्या शिवदा लोकमातृका ॥ ऋक् ।ॐ भवतं नः समनसौ सचेतसा वरेपसौ ।मायज्ञꣳहिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्यनः ॥ ॐ भूर्भुवः स्वः लोकमातृके इहागच्छेति॥यत्प्रज्ञानमिति याज्ञवल्क्य ऋषिस्त्रिष्टुप्छन्दो धृतिर्देवता धृत्यावाहने विनियोगः। ध्यानम् । टंकशूला विरूपाक्षी स्थूलग्रीवा महोदरी । धृतिर्महाकालशक्तिः सर्वलक्षणसंयुता ॥ ऋक् । ॐ यत्प्रज्ञानमुतचेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥ ॐ भूर्भुवः स्वः धृते इहागच्छेति ॥ आर्द्रामिति कर्दम ऋषिस्त्रिष्टुप्छन्दः पुष्टिर्देवता पुष्ट्यावाहने विनियोगः । ध्यानम् । चतुर्भुजा विशालाक्षी धनुर्बाणवराभया। रक्ताम्बरा सौम्यतनुः पुष्टिलोकपवन्दिता ॥ ऋक् । ॐ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्य्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥ॐ भूर्भुवः स्वः पुष्टे इहागच्छेति॥बृहस्पत इति अप्रतिरथ ऋषिस्त्रिष्टुप्छन्दस्तुष्टिर्देवता तुष्ट्यावाहने विनियोगः । ध्यानम् । द्विभुजा नीलवसना मयूरवरवाहना । दण्डखड्गा दीर्घनेत्रा तुष्टिर्देवहितंकरी ॥ ऋक् ।ॐ बृहस्पते परिदीया रथेन

रक्षोहामित्राँ२॥ अपबाधमानः।प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्नस्मा-
कमेध्यविता रथानाम् ॥ ॐ भूर्भुवः स्वः तुष्टे इहागच्छेति ॥
अम्बे इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः कुलदेवता देवता कुलदेव-
तावाहने विनियोगः । ध्यानम् । चतुर्भुजा शंखचक्रकृपाणत्रिशि-
खावहा । कालाभ्रसन्निभा देवी वरदा कुलदेवता ॥ ऋक् ।
ॐ अम्बे अम्बिके अम्बालिके न मानयति कश्चन । ससस्त्यश्वकः
सुभद्रिकां काम्पीलवासिनीम् ॥ ॐ भूर्भुवः स्वः कुलदेवते इहाग-
च्छेति ॥ यद्वा । गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातृका लोकमातृका ॥ धृतिः पुष्टिस्तथा
तुष्टिरात्मनः कुलदेवता । पूजनीया वेदमन्त्रैरथवा नाममन्त्रकैः ॥
आसनम् । सौवर्णं मणिभिर्दिव्यैः खचितं शुद्धमासनम् । गृह्णीत
मातृका यूयं स्थित्यर्थं परया मुदा ॥ पाद्यम् । गंगादितीर्थजं
वारि निर्म्मलं तत्तमुत्तमम् । गृह्णीत पाद्यं कृपया यूयं षोडश
मातृकाः ॥ अर्घ्यम् । नानातीर्थाहृतं वारि ताम्रपात्रस्थमुत्तमम् ।
अर्घ्यं गृह्णीत परया मुदा षोडशमातृकाः॥ पञ्चामृतम् । दधिदुग्ध-
सिताक्षौद्रघृतजं परमं शुचि । गृह्णीत मातृकाः प्रीत्या पञ्चामृत-
मिदं परम् ॥ स्नानीयम् । गङ्गाकलिन्दजाकृष्णाकावेरीवाग्जमु-
त्तमम् । जलं स्नानीयकं प्रीत्या यूयं गृह्णीत मातृकाः ॥ वस्त्रयु-
ग्मम् । वस्त्रयुग्मं समानीतमूर्णाकौशेयतन्तुजम् । सुवर्णसूत्रग्रथितं
यूयं गृह्णीत मातृकाः ॥ भूषणानि । नासिकेयांगदादीनि भूषणानि
च यानि वा । सौभाग्यवस्तुयुक्तानि यूयं गृह्णीत मातृकाः ॥
आचमनीयम् । गंगादितीर्थजं शुद्धं दिव्यपात्रस्थितं जलम् ॥
आचमार्थं मयानीतं यूयं गृह्णीत मातृकाः ॥ गन्धम् । मलयाचल-
सम्भूतं कस्तूरीशशिमिश्रितम् । गृह्णीत चन्दनं दिव्यं यूयं
षोडश मातृकाः ॥ अक्षतान् । शुद्धमुक्ताफलाभैस्तैरक्षतैः

शशिसन्निभैः। द्योतयामि सदा भक्त्या प्रीयन्तां मम मातृकाः॥ पुष्पाणि। जातीचम्पकमाल्यादिपुष्पाणि ऋतुजानि च। मयानीतानि सुमुदा यूयं गृह्णीत मातृकाः॥ धूपम्। लाक्षासुग्गुलुमासीभिर्निर्मितं धूपमुत्तमम्। आज्याक्तमग्निसन्दीप्तं यूयं जिघ्रत मातृकाः॥ दीपम्। साज्यसद्वर्तिकायुक्तं वह्निना योजितं मया॥ दीपं गृह्णीत सततं यूयं षोडश मातृकाः॥ नैवेद्यम्। सशर्करं घृताभ्यक्तं परमान्नं मयाहृतम्। यूयं गृह्णीत नैवेद्यं मातृका भक्तवत्सलाः॥ जलम्। साधारणजलं हस्तमुखपादादिशुद्धिदम्। गृह्णीत मातृका यूयं मया भक्त्या समाहृतम्। उपायनम्। हिरण्यरौप्यताम्राद्यन्यतमं यन्मयाहृतम्। गृह्णीतोपायनं प्रीत्या यूयं षोडशमातृकाः॥ प्रार्थना। गौर्य्याद्या मातृका यूयं भक्तियुक्तार्चनान्मयि। सुप्रसन्ना सदा भूत्वा मम शांतिं प्रयच्छत॥ वसुधारापूजनम्॥ पूर्वोक्तरक्तमाद्भित्तावाज्यधारा निपातयेत्। वसूनष्टौ नाममन्त्रैः सोंकारैस्तासु पूजयेत्॥ ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु। वसोः पवित्रेण शतधारेण सुप्वाः कामधुक्षः॥ इति धाराः कृत्वा तत्र दधि निक्षिप्य रक्तसूत्रं च परिधाप्य ॐ ध्रुवाय नमः। ॐ धराय नमः। ॐ सोमाय नमः। ॐ आपाय नमः। ॐ अनिलाय नमः। ॐ अनलाय नमः। ॐप्रत्यूषाय नमः। ॐप्रभासाय नमः। इत्यक्षतान् क्षिप्त्वा ॐ भूर्भुवः स्वः ध्रुवाद्यष्टवसव इहागच्छतेति पाद्यादीनि समर्पयामि। ध्रुवाद्यष्टवसुभ्यो नमः। सम्पूज्य प्रार्थयेत्। ॐदिव्यवस्त्रा दिव्यदेहा दिव्यमालाविभूषिताः। वसवोऽष्टौ महाभागा वरदाः सन्तु मे सदा॥

नान्दीश्राद्धम्।

ॐ विष्णुर्विष्णुर्हरिर्हरिः २ आचम्य वामहस्तस्थं जलं दक्षिणहस्तेनालोडयेत्। ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।

यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ततः ॐ पुण्डरीकाक्षः पुनात्विति तज्जलं स्वशिरसि समुत्क्षिपेत् ॥ अञ्जलिं बद्ध्वा त्रिः पठेत् । ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥ विश्वान्देवान्यवैः पितॄन्कुशस्थाने तु दूर्वया । यजेन्मङ्गलकृत्येषु द्राक्षार्द्रक्यामलैस्तथा ॥ वदेत्स्वाहां नमःस्थाने तथा वृद्धिं स्वधास्थले । ब्राह्मणद्वयभोज्यार्हमन्नमन्तेऽर्पयेन्मुदा ॥ब्रह्मपत्रेषु प्राङ्मुखानृजून् द्वादश दूर्वाङ्कुरान् पातयित्वा दूर्वायवजलान्यादाय अद्य मात्रादित्रयश्राद्धसम्बन्धिनो नान्दीमुखाः सत्यवसुसंज्ञका विश्वदेवा इदं वः पाद्यं स्वाहा ॥ अद्य पित्रादित्रयश्राद्धसम्बन्धिनो नान्दीमुखाः सत्यवसुसंज्ञका विश्वेदेवा इदं वः पाद्यं स्वाहा॥ अद्य सपत्नीकमातामहादित्रयश्राद्धसम्बन्धिनो नान्दीमुखाःसत्यवसुसंज्ञका विश्वेदेवा इदं वः पाद्यं स्वाहा ॥ उपकरणं गन्धाद्यपि ॥ दूर्वातिलजलान्यादाय अद्यामुकगोत्रे नान्दीमुखि गायत्रीस्वरूपिणि मातरमुकीदेवि ते पाद्यं सोपकरणं नमोऽस्तु वृद्धिः श्रियै । अद्यामुकगोत्रे नान्दीमुखि सावित्रीस्वरूपिणि पितामहामुकीदेवि ते पाद्यं सोपकरणं नमोस्तु वृद्धिः श्रियै॥अद्यामुकगोत्रे नान्दीमुखि सरस्वतीस्वरूपिणि प्रपितामह्यमुकीदेवि ते पाद्यं सोपकरणं नमोऽस्तुवृद्धिः श्रियै॥दाक्षिणात्यसमाचारस्तु पित्रादिक्रमः।अद्यामुकगोत्र नान्दीमुख वसुस्वरूप पितरमुकशर्म्मन् ते पाद्यं सोपकरणं नमोऽस्तु वृद्धिः श्रियै ॥अद्यामुकगोत्र नान्दीमुख रुद्रस्वरूप पितामहाऽमुकशर्म्मन ते पाद्यं सोपकरणं नमोस्तु वृद्धिः श्रियै॥ अद्यामुकगोत्र नान्दीमुखादित्यस्वरूप प्रपितामहामुकशर्म्मन् ते पाद्यं सोपकरणं नमोऽस्तुवृद्धिःश्रियै॥अद्यामुकगोत्रनान्दीमुखवसुस्वरूप सपत्नीक मातामहामुकशर्म्मन् ते पाद्यं सोपकरणं नमोऽस्तु वृद्धिः श्रियै ॥

अद्यामुकगोत्रनान्दीमुख रुद्रस्वरूप सपत्नीक प्रमातामहामुकशर्म्मन् ते पाद्यं सोपकरणं नमोस्तु वृद्धिः श्रियै।अद्यामुकगोत्र नान्दीमुखादित्यस्वरूप सपत्नीक वृद्धप्रमातामहामुकशर्म्मन् ते पाद्यं सोपकरणं नमोस्तु वृद्धिः श्रियै ॥ पाद्यादीनि समर्पयामि पात्रवर्जितसोपस्करदक्षिणामान्नाय नमः ब्राह्मणाय नमः सम्पूज्य अद्येत्यादि॰ममास्मिन्नमुककर्म्मणि पूर्वाङ्गतया कृतस्य सत्यवसुसंज्ञक विश्वेदेवार्चनपूर्वकमातृमुखनान्दीश्राद्धकर्म्मणः साङ्गफलावाप्तये पितॄणां प्रीतये प्रतिष्ठार्थमिदं सोपस्करदक्षिणमामान्नं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यं सम्प्रददे देवताभ्य इति त्रिःपठित्वाऽऽचामेत्। विश्वेदेवाः पितरश्च प्रीयन्ताम् ॥ निर्देशेन पितुः पुत्रो नान्दीश्राद्धं समाचरेत् ॥ गणेशं वरुणं मातृमण्डलं वसुमण्डलम्। नान्दीश्राद्धमिति प्राहुः पञ्चांगं कर्म्मकाण्डिनः ॥

नवग्रहपूजनम् ।

जलाक्षतपुष्पैः आकृष्णेनेति हिरण्यस्तूपऋषिस्त्रिष्टुप्छन्दः सूर्य्यो देवता सूर्यावाहने विनियोगः। ध्यानम्। पद्मासनःपद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः। दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः॥ऋक्।ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र सूर्य्येहागच्छेति ॥इमं देवा इति गोतमऋषिर्द्विपदा विराट् छन्दः सोमो देवता सोमावाहने विनियोगः। ध्यानम्। श्वेताम्बरःश्वेतविभूषणश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः। चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः॥ऋक्। ॐइमंदेवा असपत्नꣳ सुवद्धं महते क्षत्राय महते ज्येष्ठाय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमीराजा

सोमोऽस्माकं ब्राह्मणाना॑ राजा ॥ ॐ भूर्भुवः स्वः यमुनाती-
रोद्भवात्रेयगोत्र सोमेहागच्छेति ॥ अग्निर्मूर्द्धेति विरूपाक्ष ऋषि-
र्गायत्री छन्दो भौमो देवता भौमावाहने विनियोगः। ध्यानम् ।
रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाधृक्। धरासुतः
शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥ ऋक् । ॐ
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपा॑ रेता॑सि
जिन्वति ॥ ॐभूर्भुवः स्वःअवन्तिदेशोद्भव भारद्वाजगोत्र भौमेहा-
गच्छेति ॥ उद्बुद्ध्यस्वेति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो बुधो देवता
बुधावाहने विनियोगः । ध्यानम् । पीताम्बरः पीतवपुः किरीटी
चतुर्भुजो दण्डधरश्च सौम्यः । हरिप्रियश्चन्द्रसुतो हरिस्थः सदा
मम स्याद्वरदो हि देवः ॥ ऋक् । ॐ उद्बुद्ध्यस्वाग्ने प्रतिजागृहि-
त्वमिष्टापूर्तस॑ सृजेथामयञ्च । अस्मिन्त्सधस्थे अद्ध्युत्तरस्मिन्
विश्वेदेवा यजमानश्च सीदत ॥ ॐ भूर्भुवः स्वः मगधदेशोद्भवा-
त्रेयगोत्र बुधेहागच्छेति ॥ बृहस्पत इति गृत्समद ऋषिस्त्रिष्टुप्छन्दो
बृहस्पतिर्देवता बृहस्पत्यावाहने विनियोगः। ध्यानम्। पीताम्बरः
पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः । तथाऽक्षसूत्रं च
कमण्डलुं च दण्डं च बिभ्रद्वरदोऽस्तु मह्यम् ॥ ऋक् । ॐ बृहस्पते
अति यदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऋ-
तप्रजाततदस्मासु द्रविणं धेहि चित्रम्॥ॐभूर्भुवःस्वः सिन्धुदेशोद्भ-
वांगिरसगोत्र बृहस्पत इहागच्छेति ॥ अन्नादिति प्रजापत्यश्विस-
रस्वतीन्द्रा ऋषयोऽतिजगतीछन्दः शुक्रोदेवता शुक्रावाहने विनि-
योगः।ध्यानम्। श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्य-
गुरुः प्रशान्तः।तथाक्षसूत्रं च कमण्डलु च दण्डं च बिभ्रद्वरदोऽस्तु
मह्यम् ॥ ऋक् । ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रंपयः
सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपान॑शुक्रमन्धस इन्द्र-

स्येन्द्रियमिदम्पयोऽमृतं मधु ॥ ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र शुक्रेहागच्छेति ॥ शन्नोदेवीरिति दध्यङ्ङाथर्वणऋषिर्गायत्री छन्दः शनिर्देवता शन्यावाहने विनियोगः । ध्यानम् । नीलाम्बरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्य्यसुतः प्रशान्तः सदास्तु मह्यं वरदोऽल्पगामी ॥ ऋक् । ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः॥ ॐभूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शने इहागच्छेति ॥ कयान इति वामदेवऋषिर्गायत्रीछन्दो राहुर्देवता राह्वावाहने विनियोगः । ध्यानम् । नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः करतालशूली । चतुर्भुजश्चक्रधरश्च राहुः सिंहासनस्थो वरदोऽस्तु मह्यम् ॥ ऋक् । ॐ कयानश्चित्र आभुव दूती सदा वृधः सखा । कया शचिष्ठया वृता ॥ ॐ भूर्भुवः स्वः राठीनापुरोद्भव पैठीनसिगोत्र राहो इहागच्छेति ॥ केतुं कृण्वन्निति मधुच्छन्दऋषिर्गायत्रीछन्दः केतुर्देवता केत्वावाहने विनियोगः। ध्यानम् । धूम्रो द्विबाहुर्वरदो गदाधृग् गृध्रासनस्थो विकृताननश्च । किरीटकेयूरविभूषितो यः स चास्तु मे केतुरयं प्रशान्त्यै ॥ ऋक् । ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे । समुषद्भिरजायथाः ॥ ॐभूर्भुवः स्वः अन्तर्वेदिदेशोद्भव जैमिनिसगोत्र केतो इहागच्छेति॥ आसनम् । सुवर्णरत्नखचितं शुद्धोर्णानिर्मितं शुभम् । आसनं यन्मयानीतं गृह्यतां भो नवग्रहाः ॥ पाद्यम् । शुद्धपात्रस्थितं दिव्यं जलं तीर्थोद्भवं परम् । पादप्रक्षालनार्थाय गृह्यतां भो नवग्रहाः ॥ अर्घ्यम् । नानातीर्थोद्भवं वारि कर्प्पूरादिसुवासितम् । अर्घपात्रस्थितं दिव्यं गृह्यतां भो नवग्रहाः ॥ पञ्चामृतम् । दधिदुग्धघृतक्षौद्रसिताभिः परिकल्पितम् । पञ्चामृतं मयानीतं गृह्यतां भो नवग्रहाः ॥ स्नानीयम् । गंगाशुतुद्रुयमुनागोदाकृष्णासमा-

हृतम् । स्नानवारि मया प्रीत्या गृह्यतां भो नवग्रहाः ॥ उपवीतम् । शुद्धकार्पासजनितं वेदमन्त्राभिमन्त्रितम् । उपवीतं मयानीतं गृह्यतां भो नवग्रहाः ॥ वस्त्रयुग्मम् । नानाचित्रान्विते वस्त्रे कौशेये वोर्णसम्भवे । मयानीतेंऽगशोभाथ गृह्येतां भो नवग्रहाः ॥ आचमनीयम् । सत्तीर्थजं सुपात्रस्थं पवित्रं स्वादु सर्वतः । आचमार्थं मयानीतं गृह्यतां भो नवग्रहाः ॥ गन्धम् । मलयाचलवृक्षोत्थं कस्तूरीशशिमिश्रितम्। चन्दनं भालशोभार्थं गृह्यतां भो नवग्रहाः ॥ अक्षतान् । शुद्धमुक्ताफलाभासो रजनीशकरोपमाः । अक्षता भालशोभार्थं गृह्यन्तां भो नवग्रहाः ॥ पुष्पाणि । मालतीपाटलाचम्पापुष्पाणि ऋतुजानि वा । दूर्वायुतानि शोभार्थं गृह्यन्तां भो नवग्रहाः ॥ धूपम् । लाक्षागुग्गुलुमांसीजो घृताक्तो वह्निदीपितः । धूपोऽयं सर्वतः शुद्धो गृह्यतां भो नवग्रहाः॥ दीपम् । साज्यकार्पासवर्तीभिर्निर्मितो दीप उत्तमः।वह्निना योजितः प्रीत्या गृह्यतां भो नवग्रहाः॥नैवेद्यम् । सशर्करं घृताक्तं सत्फलयुक्तं सदुग्धकम्। नैवेद्यं शुद्धमन्नाद्यं गृह्यतां भो नवग्रहाः ॥ जलम् । नानातीर्थोद्भवं शुद्धं सत्पात्रस्थं मुदान्विताः।करास्यपादशौचाम्बु गृह्यतां भो नवग्रहाः॥ उपायनम् । हिरण्यरौप्यताम्राद्यन्यतमं यन्मयाहृतम् । उपायनं यज्ञसिद्ध्यै गृह्यतां भो नवग्रहाः ॥ क्षमापनम् । मन्त्रहीनं क्रियाहीनं भक्तिहीनं समर्चनम् । मया कृतं च यत्तद्भोः क्षमध्वं श्रीनवग्रहाः ॥ नमस्कारः। ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ॥ गुरुश्च शुक्रश्च शनिश्च राहुः केतुश्च सर्वे प्रदिशन्तु शं मे ॥

गर्भाधानम् ।

तत्र ऋतुस्नाता वधूश्चतुर्थदिने प्रातस्तूष्णीं सूर्य्यमुपतिष्ठेत ॥ ततस्तद्दिने मातृपूजाभ्युदयिके कृत्वा षोडशरात्रादर्वाक् शुभरात्रौ

दक्षिणकरेण पतिर्वध्वा उपस्थमभिस्पृश्य जपति ।पूषाभग ँ मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो भगो देवता जपे विनियोगः ॥ ॐ पूषाभग ँ सविता मे ददातु रुद्रः कल्पयतु ललामगुम्।विष्णुर्योनिं कल्पयतु त्वष्टारूपाणि पिंशतु।आसिंचतु प्रजापातिर्धाता।गर्भंदधातु मे ॥ इति मंत्रेण । अथ प्राङ्मुख उदङ्मुखो वा संविष्ट एतां वधूमभिमन्त्रयेदनेन॥ गर्भन्देहीति प्रजापतिर्ऋषिरनुष्टुप्छन्दो भगो देवताऽभिमंत्रणे विनियोगः ॥ ॐ गर्भं देहि सिनीवालि गर्भं देहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥इतिमन्त्रेण॥ ततः ॐ रेतो मूत्रमिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो रेतोदेवता रेतःस्रावणे विनियोगः । ॐरेतोमूत्रं विजहाति योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणा वृत उल्बं जहाति जन्मना ॥ यत्त इति प्रजापतिर्ऋषिस्त्रिष्टुप्छंदो हृदयालम्भने विनियोगः ॥ ॐ यत्तेसुसीमे हृदयं दिविचन्द्रमसि श्रितम् । वेदाहं तन्मांतद्विद्यात्।पश्येम शरदः शतं जीवेम शरदः शत ँ शृणुयाम शरदः शतमिति मन्त्रेण ॥ ततः स्वस्थो हृष्टमनाः हृदेश प्रसन्नामनातुरां कामयमानामभग्नशय्यायां प्रदोषादूर्ध्वं स्त्रियमभिगच्छेत् सा यदि गर्भं न दधाति तदा पतिः कृतोपवासः पुष्यनक्षत्रे कण्टकारिकामूलमुत्पाट्योदकेन पिष्ट्वा वधूदक्षिणनासापुटे तद्रसं दद्यात् अनेनैव मन्त्रेण ॥ इयमोषधीति प्रजापतिर्ऋषिर्बृहतीछन्द ओषधिर्देवता सेके विनियोगः ॥ ॐ इयमोषधी त्रायमाणा सहमाना सरस्वती । अस्या अहं बृहत्याः पुत्रः पितुरिवनामजग्रभमिति सिक्त्वा॥केचिन्मारुतनामाग्नौ हवनमपि कुर्वन्ति ॥

पुंसवनम् ।

तत्र गर्भमासापेक्षया द्वितीयतृतीययोरन्यतरस्मिन्करणीयं पुष्यपुनर्वसुमृगशिरोहस्तमूलश्रवणान्यतमपुन्नामनक्षत्रयुतोभयचन्द्रता-

रानुकूलदिवसमवगत्य ततः पूर्वदिने वधूमुपवासं कारयित्वा अग्रिमदिने तस्याः स्नाताया अहतवासोयुगपरिधानानन्तरं शुचिः स्नातः कृताचमनो गणेशमातृकाभ्युदयिकादिकं कृत्वा अद्येत्यादि अमुकशर्माहं ममास्यां वध्वामुत्पत्स्यमानगर्भापत्यस्य बैजिकगार्भिकदोषपरिहारार्थं पुरुतोदयप्रतिरोधिकर्म्मपरिहारद्वारा श्रीपरमेश्वरप्रीतये पुंसवनाख्यसंस्कारकर्म करिष्ये। वटप्ररोहं वटशुंगांश्च आचारात् कुशकण्टकमपि शिशिरेण जलेन पिष्ट्वा वधूदक्षिणनासापुटे तद्रसं दद्यात् ॥ हिरण्यगर्भ इति और्णनाभऋषिरनुष्टुप्छन्द इन्द्रो देवता आसेचने विनियोगः। ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ अद्भ्य इति उत्तरनारायणऋषिस्त्रिष्टुप्छन्द आदित्यो देवता आसेचने विनियोगः॥ ॐ अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥ इति वामनासापुटे च। केचिदत्र शोभनाग्नौ हवनमपि कुर्वन्ति ॥

सीमन्तोन्नयनम् ।

तत्र गर्भमासापेक्षया षष्ठेऽष्टमे वा पुन्नामनक्षत्रयुतचन्द्रतारानुकूलविहितदिने गणेशादिपञ्चाङ्गदेवताः सम्पूज्य बहिः शालायाम् अद्येत्यादि० अमुकशर्म्माऽहं ममास्यां वध्वां गर्भाभिवृद्धिपरिपन्थिपिशितप्रियाऽलक्ष्मीभूतराक्षसीगणदूरनिरसनपूर्वकं सकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणाय परमेश्वरप्रीतये स्त्रीसंस्काररूपं सीमन्तोन्नयनकर्म्म करिष्ये॥कुशत्रयेण हस्तपरिमितचतुरस्रभूमिं परिसमूह्य कुशानीशाने निक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरतस्तिस्रो रेखा विलिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य वारिणा तं देशम-

भिषिच्य कांस्यपात्रेणाग्निमादाय तत्र प्रत्यङ्मुखं निदध्यात्। ततो ब्राह्मणवरणम्॥ॐ अद्यकर्तव्यसीमन्तोन्नयनकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे।ब्राह्मणःवृतोस्मीति प्रतिवचन दद्यात्॥यथाविहितं कर्म्मकुर्वीति होत्राभिहिते करवाणीति प्रतिवचनानन्तरमग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य अस्मिन् कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय भवानीति तेनोक्ते अग्निप्रदक्षिणं कारयित्वा ब्राह्मणं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्। ततः परिस्तरणम्। कुशचतुर्थांशमादायाग्नेयादीशानान्तं ब्रह्मणोग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तमग्नितः प्रणीतापर्य्यन्तम्। ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशद्वयं प्रोक्षणीपात्रमाज्यस्थाली चरुस्थाली सम्मार्जनकुशा उपयमनकुशाः प्रादेशमितपालाशसमिधस्तिस्रः स्रुवः आज्यंतण्डुलपूर्णपात्रं तिलमुद्गमिश्रास्तण्डुलाः पूर्णपात्रम् एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि तदुत्तरतो वीणागाथिनौ प्रादेशमात्रा साग्राश्वत्थशङ्कुः त्रिःश्वेतशल्लकीकण्टकं पीतसूत्रपूर्णस्तर्कुः दर्भपिञ्जुलिकात्रयम् उदुम्बरफलयुग्मसुवर्णघटितदेवकर्करादियुक्तसूत्रदोरकपुष्पबिल्वादिफलयुतवाराघ्रतयादि अन्यद्यथाचारपरिप्राप्तद्रव्यमासादनीयम्॥ततः पवित्रच्छेदनार्थकुशैः प्रादेशमितपवित्रे छित्त्वा सपवित्रपाणिना प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे द्वे पवित्रे गृहीत्वा त्रिरुद्दिङ्गनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं प्रोक्षणीजलेन यथासादितद्रव्यसेचनं ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानम् तत आज्यस्थाल्यामाज्यनि-

र्वापः चरौ तु तिलतण्डुलमुद्गानांप्रणीतोदकेन त्रिः प्रक्षालनं तत्र किञ्चिज्जलं दत्त्वा प्रक्षेपः । ततः स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यं ग्राहयित्वा अग्नेरुत्तरतश्चरुं दक्षिणत आज्यं युगपन्निदध्यात् ॥ ततः सिद्धे चरौ ज्वलत्तृणं प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षेपः । ततस्त्रिः स्रुवप्रतपनं सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिःप्रतप्य दक्षिणतो निदध्यात्॥तत आज्यमग्नितश्चरोःपूर्वेणानीयाग्रे धृत्वा आज्यपश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात्॥ततआज्येप्रोक्षणीवदुत्पवनं चावेक्ष्यसत्यपद्रव्ये तन्निरसनम्।ततःपूर्ववत् प्रोक्षण्युत्पवनं तत उत्थायोपयमनकुशानादाय प्रजापतिंमनसा ध्यात्वा तूष्णीमग्नौ क्षिपेत् घृताक्ताः समिधः। अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेण पर्य्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुराज्येन जुहुयात् ॥ तत आहुतिचतुष्टये प्रत्याहुत्यनंतरं हुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः।ततः समिद्धतमेऽग्नौ प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छंदो मंत्रोक्ता देवता आज्यहोमे विनियोगः॥ॐप्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॥ ॐ इंद्राय स्वाहा इदमिन्द्राय॥ इत्याघारौ॥ॐ अग्नये स्वाहा इदमग्नये॥ ॐ सोमाय स्वाहा इदं सोमाय ॥इत्याज्यभागौ ॥ ततोऽन्वारब्धः स्थालीपाकेन होमः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॥ ततोनन्वारब्धो जुहुयात् ॥ आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः ॥ॐअग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते॥ भूरादिव्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसिअग्निवायुसूर्य्यादेवताव्याहृतिहोमेविनियोगः॥ ॐ भूः स्वाहा इदमग्नये ॥ ॐभुवः स्वाहा इदं वायवे॥ॐस्वः स्वाहा इदं सूर्य्याय॥ मङ्गलाग्निं सम्पूज्य । त्वन्नोअग्ने मंत्रद्वयस्य वामदेव-

ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐत्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः॥यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ᳪ सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नये॥ ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ । अवयक्ष्वनोवरुणᳪरराणोव्वीहिमृडीकᳪ सुहवोनएधिस्वाहा ॥ इदं वरुणाय ॥ अयाश्चाग्ने मंत्रस्य विराड् ऋषिर्गायत्रीछन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाअसि ॥ अयानोयज्ञं वहास्ययानोधेहिभेषजᳪ स्वाहा ॥ इदमग्नये ॥ य ते शतं मंत्रस्य शुनःशेफऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता । सर्वप्रायश्चित्तहोमे विनियोगः ॥ ॐ येतेशतं वरुण ये सहस्रं यज्ञियाःपाशाविततामहान्तः । तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचन्तुमरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्र विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यश्च न मम॥ ॐ उदुत्तमं मंत्रस्य शुनःशेफऋषिस्त्रिष्टुप्छन्दो वरुणो देवतासर्वप्रायश्चित्तहोमे विनियोगः॥उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमᳪ श्रथाय ॥ अथावयमादित्यव्रते तवानागसोअदितयेस्यामस्वाहा ॥ इदं वरुणायादितये ॥ॐप्रजापतयेस्वाहा इदं प्रजापतये ॥ इतिप्राजापत्यम् ॥ अथसंस्रवप्राशनम्॥केचिदत्र मङ्गलाग्निं च पूजयन्ति।तत आचम्य ।अद्य सीमन्तोन्नयनहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणःप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥ स्वस्तीति प्रतिवचनम् । ततो ब्रह्मग्रंथिविमोकः ॥ततःसुमित्रियानइति दध्यङ्ङाथर्वण ऋषिरापो देवता।शिरःप्रोक्षणे विनियोगः॥ ॐ सुमित्रियानआपओषधयः सन्तु॥ इतिपवित्रद्वयगृहीतप्रणीताजलेन शिरः सम्प्रोक्ष्य॥ॐ दुर्म्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियंचवयंद्विष्मः ॥ इत्यैशान्यां

प्रणीतान्युञ्जीकरणम्॥ ततः परिस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्यं॥ ॐ देवगात्विति अत्रिर्ऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः॥ ॐ देवागातुविदोगातुंवित्त्वागातुमितमनसस्पतइमंदेवयज्ञ ँ स्वाहाव्वातेधाः॥इति मन्त्रेण बर्हिर्होमः॥ ततः पश्चादग्नेर्वधूमहतवाससी परिधाप्य मृद्वासने उपवेशयेत्॥ततोऽश्वत्थशङ्कुप्रभृतीन् वर्तुलीकृत्य वधूसीमन्तमूर्धनि विनयति॥ भूरादिमन्त्रत्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुछन्दांसिअग्निवायुसूर्य्या देवता विनयने विनियोगः॥ ॐ भूर्विनयामि॥ ॐ भुवो विनयामि। ॐ स्वर्विनयामि।ॐभूर्भुवः स्वः सर्वं विनयामि इति मंत्रेण सकृत्॥पूर्वोक्तमन्त्रैर्वारत्रयं ततोऽश्वत्थशंकुप्रभृतिनिर्मितवर्तुलं वधूसीमन्तदक्षिणतो वेणीं कृत्वा पतिर्बध्नाति॥अयं मन्त्रस्य प्रजापतिर्ऋषिर्बृहती छन्दःफलिनी देवता वेणीबन्धने विनियोगः॥ ॐ अयमूर्ज्जाव्वतोवृक्षऊर्ज्जीवफलिनीभव॥ इतिमन्त्रेण॥ततो बिल्वादिसमन्विताष्टतयेन स्नपनम्॥ ततः फलपुष्पादिकं नूतनवस्त्रेण बद्धा प्रतीक्ष्य धर्त्तव्यम्॥ प्रतिस्नपने भर्तृपठनीयो मन्त्रः॥ अयं मन्त्रस्य प्रजापतिर्ऋषिर्बृहती छन्द आपो देवता जपे विनियोगः॥ ॐअयमूर्ज्जेतिराजान ँ संगायेतामिति॥प्रैषानन्तरं सोमएवमन्त्रस्य प्रजापतिर्ऋषिः। गायत्रीछन्दः। सोमो देवता। सोमगाने विनियोगः। ॐ सोम एव नो राजेमा मानुषीः प्रजाः। अविमुक्तचक्र आसीरंस्तीरे तुभ्यमसौ श्रीमत्यमुकीदेवीइति गाथांवीणागाथिनौ गायतः। अन्यो वा वीरतरः या ग्रामसमीपस्था नदी तस्या नाम गृह्णीयात्। उत्थाय वधूदक्षिणकरस्थस्रुवस्पृष्टफलम्। मूर्धानमिति भरद्वाज ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः। ॐ मूर्धानं दिवोऽ अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्।कवि ँ सम्म्राजमतिथिं जनानामासन्नापात्रं जनयन्त

देवाः । स्वाहेति वह्नौ क्षिपेत् ।उपपिश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रेण त्र्यायुषमिति नारायण ऋषिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरण विनियोगः।ॐ त्र्यायुषं जमदग्नेरिति ललाटे। कश्यपस्यात्र्यायुषमिति ग्रीवायाम्।यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले । तन्नो अस्तु त्र्यायुषमिति हृदि।एवं वध्वा अपि तिलकमन्त्रपाठो ब्राह्मणभोजनं च ॥ पञ्चगव्यमन्त्रणम् ॥गोमूत्रं गोमय क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥ तत्स्वर्णसहितं ताम्रपात्रस्थं दूर्वया कुशैः । वक्ष्यमाणैर्वेदमन्त्रैः सम्पिबेद्भिरमन्त्रितम् ॥ गायत्र्या । ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवावाजस्य संगथे ॥ ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणआयू ᳪ षि तारिषत्॥ ॐतेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥

जातकर्म्म ।

पिता जाते पुत्रे कृतक्षौरः स्नानं कृत्वा शुभे धौते वाससी परिधाय प्रसवशूलवतीं पत्नीमद्भिः परिषिञ्चति। एजत्विति अत्रिर्ऋषिः पंक्तिश्छन्दो गर्भो देवताऽभ्युक्षण विनयोगः ॥ ॐ एजतु दशमास्यो गर्भो जरायुणा सह यथायं वायुरेजति यथा समुद्र एजतिए वायं दशमास्यो अस्रृग्जरायुणा सह वधूसमीपे पतिर्जपति। अवैत्विति प्रजापतिर्ऋषिर्बृहती छन्द उल्वन्देवता जपे विनियोगः । ॐअवैतु पृश्निशेवलᳪ शुनेजराय्वत्तवे नैवमाᳪ सेना पीवरीं न कस्मिंश्चनायतनमव जरायुपद्यताम् । प्राङ् नाभिवर्धनाज्जात-

कर्म्म कार्य्यं विधानतः । गणपत्यादिपञ्चाङ्गदेवताः सम्पूज्य अद्येत्यादि० अमुकशर्म्माहं मम जातस्य पुत्रस्य जरायुजटितविविधोच्चावचमातृचर्वितान्नविषमार्त्तिकगर्भाम्बुपानजनितसकलदोषनिर्बर्हणपूर्वकं श्रीपरमेश्वरप्रीतिद्वारा आयुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणार्थं जातकर्म्माख्यसंस्कारं करिष्ये ॥ ततः कुमारं दक्षिणकरस्यानामिकया स्वर्णांतर्हितया मधुघृते एकीकृत्य घृतमेव वा प्राशयति भूरादिव्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्या देवताः समधुघृतप्राशने विनियोगः ॥ ॐ भूस्त्वयि दधामि ॥ ॐ भुवस्त्वयि दधामि ॥ ॐ स्वस्त्वयि दधामि ॥ ॐ भूर्भुवःस्वः सर्वं त्वयि दधामि ॥ एतच्च मेधाजननम् ॥ ततः कुमारस्य दक्षिणकर्णे नाभ्यां वा मुखं दत्त्वा अग्निरायुष्मानित्यादिमंत्राष्टकस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिंगोक्ता देवताः दक्षिणकर्णाभिमंत्रणे विनियोगः॥ॐ अग्निरायुष्मान् सवनस्पतिभिरायुष्माँस्तेन त्वायुषायुष्मंतं करोमि॥ॐ सोम आयुष्मान्सओषधीभिरायुष्माँस्तेन त्वायुषायुष्मंतं करोमि ॥ ॐ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मंतं करोमि ॥ ॐ देवा आयुष्मंतस्तेऽमृतेनायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि ॥ ॐ ऋषय आयुष्मंतस्ते व्रतैरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि।ॐपितरआयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेनत्वायुषायुष्मन्तं करोमि ॥ॐयज्ञ आयुष्मान् सदक्षिणाभिरायुष्माँस्तेन त्वायुषायुष्मंतं करोमि ॥ ॐ समुद्र आयुष्मान् सस्रवंतीभिरायुष्माँस्तेन त्वायुषायुष्मंतं करोमि॥इति त्रिर्जपित्वा अथ तस्य दीर्घमायुःकामयमानः पुत्रमभिस्पृशन् वाग्जपति स चायं दिवस्परिप्रभृतिमंत्ररुद्रस्य वत्सप्रीऋषिस्त्रिष्टुप्छन्दोऽष्टमस्य पंक्तिश्छन्द आयुर्देवता परिमर्शने विनियोगः।ॐदिवस्परि प्रथमंजज्ञे अग्निरस्मद्द्वितीयंपरिजात-

वेदाः। तृतीयमप्सुनृमणाअजस्रमिंधानएनंजरतेस्वाधीः॥ॐविद्मातेअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्राविद्मातेनामपरमंगुहायद्विद्मातमुत्संय्यतआजगन्थ॥समुद्रेत्वानृमणाअप्स्वंतर्नृचक्षाईधेदिवोअग्नऊधन्तृतीयेत्वारजसितस्थिवा ँ समपामुपस्थेमहिषाअवर्धन्॥अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमंजन्सद्योजज्ञानोव्हिहीमिद्धोअख्यदारोदसीभानुनाभात्यन्तः॥ श्रीणामुदारोधरुणोरयीणांमनीषाणांप्रार्पणः सोमगोपाः॥वसुःसूनुः सहसोअप्सुराजाविभात्यग्रउषसामिधानः॥विश्वस्यकेतुर्भुवनस्यगर्भआरोदसीअपृणाज्जायमानः। वीडुंचिदद्रिमभिनत्परायंजनायदग्निमयजंतपञ्च॥उशिक्पावकोअरतिःसुमेधामर्त्त्येष्वग्निरमृतोनिधायि। इयर्तिधूममरुषं भारिभ्रदुच्छुक्रणशोचिषाद्यामिनक्षन्॥ दृशानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुः श्रिये रुचानः।अग्निरमृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः॥यस्ते अद्यकृण्वद्भद्रशोचेपूपंदेवघृतवंतमग्ने। प्रतन्नयप्रतरंवस्योअच्छाभिसुम्नं देवभक्तंयविष्ठ॥ आतंभजसौश्रवसेष्वग्नउक्थउक्थआभजसस्यमाने।प्रियः सूर्य्येप्रियोअग्नाभवात्युज्जातेनभिनदज्जनित्वैः॥ त्वामग्नेयजमानाअनुद्यून्विश्वाव्वसुदधिरेवार्य्याणि।त्वयासहद्रविणमिच्छमानाव्रजंगोमंतमुशिजोविवव्रुः॥ एतेषां मंत्राणां वत्सप्रियऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता वा।ततः कुमारं प्रतिदिशमेकैकं ब्राह्मणं मध्ये पञ्चममूर्ध्वमवेक्ष्यमाणमवस्थाप्य तमुद्दिश्यइममनुप्राणितेति पिता ब्रूयात् ॥ॐ महीद्यौरित्यादिमंत्रैः पञ्चकलशान्सम्पूज्य ब्राह्मणान् वृत्वा॥ ॐ प्राणेतिपूर्वस्थितोव्यानेति दक्षिणस्थितोऽपानेतिपश्चिमस्थितउदानेतिउत्तरस्थितः समानेतिमध्यस्थितउपर्य्यवेक्ष्यमाणःएषामसंभवे स्वयमेव तत्रतत्रोपविश्य तथैव ब्रूयात्॥ततस्तान् कलशान् पञ्चब्राह्मणेभ्यो दद्यात्॥अथ कुमारस्य जन्मभूमिमभिमंत्रयेत्। वेदते भूमिहृदयमिति प्रजापतिर्ऋषिः पंक्ति-

श्छन्दः पृथिवी देवताऽभिमंत्रणे विनियोगः ॥ ॐ वेदतेभूमिहृदयं दिविचन्द्रमसिश्रितम् । वेदाहंतन्मांतद्विद्यात्पश्येमशरदः शतंजीवेम शरदः शत॑श्रृणुयामशरदः शतमित्यनेनाथकुमारमभिमृशति ॥ अश्माभवेति प्रजापतिर्ऋषिर्बृहतीछन्दोऽभिमर्शने विनियोगः॥ ॐअश्माभवपरशुर्भव हिरण्यमश्रुतंभव।आत्मावैपुत्रनामासित्वंजीवशरदःशतम्। तत्र कुमारमातरमभिमंत्रयेत्॥इडासीतिप्रजापतिर्ऋषिर्गायत्रीछन्द इडादेवताऽभिमंत्रणेविनियोगः ॥ ॐइडासिमैत्रावरुणीवीरेवीरमजीजनथाः सात्वंवीरवतीमवयास्मान्वीरवतोऽकरत् ततः कुमारनाभिवर्धने कृते तस्याः दक्षिणस्तनं प्रक्षाल्य कुमाराय प्रयच्छति॥ॐइममितिसप्तर्षिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता दक्षस्तनप्रदानेविनियोगः ॥ ॐ इम॑स्तनमूर्जस्वंतंधयापांप्रपीनमग्नेसरिरस्य मध्येउत्संजुषस्वमधुमंतमर्व्वन्समुद्रिय॑ सदनमाविशस्व॥ ततो वामस्तनं प्रक्षाल्य कुमाराय प्रयच्छति इम॑स्तनमित्यादि यस्तेस्तन इति दीर्घतमा ऋषिस्त्रिष्टुप्छन्दोगौर्देवता वामस्तनप्रदाने विनियोगः ॥ॐयस्तेस्तनःशशयोयोमयोभूर्य्योरत्नधावसुविद्यःसुदत्रःयेनविश्वापुष्यसिवार्य्याणिसरस्वतितमिहधातवेकः।ततःप्रसवित्रीशयनीयमस्तकोपरिभूमौ पानीयपूर्णभाजनं निदध्यात्॥ ॐआप इति प्रजापतिर्ऋषिरनुष्टुप्छन्द आपो देवताःस्थापनेविनियोगः॥ॐ आपोदेवेषुजाग्रथयथादेवेषुजाग्रथएवमस्यांसूतिकायांसपुत्रिकायां जाग्रथतच्च सूतिकोत्थापनपर्य्यन्तं तत्रैव धर्त्तव्यम् ॥ ततः सूतिकागृहद्वारप्रवेशे प्रगल्भनामाग्नौ पंचभूसँस्कारान् कृत्वा सचाग्निरुत्थानदिनपर्य्यंतं तत्रैवधर्त्तव्यः॥तत्र चाग्नौ सन्ध्ययोः फलीकरणांस्तण्डुलांस्तन्मिश्रान् सर्षपान् दशदिनानि पिता वान्यो ब्राह्मणो नित्यं हस्तेन जुहोति तत्र प्रथमाहुतौ मंत्रः॥ ॐशुण्डामर्कामंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः ॥ ॐ

शुण्डामर्काउपवीरःशौण्डिकेयउलूखलःमलिम्लुचोद्रोणासश्च्यवनो नश्यतादितः स्वाहा। इदं शुण्डामर्काभ्यामुपवीरायमलिम्लुचायद्रो णेभ्यश्च्यवनाय॥ द्वितीयाहुतौ आलिखन्निति ॐ प्रजापतिर्ऋषिर-नुष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः॥ ॐ आलिखन्न निमिषः किंवदन्तउपश्रुतिर्हर्य्यक्षःकुंभीशत्रुःपात्रपाणिर्नृमणिर्हंत्रीमुखः सर्ष-पारुणश्च्यवनोनश्यतादितःस्वाहा॥इदमालिखतेऽनिमिषायकिंव-दद्भ्यउपश्रुतयेहर्य्यक्षाय कुंभीशत्रवे पात्रपाणये नृमणये हंत्रीमुखा-यसर्षपायारुणाय च्यवनाय॥अथ यदि दशाहाभ्यन्तरे कुमारग्रहो बालमाविशेत्तेनाविष्टो न नामयति न रोदिति न हृष्यति न तुष्यति च तदेतन्नैमित्तिकं कर्त्तव्यम्॥ तदा तं बालकं जालेन प्रच्छाद्य उत्तरीयेण वाससाङ्कमादाय तं बालं पिता जपति। ॐकूर्कुर इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो जपे विनियोगः॥ ॐ कूर्कुरस्तु कूर्कुरःकूर्कुरोबालबन्धनश्चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपे-तापहूरत्सत्यंयत्तेदेवावरमददुःसत्वंकुमारमेववावृणीथाः॥द्वितीयमं त्रस्याप्ययंविनियोगःपूर्वोक्तमंत्रवत्॥चेच्चेच्छुनकसृजनमस्ते अस्तु सीसरोलपेतापहूरत्सत्यंयत्तेसरमामातासीसरः पिताश्यामशबलौ भ्रातरौचेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेतापहूरेतिजपः नना-मयतिनरोदितिनहृष्यतिनग्लायतियत्रवयंवदामोयत्रचाभिमृशाम-सि इत्यभिमृशति॥ ततो ब्राह्मणाय दक्षिणां दत्त्वामंत्राभिषेकं गृह्णीयात्॥ अष्टांगुलं परित्यज्य नालच्छेदं तु कारयेत्॥

षष्ठीमहोत्सवविधिः।

ततः षष्ठे दिवसे अहतवासोयुगपरिधानपूर्वकं सामग्रीं सम्पाद्य पञ्चगव्यप्रोक्षणं विधाय गणेशादिपञ्चांगदेवताः सम्पूज्य संकल्पः कार्य्यः॥अद्येत्यादि॰ अमुकशर्म्माऽहंममजातस्यपुत्रस्यायुरारोग्या वाप्तये प्रद्युम्नस्कन्दसहितषष्ठीपूजनं करिष्ये॥ युधिष्ठिरउवाच॥

पुत्रस्य वा कन्यकाया जनने को महः स्मृतः। किं दानं कस्य पूजा च तन्मे ब्रूहि जनार्दन ॥ श्रीकृष्ण उवाच ॥ शृणु पाण्डव यत्नेन सुतोत्पत्तौ महोत्सवम् । जन्मषष्ठदिने कार्य्या षष्ठीनाम्नी त्रिशूलिनी ॥ पराह्नसमये भित्तौ गोमयीं प्रतिमां लिखेत् । प्रद्युम्नं विलिखेद्दक्षे वामे स्कन्दं तथैव च ॥ कपर्दिकाः प्रदातव्यास्तस्या ह्यंगेषु कृत्स्नशः। कर्णयोः कुण्डले देये दूर्वापल्लवशोभिते॥दिव्यवस्त्रपरीधानां तां देवीं पूजयेत्ततः । अग्रे दीपाष्टकं दद्यान्नैवेद्यं विविधं तथा ॥ नारिकेलेक्षुपनसाक्षोटकादिफलानि च । कलशं सहिरण्यं च स्थापयेन्मंत्रगर्भितम् ॥ द्विजन्मानं सपत्नीकं सदाचारसमन्वितम् । आहूय वृणुयात्पूर्वं गन्धाक्षतफलाम्बुभिः।तत्रादौ प्रद्युम्नपूजा॥ शङ्खचक्रगदापद्मवनमालाविभूषितः । प्रद्युम्नो रुक्मिणीपुत्रो नानालङ्कारभूषितः ॥ इति ध्यात्वा प्रद्युम्नाय नमः इति पाद्यादिभिः सम्पूज्य प्रार्थयेत् ॥ भोः प्रद्युम्न महाबाहो लक्ष्मीहृदयनन्दन । कुमारं रक्ष मे भीतेः प्रणतोऽस्मि गदाधर ॥ततः स्कन्दपूजनम् ॥ॐ द्रप्सश्चेति देवश्रवा ऋषिस्त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने-विनियोगः॥ ध्यानम्॥ वराभयकरः साक्षाद्द्विभुजः शिखिवाहनः । किरीटी कुण्डली देवः स्कन्दः कार्य्यो विभूषितः ॥ ऋक् ॥ ॐ द्रप्सश्चस्कन्दपृथिवीमनुद्यामिमंचयोनिमनुयश्चपूर्वः ।समानंयोनिमनु संचरन्तंद्रप्संजुहोम्यनुसप्तहोत्राः॥ ॐ भूर्भुवः स्वः स्कन्देहागच्छेहतिष्ठ । स्कन्दाय नमः पाद्यादिभिः सम्पूज्य प्रार्थयेत् ।नमः कुमाराय महाप्रभाय स्कन्दाय ते स्कन्दितदानवाय। नवार्कबिम्बद्युतये नमोस्तु नमोस्त्वमोघोद्यतशक्तिधारिणे ॥ नमो विशाखाय विचारिणेऽस्तु ते नमोस्तु ते षण्मुख कामरूपिणे ॥ गुहाय गूढाभरणाय ते नमो नमोस्तु ते दानवदारणाय वै ॥ नमो नमस्तेऽस्तु करोत्कटाय नमो मयूरोज्ज्वलवाहनाय । नमो धृतो-

दण्डपताकिनेऽस्तु नमोस्तु केयूरधराय तुभ्यम् ॥ सेनानये पावकिने नमोस्तु नमोस्तु ते बालपराक्रमाय । नमो विशालाय महाव्रताय नमःप्रभावप्रणताय तुभ्यम् ॥ स्कन्दशिरसि दूर्वाः स्थापयित्वा ततः षट्कृत्तिकापूजनम् । शिवासंभूतिसंप्रीतिसन्नत्यनुसूयाक्षमाः । पूजयेन्नाममंत्रैश्च चतुर्थ्यंतैः पृथक्पृथक् ॥ ततः प्रार्थयेत्॥जगन्मातर्जगद्धात्रि जगदानन्दकारिणि । नमस्ते देवि कल्याणि प्रसीद मम कृत्तिके ॥ इति पृथक् २ सम्प्रार्थ्य षष्ठीं पूजयेत् ॥ एतन्त इति प्रतिष्ठाप्य ॐ भूर्भुवः स्वः षष्ठीदेवीहागच्छेत्यादि ध्यायेत्॥ प्रफुल्लपद्मवदनामर्धपद्मासनस्थिताम् । सर्वाङ्गभूषितां देवीं पीनोन्नतपयोधराम् ॥ स्रवत्पीयूषवदनां पीतकौशेयवस्त्रकाम् । चतुर्भुजां दक्षिणेन धृतमन्थानकां तथा ॥ नीलोत्पलं च वामेन दधतीं चारुहासिनीम् । वामदक्षिणहस्ताभ्यां वराभयकरीं शिवाम् ॥ प्रद्युम्नस्कन्दमध्यस्थां कमलायतलोचनाम् । अधःस्थितकराभ्यां तु महाषष्ठीं विचिन्तये ॥ आवाहनम् ॥ आवाभ्यां पूज्यसे देवि महाषष्ठीति विश्रुते।शक्तिरूपेण मे बालं रक्ष जागरवासरे। पाद्यम्॥ शक्तिस्त्वं सर्वलोकानां बालानां हितकारिणी । मातर्बालमिमं रक्ष पाद्यं मे प्रतिगृह्यताम् ॥ अर्घ्यम् ॥ पत्रपुष्पफलाम्भोभी रत्नैश्च बहुभिर्युतः।षष्ठि देवि मया दत्तो ह्यर्घ्योऽयं प्रतिगृह्यताम्। पंचामृतम्॥पयोदधिघृतं चैव शर्करामधुसंयुतम् । पञ्चामृतं मयानीतं गृह्ण षष्ठिनमोस्तुते॥स्नानजलम्॥गंगादितीर्थसंभूतंगन्धाक्षतयुतंजलम् गृहाणेदं मया दत्तं स्नानार्थं परमेश्वरि।वस्त्रयुग्मम्॥लोकलज्जाहरंवस्त्रं पीतकौशेयरञ्जितम्।कार्पासतन्तुसंयुक्तंगृह्णषष्ठिमहेश्वरि॥भूषणानि। रत्नकङ्कणवैदूर्य्यमुक्ताहारादिकानि मे। सुप्रसन्ने महाषष्ठि ह्यर्पितानि गृहाण मे ॥ चन्दनम् ॥ श्रीखण्डं चन्दनं दिव्यं गंधाढ्यं सुमनोहरम् । विलेपनं महाषष्ठि गृहाण करुणानिधे ॥ अक्षताः । शुद्ध-

मुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः । द्योतयामि जगन्मात-र्महाषष्ठि नमोऽस्तु ते ॥ पुष्पाणि ॥ मल्लिकापाटलीजाती-बिम्बापुष्पाणि भूरिशः।गृहाण पूजनार्थायमहाषष्ठिनमोऽस्तु ते ॥ धूपम् ॥ वनस्पतिरसोत्पन्नो गन्धाढ्यः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ दीपम् ॥ साज्यं सद्वर्त्तिकायुक्तं वह्निना योजितं मया । दीपं गृहाण देवेशि महाषष्ठि नमोऽस्तु ते॥ नैवेद्यम्॥ विचित्रपक्वान्नयुतं तथाऽपूपसमन्वितम् । फेणिकामोदक-युतं नैवेद्यं प्रतिगृह्यताम्॥ जलम्॥ ॐषष्ठीदेव्यै नमः ।उपायनम्॥ हिरण्यगर्भगर्भस्थं हैमं बीजं विभावसोः । अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥ नीराजनम् । ॐ अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् । आरार्त्तिकमिदं देवि गृहाण मम सिद्धये ॥ नमस्कारः ॥ जय देवि जगन्मातर्जगदानन्दकारिणि । प्रसीद मम कल्याणि महाषष्ठि नमोऽस्तु ते ॥ प्रार्थना ॥ ॐ पुरा त्वं पूजिता देवैर्ब्रह्मविष्णुशिवादिभिः । आवाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम् ॥ ततः पिता बालकस्य षष्ठीदेव्याः पुरः स्थितः । बद्धाञ्जलिर्भक्तिनम्रो वाचमुच्चारयेदिमाम् ॥ त्वमेव माताऽदितिरब्धिजा त्वं गौरी त्वमेवासि धृतिः क्षमा त्वम् ॥ कीर्तिः समृद्धिर्भुवनस्य धात्री त्वमेव देवी प्रणतोऽस्मि तुभ्यम् ॥ यथा सर्वाणि भूतानि त्वयि स्यूतानि रत्नवत् ।चराचराणि भूतानि त्वत्तो जातान्यनेकशः ॥ पुमान् साक्षी भवत्येष तेन सत्येन बुद्धिमान् । देह्यस्मै बालकायायुर्दीर्घं देवि नमोऽस्तु ते ॥त्वं सृष्टि-राद्या सृजसि प्रजास्त्वं स्थितिस्तथा त्वं सकला बिभर्षि ।त्वामेव वाक्कर्ममनोभिरद्य समर्चयाम्यस्तु शिशुश्चिरायुः ॥स्वस्ति मेऽस्तु गृहे नित्यं तथा पुत्रोत्सवं शुभम्।पश्येऽहं देवि कल्याणि प्रसादात्तव नान्यथा ॥ ततोऽर्भकस्य जननी प्रार्थयेत्तामतन्द्रिता।पुष्पाक्षतयुता

दृष्ट्वा दण्डवत्पतिता सती ॥ तव प्रसादात्तनयस्य वक्त्रं दृष्टं मया देवि नमोऽस्तु तुभ्यम्।सौभाग्यमारोग्यमभीष्टसिद्धिंदेहिप्रजायाश्चिरजीवितां च॥ ॐ गौरीपुत्रो यथा स्कन्दः शिशुः संरक्षितस्त्वया। तथा मम सुतं रक्ष षष्ठि देवि नमोऽस्तु ते ॥ षष्ठि देवि नमस्तुभ्यं सूतिकागेहवासिनी। पूजितासि मया भक्त्या रक्ष मां बालसंयुताम्। अथ तद्बान्धवाः सर्वे स्वस्तिवाक्यपुरस्सरम् । कामयन्तोऽर्भकस्यायुः प्रार्थयन्तः सयोषितः ॥ जननीं सर्वसौख्यानां वर्धिनीं कुलसम्पदाम् । साधिनीं सर्वसिद्धीनां जन्मदे त्वां नता वयम् ॥ जननी त्वं हि भूतानां बालानां च महद्धृते । नारायणस्वरूपेण बालं मे रक्ष सर्वदा॥शक्तिस्त्वं सर्वलोकानां बालानां हितकारिणी। मातृवद्रक्ष मे बालं महाषष्ठि नमोऽस्तुते॥श्रीकृष्ण उवाच॥गीतवाद्यविनोदेन नृत्येन च युधिष्ठिर । रात्रौ जागरणं कुर्य्याद्दैवज्ञैः सह सम्मतः ॥ बद्धग्रीवमजापुत्रं वटकाष्टकजस्रजा । पुनःपुनर्महाशब्दं कारयेत्कर्णताडनात्॥ भूतप्रेतपिशाचानां संघा डाकिनिकास्तथा । बालग्रहा यातुधानास्तच्छब्दाकर्णनेन हि॥ शाकिन्यश्च विनश्यंति जले बुद्बुदका इव। तस्यां रात्रौ राहुवेधं कारयेद्वा सुहृद्वृतः ॥ तत्र दानानि देयानि ब्राह्मणेभ्यो यथाविधि । वस्त्रस्वर्णान्नदानेन षष्ठी मे प्रीयतामिति ॥ प्रभाते दीयते दानं नटनर्त्तकगायकान् । स्त्रियः सभर्त्तृकाः पूज्या वस्त्रालङ्करणादिभिः ॥ प्रथमेऽह्नि तथा षष्ठे दाता नाप्नोति सूतकम्। दानं प्रतिग्रहं तत्र नान्दीश्राद्धं च कारयेत् ॥ अनेन विधिना यस्तु षष्ठीं देवीं प्रपूजयेत्। आयुर्वृद्धिर्भवेत्तस्य सन्ततेरपि पाण्डव ॥ इति श्रीमद्भविष्योत्तरपुराणसंगृहीतषष्ठीपूजाविधिः ॥

नामकर्म्म ।

एकादशे द्वादशकेऽपि घस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात् ॥ सूतकांते चोत्थाप्य एकादशेऽह्नि पिता नाम कुर्यात्। विहितदिना-

न्तरे वा पिता नाम कुर्य्यात्॥प्रथमं पञ्चगव्यप्रोक्षणपूर्वकं सूतिकायै पञ्चगव्यं दत्त्वा कुमारं संस्नाप्य अहतं परिधाप्य कृतस्वस्त्ययनः प्राङ्मुखः सामग्रीं सम्पाद्य गणपत्यादिपञ्चांगदेवतापूजनं विधाय अद्येत्यादि० अमुकशर्म्माऽहं ममास्य जातस्य पुत्रस्यबीजगर्भसमुद्भवैनोनिबर्हणाय नामाख्यसंस्कारं करिष्ये॥आचार्य्यं वृत्वा वेदिकां निर्म्माय कुशैर्हस्तमात्रमितां भूमिं परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रास्तिस्रो रेखा विलिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रस्थमग्निं प्रत्यङ्मुखमुपसमाधायवरणद्रव्यंब्राह्मणंच सम्पूज्य अद्येह कर्त्तव्यनामाख्यसंस्कारकर्म्मणि पञ्चगव्यहोमे कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृत्वा वृतोऽस्मीति प्रतिवचनम्। यथाविहितं कर्म्म कुरु इति यजमानोक्ते करवाणीति ब्राह्मणप्रतिवचनम्। ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्यअग्निं प्रदक्षिणं कारयित्वा ब्राह्मणमुदङ्मुखं तत्रोपवेश्यास्मिन्कर्म्मणि त्वं मे ब्रह्मा भवेत्यभिधाय भवानीति ब्रह्मप्रतिवचनम्॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य।ग्नेरुत्तरतः कुशोपरि निदध्यात् बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणीतापर्य्यन्तम्।परिस्तीर्य्याग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशद्वयं प्रोक्षणीपात्रम् आज्यस्थालीं पञ्चगव्यपात्रम्। सम्मार्जनकुशाः उपयमनकुशाः प्रादेशमितपालाशसमिधस्तिस्रः स्रुवः आज्यं तण्डुलपूर्णपात्रम् एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि। ततः पवित्रच्छेदनकुशैः पवि-

त्रद्वयं छित्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं प्रोक्षणीपात्र सव्यहस्तेन गृहीत्वा दक्षिणानामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम् । ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ तत आज्यस्थाल्यामाज्य निरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ ततस्त्रिः स्रुवप्रतपनं सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्यप्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिःप्रतप्य दक्षिणतो निदध्यात् ॥ तत आज्यमग्नेरवतार्य्याग्रे धृत्वा आज्यस्य प्रोक्षणीवत्रिरुत्पवनं चावेक्ष्य सत्यपद्रव्ये तन्निरसनम् । ततः प्रोक्षण्युत्पवनम् ॥ उत्थायोपययनकुशान् वामहस्ते गृहीत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाऽग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणाजानुः समिद्धतमेऽग्नौ जुहुयात् ।तत्र द्वादशाहुतिपर्य्यंतंतत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्त्तव्यः ॥ प्रजापत्यादिचतुर्णां मंत्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दःप्रजापतीन्द्राग्निसोमा देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये॥ॐइन्द्राय स्वाहा।इदमिन्द्राय॥ॐअग्नये स्वाहा । इदमग्नये ॥ ॐ सोमाय स्वाहा । इदं सोमाय ॥ ततोऽनन्वारब्धेन भूरादिव्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छंदांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा । इदमग्नये॥ॐभुवः स्वाहा। इदं वायवे॥ॐस्वः स्वाहा।इदं सूर्याय॥ पाद्यादिभिः पार्थिवाग्निं सम्पूज्य पञ्चगव्यहोमं कुर्य्यात्॥इरावती

तिवसिष्ठऋषिस्त्रिष्टुप्छन्दो विष्णुर्देवता पञ्चगव्यहोमे विनियोगः॥
ॐइरावतीधेनुमतीहिभूत ँ सूयवासिनीमनवेदशस्या। व्यस्कभ्ना-
रोदसीविष्णवेतेदाधारपृथिवीमभितोमयूखैः स्वाहा॥इदमग्नये॥ इदं
विष्णुरितिमेधातिथिर्ऋषिर्गायत्री छन्दोग्निर्देवता होमे विनियोगः॥
ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम्। समूढमस्यपा ँ सुरेस्वाहा॥
इदं विष्णवे ॥ मानस्तोकेति कुत्स ऋषिर्जगतीछन्दो रुद्रो देवता
होमे विनियोगः ॥ ॐ मानस्तोकेतनयेमानआयुषिमानोगोषुमा-
नोअश्वेषुरीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हविष्मंतः सदमि-
त्वाहवामहेस्वाहा ॥ इदं रुद्राय॥ अत्र प्रणीतोदकस्पर्शो बालक-
स्योपरि। ॐ शन्नोदेवीति दध्यङ्ङाथर्वण ऋषिर्गायत्रीछन्द आपो
देवता होमे विनियोगः॥ ॐ शन्नोदेवीरभिष्टयआपोभवन्तुपीतये
शय्योरभिस्रवन्तुनः स्वाहा । इदमद्भ्यः ॥ ततो गायत्रीमंत्रेण
च। प्रजापतिमंत्रस्य हिरण्यगर्भऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता
होमे विनियोगः ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणि
परितोबभूव।यत्कामास्तेजुहुमस्तन्नोअस्तुवय ँ स्यामपतयोरयीणां
स्वाहा। इदं प्रजापतये ॥ इति पंचगव्यहोमं कृत्वा प्रायश्चित्तहोमं
कुर्य्यात् ॥ त्वन्नो सत्वन्नो मंत्रद्वयस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो-
ग्निवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ॐ त्वन्नोअग्नेवरु-
णस्यविद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः
शोशुचानोविश्वाद्वेषा ँ सि प्रमुमुग्ध्यस्मत्स्वाहा । इदमग्नीवरुणा-
भ्याम् ॥ ॐ सत्वन्नोअग्नेवमो भवोतीनेदिष्ठोअस्याउषसोव्युष्टौ ।
अवयक्ष्वनो वरुण ँ रराणोव्वीहिमृडीक ँ सुहवोनएधिस्वाहा ।
इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्न इति विराड् ऋषिर्गायत्री
छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्य-
नभिशस्तिपाश्चसत्यमित्वमयाअसि । अयानोयज्ञं वहास्ययानो

धेहि भेषज ँ स्वाहा॥इदमग्नये॥यतेशतमिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः॥ॐ येते शतं वरुणये सहस्रं यज्ञियाः पाशावितता महान्तः । तेभिर्नोअद्यसवितोत विष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ॥ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः॥ ॐउदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ँ श्रथाय। अथावयमादित्यव्रते तवानागसोअदितयेस्यामस्वाहा । इदं वरुणायादितये ॥ ॐ प्रजापतये स्वाहा॥इदं प्रजापतये ॥ ॐ अग्नयेस्विष्टकृतेस्वाहेदमग्नयेस्विष्टकृते ॥ संस्रवं प्राश्याचम्य । अद्यनामंकर्म्माङ्गीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ ॐ स्वस्तीति प्रतिवचनम् ॥ सुमित्रियानमंत्रस्य दध्यङ्ङाथर्वण ऋषिरापो देवतानिच्यृत्प्राजापत्यां गायत्रीछन्दःशिरःप्रोक्षणमार्जने विनियोगः ॥ॐ सुमित्रियानआप ओषधयःसन्तु । इतिपवित्रद्वयगृहीतप्रणीताजलेन शिरः सम्प्रोक्ष्य दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यंच वयंद्विष्मः । इत्यैशान्यां प्रणीताविमोकः ॥ ततः परिस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य्य हस्तेनैवजुहुयात्॥देवागात्विति अत्रिर्ऋषिरुष्णिक् छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः॥ ॐदेवागातुविदोगातुंवित्त्वागातुमितमनसस्पतइमंदेवयज्ञ ँ स्वाहावातेधाः स्वाहा ॥ इति बर्हिर्होमः ॥ पूर्णादर्वीति हिरण्यगर्भ ऋषिस्त्रिष्टुप्छन्दःप्रजापतिर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ पूर्णादर्विपरापत सुपूर्णापुनरापत । वस्नेव विक्रीणावहाइष मूर्ज्ज ँ शतक्रतो स्वाहा ॥ इति सफलघृतं हुत्वा ब्राह्मणद्वारा अश्वत्थपत्रेषु पञ्च नामानि लेखयित्वा

तानि नामानि ब्राह्मणस्य शर्म्मान्तं क्षत्रियस्य वर्म्मान्तं वैश्यस्य गुप्तान्तं शूद्रस्य दासान्तम्। अथ च नाम तु द्व्यक्षरं चतुरक्षरं सुखोद्यं नक्षत्रसम्बन्धं कुलसम्बन्धं देवतावाचकं कवर्गादिपञ्चवर्गान्तं हकाराद्यक्षरं वा कृत्प्रत्ययान्तं सार्थकमदीर्घं पुरुषनाम कार्य्यम्॥ स्त्रीनाम तु विषमाक्षरं कार्यम्। ततो नामांकिताश्वत्थपत्राणि शंखे संस्थाप्य सम्पूज्य च प्राङ्मुखस्य बालस्य दक्षिणकर्णे अमुकनामासीति त्रिर्ब्राह्मणद्वारा श्रावयेत्। अथायुर्वेदात्पितृपठनीयो मंत्रः॥ ॐ अङ्गादङ्गात्संभवसिहृदयादधिजायसे। आत्मावैपुत्रनामासिसजीवशरदःशतम्। इति पठित्वा ग्रहनिमित्तदानानि कुर्य्यात्॥ तत आचार्य्यादिदक्षिणादानं मंत्रपाठश्च॥

निष्क्रमणम्।

ततश्चतुर्थे मासि चन्द्रतारानुकूले दिने स्नातः शुचिराचान्तः परिधीतशुक्लद्विवासाः पिता स्नातमलंकृतं शिशुं गृहाद्बहिरानीय ब्राह्मणो वा सूतिकासहितं सूर्य्यमुदीक्षयति॥ तत्रादौ सूर्य्यपूजनम्॥ आकृष्णेति हिरण्यस्तूपऋषिस्त्रिष्टुप्छन्दः सूर्य्यो देवता सूर्य्यावाहने विनियोगः॥ ध्यानम्॥ ॐ पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः। दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः॥ इति ध्यात्वा॥ ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतंमर्त्त्यञ्च। हिरण्ययेन सवितारथेना देवोयातिभुवनानिपश्यन्॥ ॐ भूर्भुवः स्वः सूर्येहागच्छेह तिष्ठ॥ ॐसूर्य्याय नमः पाद्यादिभिः सम्पूज्य फलपुष्पान्वितपयसा सूर्य्यायार्घ्यत्रयं दद्यात॥ ततस्तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरुष्णिक्छन्दः सूर्यो देवता सूर्योदीक्षणे विनियोगः॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत। पश्येम शरदः शतं जीवेम शरदः

शत ँ शृणुयामशरदः शतंप्रब्रवामशरदः शतमदीनाः स्यामशरदः शतं भूयश्च शरदः शतात् ॥ इति सूर्य्यं दृष्ट्वा परिक्रम्य ॥ ॐ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ॥ ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ इति प्रणम्य मंत्रपाठः ॥

अन्नप्राशनम् ।

तच्च षष्ठे मासि चन्द्रतारानुकूले दिवसे स्नातः शुचिराचान्तः शुक्लद्विवासाः पिता गणपत्यादिपंचांगदेवताः सम्पूज्य अद्येत्यादि० अमुकशर्माहं ममास्य पुत्रस्यामुककुमारस्य बैजिकगार्भिकदुरितप्रशमनपूर्वकाङ्गपुष्कलतासिद्ध्येऽन्नप्राशनमहं करिष्ये ॥ सूतिकागृह एव कुशैर्हस्तमात्रमितां भूमिं परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवमूलेनोत्तरोत्तरक्रमेण तिस्रो रेखा विलिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रस्थमग्निं प्रत्यङ्मुखमुपसमाधाय वरणद्रव्यं ब्राह्मणं च सम्पूज्य ॥ अद्येत्यादि० अमुकशर्म्माहं मत्पुत्रस्यान्नप्राशनहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्म कर्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वां वृणे इति ब्रह्माणं वृत्वा वृतोस्मीति प्रतिवचनम् ॥ यथाविहितं कर्म्म कुरु इति कर्त्ता ॥ करवाणीति ब्राह्मणः ॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनमास्तीर्य्य तदुपरि प्रागग्रान् कुशानास्तीर्य्याग्निं प्रदक्षिणं कारयित्वा ब्रह्माणमुदङ्मुख तत्रासन उपवेशयेत्॥अस्मिन्कर्मणि त्वं मे ब्रह्मा भवेति कर्त्ता ॥ भवानीति ब्राह्मणः ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणीताप-

र्य्यन्तंपरिस्तीर्य्याग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशद्वयं प्रोक्षणीपात्रम् आज्यस्थाली चरुस्थाली सम्मार्जनकुशाः पञ्च,उपयमनकुशाः सप्त,पलाशसमिधस्तिस्रः स्रुवः आज्यं तण्डुलपूर्णपात्रं च एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि॥ततः पवित्रच्छेदनकुशैः कुशद्वयं छित्त्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रपवित्रद्वयं गृहीत्वा त्रिरुत्पवनम् प्रोक्षणीपात्र वामहस्तेकृत्वा दक्षिणानामिकाङ्गुष्ठाभ्यां पवित्रद्वयं गृहीत्वा त्रिरुद्दिंगन प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ स्रुवं प्रतप्य सम्मार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात्॥ तत आज्यमग्नेरवतार्य्य पुनःप्रोक्षणीवदुत्पवनं कृत्वापलाशसमिधस्तिस्र उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् मनसा प्रजापतिं ध्यात्वा तूष्णीमग्नौ घृताक्ता जुहुयात्॥ततउपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रद्वयं निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेग्नौ घृताहुतीर्दद्यात् ॥ तत्र प्रथमाहुतिचतुष्टये तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्त्तव्यः ॥ ततः प्रजापत्यादिचतुर्णां मंत्राणां प्रजापतिऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता आज्यहोमे विनियोगः॥ ॐप्रजापतये स्वाहा ॥ इति मनसा ॥ ॐइन्द्राय स्वाहा । इदमिन्द्राय ॥ इत्याघारौ ॥ ॐअग्नये स्वाहा । इदमग्नये॥ॐसोमाय स्वाहा।इदं सोमाय॥इत्याज्यभागौ।ततोनन्वारब्धेनासाधारणसा-

धारणाहुतिद्वयं तत्र पूर्व भूरादिव्याहृतित्रयस्य प्रजापतिर्ऋषिर्गाय-
त्र्युष्णिगनुष्टुप्छन्दांसिअग्निवायुसूर्य्यादेवताव्याहृतिहोमेविनियोगः
ॐभूः स्वाहा।इदमग्नये॥ॐभुवः स्वाहा।इदं वायवे। ॐस्वः स्वाहा।
इदं सूर्य्याय॥इति व्याहृतिहोमः ॥ततः शुचिनामानमग्निं सम्पूज्य
पाद्यादिभिराज्येन जुहुयात् ॥ देवीमिति भार्गवऋषिस्त्रिष्टुप्छन्दो
वाग्देवताज्यहोमे विनियोगः ॥ ॐ देवींवाचमजनयन्तदेवास्तां
विश्वरूपाः पशवो वदन्ति। सानोमन्द्रेषमूर्जंदुहानाधेनुर्वागस्मा-
नुपसुष्टुतैतुस्वाहा। इदं वाचे॥ इति मंत्रेणाहुतिद्वयम्॥वाजोनइति
देवा ऋषयस्त्रिष्टुप्छन्दो वाग्देवताज्यहोमे विनियोगः॥ ॐवाजो
नोअद्यप्रसुवातिदानं वाजोदेवाँ ऋतुभिः कल्पयाति। वाजोहिमा
सर्ववीरंजनानं विश्वाआशावाजपतिर्जयय॑ँ स्वाहा।इदं वाजाय॥
ततस्थालीपाकेन प्राणेनेति चतुर्णांमन्त्राणां प्रजापतिऋषि-
रनुष्टुप्छन्दो लिङ्गोक्ता देवताः स्थालीपाकहोमे विनियोगः॥
ॐप्राणेनान्नमशीयस्वाहा। इदं प्राणाय॥ ॐ अपानेन गन्धमशी-
यस्वाहा। इदमपानाय॥ ॐचक्षुषारूपाण्यशीयस्वाहा। इदं
चक्षुषे॥ॐ श्रोत्रेणयशोशीयस्वाहा। इदं श्रोत्राय॥ ततः
प्रायश्चित्तहोमः॥ त्वन्नोसत्वन्नोमन्त्रयोर्वामदेव ऋषिस्त्रिष्टुप्छन्दो-
ग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः॥ ॐ त्वन्नोअग्नेवरु-
णस्यविद्वान् देवस्यहेडोअवयासिसीष्टाः॥ यजिष्ठोवह्नितमः
शोशुचानोविश्वाद्वेषा॑ँसिप्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्नीवरुणा-
भ्याम्।ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ।अवय
क्ष्वनोवरुण॑ँ रराणोव्वीहि मृडीक॑ँ सुहवोनएधिस्वाहा॥
इदमग्नीवरुणाभ्याम्। अयाश्चाग्नेमन्त्रस्य विराड्ऋषिर्गायत्री
छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः॥ ॐ अयाश्चाग्नेस्यन
भिशस्तिपाश्चसत्यमित्वमयाआसि। अयानो यज्ञंवहास्ययानो-

धेहिभषज ँ स्वाहा । इदमग्नय ॥ येतेशतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो मन्त्रलिङ्गोक्ता देवताःप्रायश्चित्तहोमे विनियोगः । ॐयेते शतंवरुणयेसहस्रंयज्ञियाः पाशाविततामहान्तः । तेभिर्नो अद्यसवितोत विष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ॥ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दोवरुणोदेवता प्रायश्चित्तहोमेविनियोगः।ॐउदुत्तमं वरुणपाशमस्मदवाधमंविमध्यमँश्रथाय। अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा॥ इदं वरुणायादितये ॥ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता स्विष्टकृद्धोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा । इदं प्रजापतये । इति मनसा ॥ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । संस्रव प्राश्याचम्य पूर्णपात्रं सम्पूज्य अद्येत्यादि० अमुककुमारस्यान्नप्राशनाङ्गीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ॐस्वस्तीति प्रतिवचनम् ॥ सुमित्रियान इति दध्यङ्ङाथर्वणऋषिरापोदेवता प्रोक्षणमार्जने विनियोगः ॥ ॐ सुमित्रियानआप ओषधयः सन्तु ॥ पवित्राभ्यां प्रणीताजलेन शिरः सम्मृज्य ॥ दुर्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टियचवयंद्विष्मः ॥ इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्य्यात् ॥ देवागात्विति अत्रिऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः ॥ ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पत इमंदेवयज्ञ ँ स्वाहाव्वातेधाः स्वाहा ॥ इतिबर्हिर्होमः ॥ ततः पूर्णाहुतिहोमः । फलपुष्पसमन्वितघृतेन स्रुवमापूर्य्योत्थाय मूर्धानमिति भरद्वा-

जऋषिस्त्रिष्टुप्छन्दोग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निम्। कविᳪसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः स्वाहा ॥ इति पूर्णाहुतिः ॥ ततो देशाचारात् तल्लग्नसामयिकग्रहप्रीत्यर्थं दानानि कृत्वा पुटपञ्चके षड्रसयुक्तमन्नं संस्थाप्य कुमारपञ्चकाय दद्यात ॥ तत्ररसव्यवस्था ॥ मधुरोऽम्लश्च लवणः कषायस्तिक्त एव च। कटुकश्चेति राजेन्द्र रसषट्कमुदाहृतम् ॥ तत एकस्मिन्नुत्तमे पात्रे षड्रससंयुक्तमन्नं निधाय कृतवस्त्रालङ्कारवेषंकुमारंमातुरङ्केस्थितंस्वर्णशलाकया पिताऽन्यो वा ब्राह्मणो हन्त इति वा वक्ष्यमाणमन्त्रेण प्राशयेत्। पृथक् २ अन्नपतइतिनाभानेदिष्टऋषिर्बृहतीछन्दोन्नदेवताऽन्नप्राशने विनियोगः ॥ ॐअन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणः। प्रप्रदातारंतारिष ऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे इति सर्वा एकीकृत्य प्राशयेत ॥ अथकाम्यमांसव्यवस्था। वाग्वृद्ध्यर्थं भरद्वाजमन्नकामे कपिञ्जलम्। जवेच्छया तु मत्स्यं च ह्यायुःकामे तु गोधिकाम् ॥ ब्रह्मवर्चसकामे तु विप्रोऽजां प्रतियोजयेत्। अभावादुक्तमांसानांत्र्यसारंसर्वसम्मतम् ॥ ततः काम्यमांसं सम्प्राश्य वस्त्रभूषणानि परिधाप्य पुस्तकांगुलीयकादिभिर्देशाचाराज्जीविकां परीक्षेत। त्र्यायुषमिति नारायण ऋषिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरणे विनियोगः। दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषंजमदग्नेरिति ललाटे। कश्यपस्य त्र्यायुषमिति ग्रीवायाम्। यद्देवेषुत्र्यायुषमिति दक्षिणबाहुमूले। तत्तेअस्तु त्र्यायुषमिति हृदि॥ततो दूर्वाक्षतादिदानं ब्राह्मणभोजनं च ॥

कर्णवेधः।

तत्र तृतीये पञ्चमे वा वर्षे सन्नक्षत्रे पूर्वाह्णे पिता पंचांगपूजां विधाय त्रीन् ब्राह्मणान् भोजयित्वा अद्येत्यादि॰ अमुकशर्म्माहं

ममास्य पुत्रस्य बीजगर्भसमुद्भवैनोनिबर्हणाय सुखसौभाग्यप्राप्तये कर्णवेधकर्म्म करिष्ये ॥ केचिद्देशाचारतोऽत्र जले केशवहरगोगुरु-पूजनमपि कुर्वन्ति । ततो मधुरान्नं कुमारस्य मुखे दत्त्वा स्वर्णकार-द्वारा मध्यं वीक्ष्य स्वर्णसूच्या दक्षिणकर्णं वेधयेत् ॥ भद्रंकर्णेभिरिति गौतमऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता दक्षिणकर्णाभिमन्त्रणे विनियोगः ॥ ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्ष-भिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ꣳसस्तनूभिर्व्यशेमहिदेवहितं यदा-युः ॥ ततो वामकर्णंवेधयेत् ॥ वक्ष्यन्तीति मन्त्रस्य पायुर्ऋषिस्त्रिष्टु-प्छन्दो लिङ्गोक्ता देवता वामकर्णाभिमन्त्रणे विनियोगः ॥ ॐवक्ष्य-न्तीवेदागनीगन्तिकर्णं प्रिय ꣳसखायंपरिषस्वजाना । योषेवशिङ्क्ते विततावधिधन्वन्ज्याइय ꣳसमनेपारयन्ती । स्वर्णकारं सन्तोष्य ब्राह्मणभोजनं भूयसीं कृत्वा दूर्वाक्षतादिग्रहणं देवताविसर्जनं च विधेयम् ॥

अक्षरारम्भः ।

पञ्चमाब्दे विहितपंचांगशुद्धदिने गणपतिविष्णुवाग्रमासम्पूज-नपूर्वको लिपिग्रहः शुभः । सामग्रीं सम्पाद्य कृतोद्वर्त्तनः शुभाहत-वासाः शिशुः भूतशुद्धिमासनशुद्धिं दीपपूजनं च विधाय गणेशं नत्वा शान्तिस्तवं पाठयित्वा स्वयं संकल्पं कुर्य्यात् ॥ अद्ये-त्यादि० अमुकोऽहं मम श्रीपरमात्मकप्रणवसिद्धिद्वारा बालवै-मत्यकृतसमस्तवाङ्मालिन्यादिदोषपरिहारार्थं श्रीसरस्वतीप्रसा-दात्समस्तागमान्तर्गतविविधज्ञानप्राप्तये श्रीकुलपरम्परागतगुरुद्वा-राक्षरस्वीकारकर्म करिष्ये ॥ तदंगतया गणपतिवरुणविष्णुलक्ष्मी-सरस्वतीपूजनं च करिष्ये ॥ गणानान्त्वेति गणपं तत्त्वायामीति वारुणम् । इदंविष्णुरितिविष्णुं श्रीश्चतेतिरमां तथा ॥ सरस्वती-तिसुमृदि ब्राह्मीं सम्पूजयेन्मुदा ॥ ततः सरस्वतीतिप्रजापतिर्ऋषि-

जंगतीछन्दः सरस्वती देवता सरस्वत्यावाहने विनियोगः ॥ ध्यानम् ॥ वीणापुस्तकमालाभयकरा श्वेतवर्णिका । शुभ्राम्बरा विशालाक्षी कर्त्तव्यात्र सरस्वती ॥ आवाहनम्—आवाहयाम्यहं देवीं कुन्देन्दुधवलद्युतिम् । सरस्वतीं भव्यरूपां वाङ्मालिन्यहरां शुभाम् ॥ ऋक्—ॐ सरस्वतीयोन्यांगर्भमन्तरश्विभ्यांपत्नीसुकृतं बिभर्त्ति । अपाᳬरसेनवरुणेनसामेनेन्द्रᳬश्रियैजनयन्नप्सुराजा॥१॥ ॐयांमेधांदेवगणाःपितरश्चोपासते । तयामामद्यमेधयाग्नेमेधाविनं कुरु ॥ २ ॥ ॐ भूर्भुवः स्वः भोः सरस्वतीहागच्छेति सरस्वत्यै नमः सम्पूज्य प्रार्थयेत् ॥ सरस्वति महादेवि ज्ञानमार्गप्रदर्शिनि । ज्ञानवन्तं कुरुष्व त्वमविलम्बेन सर्वतः ॥ ततो गुरुवरणम् ॥ पाद्यादीनि समर्प्पयामि वरणद्रव्याय नमः सम्पूज्य ब्राह्मणाय नमः सम्पूज्य ॥ अद्येत्यादि० अमुकोऽहं मम वाङ्मालिन्यादिसमस्त-दोषपरिहारार्थं सद्बुद्धिविद्यालब्धये अक्षरारम्भकर्मकर्त्तुमनेन वरणद्रव्येणाग्न्यादिदैवतेनामुकगोत्रममुकशर्म्माणमक्षरारम्भगुरुत्वे-न त्वां वृणे ॥ वृतोऽस्मीति प्रतिवचनम् ॥ ततो गुरुवन्दनम् ॥ ॐअज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ततः सरस्वतीवन्दनं च ॥ ॐसरस्वति नमस्तुभ्यं वरदे कामरूपिणि । विश्वरूपे विशालाक्षि विद्यां देहि शुभप्रदे ॥ ततो गुरुः स्वयमुत्तरमुखः काष्ठपट्टिकायां सरस्वती-यन्त्रलिखनपूर्वकं सुवर्णशलाकया वर्णान् लिखित्वा पूर्वमुखं बालकं पाठयेत् ॥ तत्र वर्णाः ॥ ॐ नमः सिद्धम् ॥ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ॥ क ख ग घ ङ ॥ च छ ज झ ञ ॥ ट ठ ड ढ ण ॥ त थ द ध न ॥ प फ ब भ म ॥ य र ल व श ष स ह इति बालको वारत्रयं पठित्वा गुरवे दक्षिणां दद्यात् ॥ पाद्यादीनि समर्प्पयामि दक्षिणाद्रव्याय नमः गुरवे नमः

सम्पूज्य ॥ अद्येत्यादि० अमुकगोत्रोऽमुकराशिरमुकबालकोऽहं मम वाङ्मालिन्यादिदोषपरिहारपूर्वकमक्षरारम्भकर्म्मणः साङ्गत्वसिद्ध्ये तद्दक्षिणार्थमिदं द्रव्यमग्न्यादिदैवतं गुरवे तुभ्यमहं सम्प्रददे ॥ ततो मन्त्रपाठः ॥

विद्यारम्भः ।

पूर्वोक्तदेवताःसम्पूज्य गुरुं वृत्वा पूर्वमुखो विद्यारंभं कुर्य्यात् । ॐअखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥वृद्धिरादैच् ॥ वागर्थाविव ॥ कूजन्तम् ॥ यस्य ज्ञानदयासिन्धोः ॥ गौरीश्रवःकेतकपत्रभंगम् ॥ गुरुमुखाच्छ्रुत्वा पठेत् । दक्षिणादानं तिलकमन्त्रपाठग्रहणम् । मण्डपनिर्म्माणम् ॥ उक्तः सद्व्रतबन्धने मुनिवरैः सन्मण्डपः सर्वदा हस्तैः षोडशभिर्मितस्तदुदरे वेदी तृतीयशके ॥ कार्योच्चाहिसपादहस्तसमिता सर्वत्र भद्रप्रदा ब्रह्मादित्रिदशार्चनार्थमभितो वस्त्रादिभिःशोभिता॥कार्या विद्वद्भिरेव ग्रहयजनविधौ वेदिकेशानभागे दक्षे वास्त्वर्चनादेस्तदनु मखविधौ पश्चिमायां सदैव ॥ चूडाकर्म्मोपनायश्रुतिपठनसमावर्त्तनादावुदीच्यां पूर्वे लम्बोदरादेरुपचितिरुदिता मध्यके भद्रकस्य॥ विवाहे तु कन्याहस्तात्सूर्य्यहस्तात्मको मण्डप इष्यते ॥ तदभावे तु दिग्घस्तो विवाहे वेधविच्युतः॥हस्तोच्छ्राया वेदहस्तैः समन्तात्तुल्या वेदी सद्मनो वामभागे॥युग्मे घस्रे षष्ठहीने च पञ्चसप्ताहे स्यान्मण्डपोद्वासनं सत्॥ ईशानीमारभ्य गर्तेषु तुंगान् स्थूणाकेतून् वैजयन्तीभिराढ्यान् ॥ रम्भास्तम्भान् षोडशारोपयेद्वा वैतानैर्वा द्वाभिरम्भोघटैश्च ॥

स्तम्भपूजनम् ।

अद्येत्यादि० अमुकशर्म्माहं ममैतस्य पुत्रस्यामुककुमारस्य बीजगर्भसमुद्भवैनो निबर्हणपूर्वकब्रह्मवर्चोभिवृद्ध्ये करिष्यमाण-

चूडोपनयनवेदारम्भसमावर्तनकर्म्मसु तदुपयोग्यायुतात्मकग्रहम-
खमण्डपे पूर्वाङ्गतया वरुणविधिना षोडशवरुणपूजनपूर्वकं
सस्थूणाशक्तिनागमातृकब्रह्मादिषोडशकदलीमयस्तम्भपूजनं करि-
ष्ये। अन्तरीशाने पूर्वं वरुणं सम्पूज्य ब्रह्मजज्ञानमिति गोतम
ऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता ब्रह्मावाहने विनियोगः। आवा-
हनम्। एह्येहि विप्रेन्द्र पितामहेश हंसाधिरूढ त्रिदशैकवन्द्य॥
श्वेतोत्पलाभास कुशाम्बुहस्त गृहाण पूजां भगवन्नमस्ते॥ ऋक्-
ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः।
सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः।
ॐ भूर्भुवः स्वः ब्रह्मदैवतसंज्ञकस्तम्भेहागच्छेति सस्थूणनागमा-
तृकाय ब्रह्मदैवतसंज्ञकस्तम्भाय नमः। पाद्यादिभिः सम्पूज्य
प्रार्थयेत्। कृष्णाम्बराजिनधर पद्मासन चतुर्मुख॥ जटाधर
जगद्धातः प्रसीद कमलोद्भव॥ ॐ सावित्र्यैनमः। ब्राह्मयै
नमः।गंयायै नमः। सम्पूज्य स्तम्भमालभ्य ॐऊर्द्धऊषुण ऊतये
तिष्ठादेवोनः सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वा-
घद्भिर्विह्वयामहे।स्तम्भशिरसि नागमात्रे नमःसम्पूज्य शाखां बद्धा।
ॐ आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः।
क्षमापणम्। ॐयतो यतः समीहसे ततो नो अभयं कुरु।शन्नः
कुरु प्रजाभ्योऽभयं नः पशुभ्यः। ॐ वनस्पतिसमुद्भूतो निर्मितो
विश्वकर्म्मणा॥ स्थिरो भवतु रक्षार्थं यावत्कार्यं समाप्यते। एवं
सर्वत्र बोध्यम्। अन्तराग्नेये इदं विष्णुरिति मेधातिथिऋषि-
र्गायत्री छन्दो विष्णुर्देवता विष्णुवाहने विनियोगः।
आवाहनम्। एह्येहि नारायण द्विव्यमूर्त्ते सर्वामरैरर्चितपादपद्म॥
शुभाशुभानन्दशुचामधीश गृहाण पूजां भगवन्नमस्ते॥ ऋक्
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य

पा ᳪ सुरे ॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छेति विष्णवे नमः सम्पूज्य प्रार्थयेत् । देवदेव जगन्नाथ विष्णो यज्ञपते विभो ॥ पाहि दुःखाम्बुधेरस्मान्भक्तानुग्रहकारक । ॐ लक्ष्म्यै नमः । नन्दायै नमः । वैष्णव्यै नमः। सम्पूज्य ऊर्ध्व इत्यादिशेषं पूर्ववत् । नैर्ऋत्ये नमस्त इति परमेष्ठी ऋषिर्गायत्री छन्दो रुद्रो देवता रुद्रावाहने विनियोगः । आवाहनम् । एह्येहि गौरीश पिनाकपाणे शशांकमौले वृषभाधिरूढ । देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥ ऋक् । ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः। बाहुभ्यामुतते नमः॥ ॐ भूर्भुवः स्वः रुद्रेहागच्छेति रुद्राय नमः। सम्पूज्य प्रार्थयेत् । पंचवक्त्र वृषारूढ त्रिलोचन सदाशिव । चन्द्रमौल महादेव मम स्वस्तिकरो भव ॥ ॐ माहेश्वर्यै नमः । गौर्यै नमः । शोभनायै नमः।सम्पूज्य ऊर्ध्वइत्यादि शेषं पूर्ववत्।वायव्ये त्रातारमिति गर्गऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवतेन्द्रावाहने विनियोगः आवाहनम् । एह्येहि वृत्रघ्न गजाधिरूढ सहस्रनेत्र त्रिदशैकवन्द्य ॥ शचीपते शक्र सुरेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥ ऋक् ॐ त्रातारमिन्द्रमवितारमिन्द्र ᳪ हव हवे सुहव ᳪ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ᳪ स्वस्तिनो मघवा धात्विन्द्रः॥ ॐ भूर्भुवः स्वः इन्द्रेहागच्छेति॰इन्द्राय नमः सम्पूज्य प्रार्थयेत् । देवराज गजारूढ पुरन्दर शतक्रतो । वज्रहस्त महाबाहो वांछितार्थप्रदो भव ॥ ॐ इन्द्राण्यै नमः । आनन्दायै नमः । विभूत्यै नमः । सम्पूज्य ऊर्ध्वइत्यादिशेषं पूर्ववत् । बहिरीशाने चित्रमिति कुत्सऋषिर्विराट् छन्दः सूर्य्यो देवता सूर्य्यावाहने विनियोगः। आवाहनम् । एह्येहि सताश्व सहस्रभानो सिन्दूरवर्णप्रतिमावभासच्छायापते सूर्य्यदिनेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥ ऋक् ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्ष ᳪ

सूर्य्य आत्मा जगतस्तस्थुषश्च ॥ ॐ भूर्भुवः स्वः सूर्य्येहागच्छेति सूर्य्याय नमः सम्पूज्य प्रार्थयेत् । पद्महस्त रथारूढ पद्मासन सुमङ्गल । क्षमां कुरु दयालो त्वं ग्रहराज नमोऽस्तु ते ॥ ॐ सावित्र्यै नमः । मङ्गलायै नमः । भूत्यै नमः । सम्पूज्य ऊर्ध्व इत्यादिशेषं पूर्ववत् । ईशानपूर्वमध्य गणानान्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गणपतिर्देवता गणपत्यावाहने विनियोगः । आवाहनम् । एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष । माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन्नमस्ते ॥ ऋक् ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे वसो मम। आहमजानि गर्भधमात्त्वमजासि गर्भधम् ॥ ॐ भूर्भुवः स्वः गणपते इहागच्छेति गणपतये नमः सम्पूज्य प्रार्थयेत्।लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय । अविघ्नं कुरु मे देव सर्वकार्य्येषु सर्वदा ॥ ॐ विघ्नहारिण्यै नमः।जयायै नमः।सरस्वत्यै नमः।सम्पूज्य ऊर्ध्वइत्यादिशेषं पूर्ववत् । पूर्वाग्नेयमध्ये नमोस्त्विति देवश्रवा ऋषिस्त्रिष्टुप्छन्दोऽनन्तो देवताऽनन्तावाहने विनियोगः । ध्यानम् । एह्येहि नागेन्द्र धरामरेश नागाङ्गनाकिन्नरगीयमान । अनन्तयक्षोरगलोकसंघैर्गृहाण पूजां भगवन्नमस्ते॥ऋक् । ॐ नमोस्तु सर्प्पेभ्यो येके च पृथिवीमनु। ये अन्तरिक्षे येदिवि तेभ्यः सर्प्पेभ्यो नमः॥ॐ भूर्भुवः स्वः अनन्तेहागच्छेति अनन्ताय नमः सम्पूज्य । आशीविषसमोपेत नागकन्याविराजित । पाहि यज्ञमिमं देव फणासप्तकमण्डित ॥ ॐ अधरायै नमः । पद्माय नमः । महापद्मायै नमः । सपूज्य ऊर्ध्वइत्यादिशेषं पूर्ववत् । बाह्याग्नेये यदक्रन्द इति भार्गवजमदग्निदीर्घतमस ऋषयस्त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः । आवाहनम् । एह्येहि गौरीसुत देवदेव

षट्कृत्तिकारक्षितदेहयष्टे । मयूरवाह प्रणतार्त्तिहारिन् गृहाण पूजां भगवन्नमस्ते ॥ ऋक् ॐ यदक्रन्दः प्रथमं जायमान उद्यत्स-मुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं ते अर्वन् ॥ ॐ भूर्भुवः स्वः स्कन्देहागच्छेति स्कन्दाय नमः । सम्पूज्य प्रार्थयेत्।मयूरवाहन स्कन्द गौरीसुत षडानन । कार्त्तिकेय महाबाहो दयां कुरु दयानिधे ॥ ॐ जयायै नमः । विजयायै नमः । पश्चिमसन्ध्यायै नमः । सम्पूज्य ऊर्ध्वइत्यादि शेषं पूर्ववत् । आग्नेयदक्षिणमध्ये यमाय त्वेति दध्य-ङ्ङाथर्वणऋषिर्यजुश्छन्दो यमो देवता यमावाहने विनियोगः । आवाहनम् । एह्येहि वैवस्वत धर्म्मराज सर्वामरैरर्चितध-र्म्ममूर्ते ॥ विशालवक्षःस्थल रुद्ररूप गृहाण पूजां भगव-न्नमस्ते ॥ ऋक्।ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तुः पृथिव्याः सᳬ स्पृशस्पाहि अर्चि-रसि शोचिरसि तपोसि ॥ ॐ भूर्भुवः स्वः यमेहागच्छेति यमाय नमःसम्पूज्य प्रार्थयेत् । धर्म्मराज महाकाय दण्डहस्त वरप्रद । रक्तेक्षण महाबाहो पाहि यज्ञं नमोस्तु ते । ॐ पूर्वसन्ध्यायै नमः क्रूरायै नमः । नियन्त्र्यै नमः ।सम्पूज्य ऊर्ध्व इत्यादि शेषं पूर्ववत् । दक्षिणनैर्ऋत्यमध्ये वायुरिति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो वायु-र्देवता वाय्वावाहने विनियोगः । आवाहनम् । एह्यहि वायो मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः । प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते ॥ ऋक् । ॐ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञं शिवो नियुद्भिः शिवाभिः ॥ ॐ भूर्भुवः स्वः वायो इहागच्छेति वायवे नमः सम्पूज्य प्रार्थयेत्।नमो धरणिपृष्ठ-स्थ ध्वजधारिन्समीरण । पाहि यज्ञमिमं देव प्रसन्नो भव मे सदा ॥ ॐ तीव्रायै नमः । गायत्र्यै नमः । वायव्यै नमः । सम्पूज्य ऊर्ध्व

इत्यादिशेषं पूर्ववत् । नैर्ऋत्ये सोममिति बन्धुर्ऋषिर्गायत्री छन्दः सोमो देवता सोमावाहने विनियोगः । आवाहनम् । एह्येहि सोमाध्वरदेवदेव विधत्स्व रक्षां भगणेन सार्धम् ॥ यागस्य सर्वौषधिपितृयुक्त गृहाण पूजां भगवन्नमस्ते ॥ ऋक् । ॐ सोमꣳराजानं साग्निमन्वारमाहवे । आदित्यान् विष्णुꣳ सूर्य्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥ ॐ भूर्भुवः स्वः सोमेहागच्छेति सोमाय नमः । सम्पूज्य प्रार्थयेत् । क्षीरार्णवसमुद्भूत द्विजराज सुधाकर । सोम त्वं सौम्यभावेन ग्रहपीडां निराकुरु ॥ ॐ सावित्र्य नमः । अमृतकलायै नमः । विजयायै नमः । सम्पूज्य ऊर्ध्व इत्यादिशेषं पूर्ववत् । पश्चिमनैर्ऋत्योर्मध्ये इमं मे वरुणेति वत्सऋषिर्बृहती छन्दो वरुणो देवता वरुणावाहने विनियोगः । आवाहनम् । एह्येहि यादोगणवारिधीश पर्जन्यदेवाप्सरसां गणेन। विद्याधरेन्द्रामरगीयमान गृहाण पूजां भगवन्नमस्ते ॥ ऋक् । ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके । ॐ भूर्भुवः स्वः वरुणेहागच्छेति वरुणाय नमः । सम्पूज्य प्रार्थयेत् । शंखस्फटिकवर्णाभ श्वेतहाराम्बरावृत । पाशहस्त महाबाहो वरुण त्वं दयां कुरु ॥ ॐ वारुण्यै नमः । बार्हस्पत्यै नमः । पाशधारिण्यै नमः । सम्पूज्य ऊर्ध्व इत्यादिशेषं पूर्ववत् । पश्चिमवायव्यमध्ये सुगाव इति वसिष्ठऋषिर्गायत्रीछन्दो वसुर्देवता वस्वावाहने विनियोगः । आवाहनम् । एह्येहि देवेश्वर दिव्यदेह वसो प्रसन्नात्महृगष्टमूर्त्ते । ममास्य यागस्य सुरक्षणार्थं गृहाण पूजां भगवन्नमस्ते ॥ ऋक् । ॐ सुगावो देवाः सदना अकर्म्म य आजग्मेदꣳ सवं तं जुषाणाः।भरमाणा ह मानाहविꣳष्यस्मै धत्त वसवो वसूनि स्वाहा । ॐ भूर्भुवः स्वः वसो इहागच्छेति वसवे नमः सम्पूज्य प्रार्थयेत् । दिव्यवस्त्राष्टमूर्त्ते त्वं दिव्यदेहधर

प्रभो। पाहि यज्ञमिमं सर्वं वरद त्वां नमाम्यहम् ॥ ॐ विनतायै नमः ॥ गरिमायै नमः। सम्भूत्यै नमः। सम्पूज्य ऊर्ध्वं इत्यादि- शेषं पूर्ववत्। वायव्ये सोमो धेनुमिति गोतमऋषिस्त्रिष्टुप्छन्दो धनदो देवता धनदावाहने विनियोगः। आवाहनम्। एह्येहि रक्षोगणनायक त्वं विशालवेतालपिशाचसंघैः। ममाध्वरं पाहि कुबेरदेव गृहाण पूजां भगवन्नमस्ते ॥ ऋक्। ॐ सोमोधनुꣳसोमो अर्वन्तमाशुꣳसोमो वीरं कर्म्मण्यं ददाति। सादन्यंविदथ्यꣳसभेयं पितृश्रवणं यो ददाशदस्मै ॥ ॐ भूर्भुवः स्वः धनदेहागच्छेति धनदाय नमः सम्पूज्य प्रार्थयेत्। दिव्यदेह धनाध्यक्ष पीतहाराम्ब- रावृत। उत्तरेश महाबाहो वाञ्छितार्थप्रदो भव ॥ ॐ अदित्यै नमः। सिनीवाल्यै नमः। लघिमायै नमः। सम्पूज्य ऊर्ध्वं इत्यादि सर्वं पूर्ववत्। उत्तरवायव्यमध्ये बृहस्पत इति गृत्समदऋषि- स्त्रिष्टुप्छन्दो बृहस्पतिर्देवता बृहस्पत्यावाहने विनियोगः। आवा- हनम्। एह्येति देवेन्द्रगुरो मखेश बृहस्पते यज्ञपते सुयागे। रक्षार्थमत्रोपविशानुकम्पिन् गृहाण पूजां भगवन्नमस्ते ॥ ऋक्। ॐ बृहस्पते अति यदर्य्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दी- दयच्छवसऋतप्रजा ततदस्मासु द्रविणं धेहि चित्रम् ॥ ॐ भूर्भुवः स्वः बृहस्पते इहागच्छेति० बृहस्पतये नमः। सम्पूज्य प्रार्थयेत्। देवाचार्य्य यथाशक्त्या पूजितोऽसि मया मुदा। क्रूरग्रहोपशान्तिं त्वं कुरु नित्यं नमोऽस्तु ते ॥ ॐ पौर्णमास्यै नमः। वेदमात्रे नमः। सन्नत्यै नमः। सम्पूज्य ऊर्ध्वेइत्यादि शेषं पूर्ववत्। उत्तरेशानयोर्म- ध्ये विश्वकर्म्मन्निति शासऋषिस्त्रिष्टुप्छन्दो विश्वकर्म्मा देवता विश्व- कर्म्मावाहने विनियोगः। आवाहनम्। एह्येहि शिल्पीश्वर विश्वकर्म्मन् मूर्त्यादिनिर्म्माणकरैकमुख्य। दोर्दण्डसंशाधितसर्वशिल्प गृहाण पूजां भगवन्नमस्ते ॥ ऋक्। ॐ विश्वकर्म्मन् हविषा वर्धनेन त्रातारमि-

न्द्रमकृष्णोरखध्यम्।तस्मैविशःसमनमन्तपूर्वीरयमुग्रोविहव्यो यथा सत्।ॐभूर्भुवः स्वः विश्वकर्म्मन्निहागच्छेतिविश्वकर्म्मणे नमः।सम्पूज्य प्रार्थयेत् । विश्वकर्म्मन् प्रसीद त्वं शिल्पशास्त्रविशारद । दण्डपाणे महाबाहो तेजोमूर्त्तिधर प्रभो ॥ॐ वास्तुदेवतायै नमः । वैश्वकर्म्मिण्यै नमः। शारदायै नमः । सम्पूज्य ऊर्ध्वइत्यादिशेषं पूर्ववत्। प्रार्थयेत् । जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ ततो दधिमाषभक्तबलिदानम् । बहिः पूर्वे । त्रातारमिति गर्गऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् । त्रातारमिन्द्रमवितारमिन्द्र ँ हवेहवे सुहव ँ शूरमिन्द्रम् ।ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः ॥ ॐ भूर्भुवः स्वः इन्द्रेहागच्छेति इन्द्राय नमः सदीपदधिमाषभक्तबलये नमः सम्पूज्य जलं तत्र त्यजेत् । दधिमाषौदनैर्युक्त सदीपं बलिमुत्तमम् । सर्वविघ्नप्रणाशाय गृहाणेन्द्र वरप्रद ॥ मण्डले सम्प्रवक्ष्यामि मया भक्त्या निवेदितम् । इदमर्घ्यमिदं पाद्यं दीपोऽयं प्रतिगृह्यताम् ॥ अग्नये त्वन्नो अग्न इति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता सदीपदधिमाषभक्तबलिदाने विनियोगः ।ऋक् ।ॐ त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ँसि प्रमुमुग्ध्यस्मत्स्वाहा। ॐभूर्भुवः स्वः अग्ने इहागच्छेति अग्नये नमः । सदीपदधिमाषभक्तबलये नमः । सम्पूज्य जलं तत्र त्यजेत्।दधिमाषौदनैर्युक्तं सदीपं बलिमुत्तमम् । गृहाणाग्ने महाबाहो रक्षोविघ्नं प्रणाशय ॥ मण्डलेति पूर्ववत्।दक्षिणे असीति जमदग्निर्ऋषिस्त्रिष्टुप्छन्दो यमो देवता सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् । ॐ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त

आहुस्ते त्रीणि दिवि बन्धनानि स्वाहा ॐ भूर्भुवः स्वः यमेहा-
गच्छेति यमाय नमः सदीपदधिमाषभक्तबलये नमः. । सम्पूज्य
जल तत्र त्यजेत् । दधिमाषौदनैर्युक्तं सदीपं बलिमुत्तमम् ।
यमराज गृहाण त्वं सर्वदोष निवारय ॥ मण्डलेति पूर्ववत् ।
नैर्ऋत्ये असुन्वन्तमिति विवस्वानृषिस्त्रिष्टुप्छन्दो निर्ऋतिर्देवता
सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् ।ॐ असुन्वन्तमय-
जमानमिच्छस्तेनस्यन्यातस्करस्यान्वेंषित। अन्यमस्मदिच्छसात
इत्यानमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भूर्भुवः स्वः निर्ऋते
इहागच्छेति निर्ऋतये नमः । सदीपदधिमाषभक्तबलय नमः
सम्पूज्य जलं तत्र त्यजेत्। दधिमाषौदनैर्युक्तं सदीप बलिमुत्तमम्।
गृहाण निर्ऋते देव सर्वान्दोषान्निवारय ॥ मण्डलेति पूर्ववत् ।
पश्चिमे तत्त्वायामीति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो
देवता सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् ॐ तत्त्वा-
यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेड-
मानो वरुणेहबोध्युरुशꣳ समान आयुः प्रमोषीः । ॐ भूर्भुवः
स्वः वरुणेहागच्छेति वरुणाय नमः । सदीपदधिमाषभक्त-
बलये नमः । सम्पूज्य जलं तत्र त्यजेत । दधिमाषो-
दनैर्युक्तं सदीपं बलिमुत्तमम् । गृहाण देव वरुण रक्षो-
विघ्नं प्रणाशय ॥ मण्डलेति पूर्ववत । वायव्य आनोनियुद्भि-
रिति वसिष्ठऋषिस्त्रिष्टुप्छन्दो वायुर्देवता सदीपदधिमाषभक्तबलि-
दाने विनियोगः । ऋक् । ॐ आनो नियुद्भिः शतिनीभिरध्वरꣳ
सहस्रिणीभिरुपयाहि यज्ञम् । वायो अस्मिन्सदने मादयस्व
यूयं पातः स्वस्तिभिः सदा नः। ॐ भूर्भुवः स्वः वायो इहागच्छेति
वायवे नमः । सदीपदधिमाषभक्तबलये नमः । सम्पूज्य जलं
तत्र त्यजेत । दधिमाषौदनैयुक्तं सदीपं बलिमुत्तमम् । गृहाण

वायो देवेश सर्वव्याधिक्षयं कुरु ॥ मण्डलेति पूर्ववत् । उत्तरे वयमिति बन्धुऋषिस्त्रिष्टुप्छन्दःसोमो देवता सदीपदधिमाषभक्त-बलिदाने विनियोगः । ऋक् ॐ वय ँ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि । ॐ भूर्भुवः स्वः सोमेहागच्छेति सोमाय नमः । सदीपदधिमाषभक्तबलये नमः । सम्पूज्य जलं तत्र त्यजेत् । दधिमाषौदनैर्युक्तं सदीपं बलिमुत्तमम् । गृहाण सोम ऋक्षेश मम शान्तिकरो भव ॥ मण्डलेति पूर्ववत् । ईशाने ईशावास्यमिति गौतम ऋषिर्जगतीछन्द ईशानो देवता सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् ॐ ईशावास्य-मिदँ सर्वं यत्किञ्चिज्जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम् ।ॐ भूर्भुवः स्वः ईशानेहागच्छेति ईशानाय नमः। सदीपदधिमाषभक्तबलये नमः ।सम्पूज्य जलं तत्र त्यजेत् । दधिम-षौदनैर्युक्तं सदीपं बलिमुत्तमम् । गृहाणेशान सर्वज्ञ सर्वशत्रुक्षयं कुरु । मण्डलेति पूर्ववत् । ईशानपूर्वमध्ये आयंगौरिति सूर्य्य ऋषिर्गायत्रीछन्दोऽनन्तो देवता सदीपदधिमाषभक्तबलिदाने विनियोगः । ऋक् ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः । ॐभूर्भुवः स्वः अनन्तेहागच्छेति अनन्ताय नमः । सदीपदधिमाषभक्तबलये नमः।सम्पूज्य जलं तत्र त्यजेत्। दधिमाषौदनैर्युक्तं सदीपं बलिमुत्तमम् । गृहाणानन्त नागेन्द्र सर्वान्विघ्नान् प्रणाशय॥मण्डलेति पूर्ववत् । नैर्ऋत्यपश्चिममध्ये ब्रह्मजज्ञानमिति गौतम ऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता सदीपदधि-माषभक्तबलिदाने विनियोगः।ऋक् ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ता द्विसीमतःसुरुचो वेन आवः।सुबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः।ॐ भूर्भुवःस्वः ब्रह्मन्निहागच्छेति ब्रह्मणे नमः। सदीपदधिमाषभक्तबलये नमः । सम्पूज्य जलं तत्र त्यजेत् ।

दधिमाषौदनैर्युक्तं सदीपं बलिमुत्तमम्। गृहाण ब्रह्मन् देवेश सर्वसौख्यं विवर्धय ॥ मण्डलेति पूर्ववत्। मण्डपाद्बहिर्दक्षिणे सदीपदधिमाषभक्तसिन्दूरकज्जलरक्तपुष्पं पक्वान्नकुंकुमबलिं सोपायनं निधाय। नहिस्पशमितिविश्वामित्रऋषिस्त्रिष्टुप्छन्दः क्षेत्रपालो देवता बलिदाने विनियोगः। ऋक् ॐ नहिस्पशमविदं नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः।एमेनमवृधन्नमृता अमर्त्त्यम्। वैश्वानरं क्षेत्रजित्याय देवाः॥ ॐ भूर्भुवः स्वः क्षेत्रपालेहागच्छेति क्षत्रपालाय नमः। बलये नमः। सम्पूज्य जलं तत्र त्यजेत्। दधिपाषौदनैर्युक्तं सदीपं बलिमुत्तमम्। गृहाण त्वं क्षत्रपाल रक्षोविघ्नं प्रणाशय॥ ततो दुर्बलं ब्राह्मणं सम्पूज्य तस्मै बलिं दत्त्वा प्रार्थयेत्।भ्राजद्वक्रजटाधरं त्रियनयनं नीलाञ्जनाद्रिप्रभं दोर्दण्डान्तगदाकपालमरुणं स्रग्गन्धवस्त्रावृतम्। घण्टाघुर्घुरुमेखलाध्वनिमिलद्धुंकारभीमं प्रभुं वन्दे संहितसर्प्पकुण्डलधरं श्रीक्षेत्रपालं सदा॥ नमस्कारः। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे॥


अग्न्युत्तारणम्।

स्वर्णकारकृतटंकाद्याघातदोषपरिहारार्थं दधिदुग्धजलधाराभिः प्रतिमाशुद्धताविधायकं स्नानमभिहितम्। तत्र मन्त्राः। ॐ समुद्रस्य त्वावकयाग्ने परिव्ययामसि। पावको अस्मभ्यꣳशिवो भव॥हिमस्य त्वा जरायुणाग्ने परिव्यामसि। पावको अस्मभ्यꣳ शिवो भव॥ उपज्मन्नुपवेतसेवतरनदीष्वा। अग्ने पित्तमपामसि। मण्डूकिताभिरागहि सेमन्नो यज्ञम्। पावक वणꣳ शिवं कृधि॥ अपामिदं न्ययनꣳ समुद्रस्य निवेशनम्। अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव॥ अग्ने पावक रोचिषा मन्द्रया देवजिह्वया।आदेवान्वक्षि यक्षि च॥ स नः पावक

दीदिवोग्ने देवाँइहावह । उपयज्ञ ँ हविश्च नः ॥ पावकयायश्चित-यन्त्या कृपा।क्षामन्नुरुच उषसो न भानुना। तूर्वन्नयामन्नेतशस्य नूरण आयो घृण । न तत्तृषाणो अजरः ॥ नमस्ते हरसे शोचिष नमस्ते अस्त्वर्चिष । अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ँ शिवो भव ॥

ग्रहयागः ।

कुण्डस्येशानदिग्भागे वेदिका हस्तमात्रका । चतुरस्रा द्व्यं-गुलोच्चा समन्ताच्च तदूर्ध्वतः ॥ द्विद्व्यंगुलायामहीने वेद्यौद्विद्व्यं-गुलोच्छ्रिते । तदूर्ध्वं द्व्यंगुलायामहीना सूर्य्यांगुलोच्छ्रिता ॥ भित्त्याख्या वेदिकोत्तुङ्गाष्टादशांगुलसम्मिता । ग्रहाणां स्थापनार्था-य कार्य्या वप्रत्रयान्विता ॥ मध्येऽर्कं वृत्तमग्नौ शशिनमथ चतुष्को-ष्ठकं याम्य ऐलं त्र्यस्रं शैवे बुधं चाशुगमुदचि गुरुं कोणचातुष्क-दीर्घम् ॥ पूर्वे शुक्रं शरारं वरुण इनसुतं चापकं नैर्ऋतेऽगुं सर्प्पं वायौ हि केतुं ध्वजमिह यजनार्थं क्रमादाह्वयेच्च ॥ रक्तौ सूर्य्य-कुजौ शुभ्रौ विधुशुक्रौ हरिद्बुधः । पीतो गुरुर्नील ऐनः कृष्णो-ऽगुश्चित्रितो ध्वजः ॥ ताम्रस्फाटिकरक्तचन्दनसुवर्णस्वर्णरौप्या-यसप्रेक्ष्यत्रस्यसमुद्भवाःप्रतिमकाः सूर्य्यादिपूजाविधौ॥गव्याज्या-न्नमसूरमुद्गचणकान्नप्रख्यमाषांशुभा दानार्थं शुभदाः क्रमेण गदिताः कालत्रयीवेदिभिः ॥ प्रेक्ष्यः शीशकः ॥ त्रस्यः कांस्यम् ॥ अन्नं तण्डुलः ॥ प्रख्यः तिलः ॥ अंशुभः गोधूमः ॥ कपिलः पिंगलो धूमकेतुर्जाठरकः शिखी । हाटकश्च महातेजा हुताशौ ग्रहवह्नयः ॥ अर्कपालाशखदिरापामार्गाश्वत्थयज्ञियाः । शमी-दूर्वाकुशाः प्रोक्ता ग्रहाणां समिधः क्रमात् ॥ प्रादेशमात्राः सुदृढा यद्वा यज्ञियवृक्षजाः । निष्कटका ग्रन्थिहीनाः कर्त्तव्या यज्ञकर्म्मणि ॥



त्र्यम्बकः पावती स्कन्दो विष्णुर्ब्रह्मा शतक्रतुः।यमः कालश्चित्रगुप्तो ग्रहाणामधिदेवताः ॥ अग्निरापः क्षितिर्विष्णुरिन्द्रः शाची प्रजापतिः ॥ सर्प्पो ब्रह्मा ग्रहाणां तु प्रोक्ताः प्रत्यधिदेवताः ॥ अधिदेवा दक्षिणतो वामे प्रत्यधिदेवताः।स्वैस्स्वैर्मन्त्रैःस्थापनीयाः श्रुतिस्मृतिविधानतः॥सामग्रीं सम्पाद्य वरुणविधिना वरुणं सम्पूज्य अद्येत्यादि० अमुकशर्म्माहं ममास्यात्मजस्य करिष्यमाणचू-

डोपनयनवेदारम्भसमावर्त्तनकर्मसु पूर्वाङ्गतया मखसंरक्षणाय श्रौतस्मार्त्तकर्मार्चनीयसाधिप्रत्यधिदैवतसूर्य्यादिनवग्रहदेवस्थापनपूजनकर्म्म करिष्ये । जलाक्षतपुष्पैः मध्येऽष्टदलकमले आकृष्णेति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दः सूर्य्यो देवता सूर्य्यावाहने विनियोगः ॥ ध्यानम् ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः ॥ ऋक्—ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ॐ भूर्भुवः स्वः सूर्य्येहागच्छेह तिष्ठ । दक्षिणपार्श्वे त्र्यम्बकमिति वसिष्ठ ऋषिरनुष्टुप्छन्दस्त्र्यम्बको देवता त्र्यम्बकावाहने विनियोगः ॥ ध्यानम् ॥ पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः । कपाली शूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः ॥ ऋक्—ॐत्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥ ऊर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ भूर्भुवः स्वः त्र्यम्बकेहागच्छेहतिष्ठ । वामपार्श्वे अग्निंदूतमिति मन्त्रस्य विरूपाक्ष ऋषिर्गायत्री छन्दोग्निर्देवताऽग्न्यावाहने विनियोगः ॥ ध्यानम् ॥ पिङ्गलश्मश्रुकेशाक्षः पीनाङ्गजठरोरुणः ॥ छागस्थः साक्षसूत्रोग्निः सप्तार्चिः शक्तिधारकः ॥ ऋक्—ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे ।देवाँ आसादयादिह । ॐ भूर्भुवः स्वः अग्ने इहागच्छेह तिष्ठ । आग्नेय्याम् । इमंदेवा इति गौतम ऋषिर्द्विपदाविराट् छन्दः सोमो देवता ॥ सोमावाहने विनियोगः ॥ ध्यानम् ॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥ ऋक्—ॐ इमं देवा असपत्नꣳसुवद्ध्वंमहतेक्षत्राय महतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्यपुत्रममुष्यैपुत्रमस्यै विश एष वोमीराजा सोमोस्माकं ब्राह्मणानाꣳराजा॥ ॐ भूर्भुवः स्वः सोमेहागच्छेहतिष्ठ ॥ दक्षिणपार्श्वे श्रीश्चत इति

नारायण ऋषिस्त्रिष्टुप्छन्द उमा देवतोमावाहने विनियोगः ॥ ध्यानम् ॥ अक्षसूत्रं च कमलं दर्प्पणं च कमण्डलुम् । उमा बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि ॥ ऋक्—ॐ श्रीश्चतेलक्ष्मीश्चपत्न्या-वहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मइ-षाण सर्वलोकम्म इषाण ॥ ॐ भूर्भुवः स्वः उमे इहागच्छेहतिष्ठ ॥ वामपार्श्वे अप्स्वितिमेधातिथिर्ऋषिरनुष्टुप्छन्द आपो देवता अपा-मावाहने विनियोगः ॥ ध्यानम् ॥ आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः । दधानाः पाशकलशौ मुक्ताभरणभूषिताः ॥ ऋक्—ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रसस्तिष्वश्वाभवतवाजिनः । देवीरापोयोवऊर्म्मिःप्रतूर्त्तिःककुन्मान् वाजसास्तेनायंवाय ँ सेत् । ॐ भूर्भुवः स्वः आप इहागच्छत इह तिष्ठत इति दक्षिणे ॥ अग्निर्मूर्धेति विरूपाङ्गिरस ऋषिर्गायत्रीछन्दो भौमो देवता भौमा-वाहने विनियोगः ॥ ध्यानम् ॥ रक्तमाल्याम्बरधरः शक्तिशूल-गदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ ऋक्—ॐ अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयम् । अपा ँ रेता ँ सिजि-न्वति ॥ ॐ भूर्भुवः स्वः भौम इहागच्छेहतिष्ठ ॥ दक्षिणपार्श्वे यद-क्रन्द इति दीर्घतमा ऋषिस्त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः ॥ ध्यानम् ॥ कुमारः षण्मुखः कार्य्यः शिखण्डकवि-भूषणः । रक्ताम्बरधरो देवो मयूरवरवाहनः ॥ ऋक्—ॐयदक्रन्दः प्रथमं जायमानउद्यन्त्समुद्रादुतवापुरीषात् ।श्येनस्य पक्षाहरिणस्य बाहू उपस्तुत्यंमहिजानंते अर्वन् ॥ ॐ भूर्भुवः स्वः स्कन्द इहा-गच्छेहतिष्ठ ॥ वामपाश्व स्योनापृथिवीति मेधातिथिर्ऋषिर्गायत्री-छन्दः पथिवी देवता पृथिव्यावाहने विनियोगः ॥ ध्यानम् ॥ शुलक्वर्णा मही कार्य्या दिव्याभरणभूषिता । चतुर्भुजा सौम्यव-पुश्चण्डांशुसदृशांबरा॥ ऋक्—स्योनापृथिविनोभवानृक्षरानिवेशनी।

यच्छानः शर्म्मस प्रथाः ॥ ॐ भूर्भुवः स्वः पृथिवीहागच्छे-
हतिष्ठ ॥ ईशान्याम् ॥ उद्बुध्यस्वेति परमेष्ठी ऋषिस्त्रिष्टुप्छ-
न्दो बुधो देवता बुधावाहने विनियोगः ॥ ध्यानम् ॥ पीतमाल्या-
म्बरधरः कर्णिकारसमद्युतिः । खड्गचर्म्मगदापाणिः सिंहस्थो वरदो
बुधः ॥ ऋक्-ॐ उद्बुध्यस्वाग्ने प्रतिजागृहित्वमिष्टापूर्त्ते स ँ सृजेथा
मयं च ॥ अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च
सीदत ॥ ॐ भूर्भुवः स्वः बुध इहागच्छेहतिष्ठ ॥ दक्षिणपार्श्वे
विष्णोरराटमिति दीर्घतमा ऋषिरुष्णिक्छन्दो विष्णुर्देवता वि-
ष्णवावाहने विनियोगः ॥ ध्यानम् ॥ विष्णुः कौमोदकीपद्मशंखचक्र-
धरः क्रमात् । प्रदक्षिणं दक्षिणाधः करादारभ्य नित्यशः ॥ ऋक् ।
ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णो-
र्ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥ ॐ भूर्भुवः स्वः विष्णो इहा-
गच्छेहतिष्ठ ॥ वामपार्श्वे इदं विष्णुरिति मेधातिथिर्ऋषिर्गायत्रीछन्दो
विष्णुर्देवता विष्णवावाहने विनियोगः ॥ ध्यानम् ॥ नारायण-
श्चतुर्बाहुः शंखचक्रं तथोत्तरे । दक्षिणे तु गदापद्मं नीलजीमूत-
सन्निभः ॥ ऋक्-ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढ-
मस्यपा ँ सुरे ॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छेहतिष्ठ ॥
उत्तरे ॥ बृहस्पते इति गृत्समद ऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता
बृहस्पत्यावाहने विनियोगः ॥ ध्यानम् ॥ पीतवर्णः पीतवासा
अक्षसूत्रं कमण्डलुम् । दण्डं वरं चतुर्हस्तैर्दधानो गुरुरीश्वरः ॥
ऋक्-ॐ बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।
यदीदयच्छव स ऋतप्रजाततदस्मासुद्रविणं धेहिचित्रम् ॥ ॐ भूर्भुवः
स्वः बृहस्पते इहागच्छेहतिष्ठ ॥ दक्षिणपार्श्वे आब्रह्मन्निति प्रजापति-
ऋषिर्यजुश्छन्दो ब्रह्मा देवता ब्रह्मावाहने विनियोगः ॥ ध्यानम् ॥
चतुर्मुखः पद्मसंस्थो ब्रह्मा कार्य्यश्चतुर्भुजः । अक्षमालां स्रुवं बिभ्रत्पु-

स्तकं च कमण्डलुम्॥ऋक्–ॐआब्रह्मन् ब्राह्मणो ब्रह्मवर्चसीजाय-
तामाराष्ट्रेराजन्यः शूरइषव्योतिव्याधीमहारथोजायतां दोग्ध्री-
धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयोयुवा-
स्ययजमानस्यवीरोजायतांनिकामेनिकामेनः पर्ज्जन्योवर्षतु फल-
वत्यो न ओषधयःपच्यन्तां योगक्षेमोनः कल्पताम् ॥ ॐभूर्भुवः
स्वःभो ब्रह्मन्निहागच्छेहतिष्ठ॥वामपार्श्वे त्रातारमिन्द्रमिति गर्गऋषि-
स्त्रिष्टुप्छन्द इन्द्रो देवतेन्द्रावाहने विनियोगः ॥ ध्यानम् ॥चतुर्दन्त-
गजारूढो वज्री कुलिशभृत्करः। शचीपतिः प्रकर्त्तव्यो नानाभरण-
भूषितः॥ऋक्–ॐ त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवेसुहवँ शूरमि-
न्द्रम् । ह्वयामिशक्रंपुरुहूतमिन्द्रँ स्वस्तिनोमघवाधात्विन्द्रः ॥ॐ
भूर्भुवः स्वः इन्द्र इहागच्छेहतिष्ठ ॥ पूर्वे अन्नादितिप्रजापतिर्ऋषिर-
तिजगतीछन्दः शुक्रो देवता शुक्रावाहने विनियोगः ॥ ध्यानम् ॥
श्वेतवर्णः श्वेतवासा अक्षसूत्रं कमण्डलुम् । दण्डं वरं चतुर्हस्तैर्द-
धानो भार्गवः स्मृतः ॥ ऋक्–ॐ अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिब-
त्क्षत्रं पयः सोमं प्रजापतिः ।ऋतेनसत्यमिन्द्रियंविपानँ शुक्रमन्ध
सइन्द्रस्येन्द्रियमिदंपयोमृतंमधु ॥ ॐभूर्भुवः स्वः शुक्र इहाग-
च्छेहतिष्ठ ॥ दक्षिणपार्श्वे सजोषा इति विश्वामित्र ऋषिस्त्रिष्टुप्छ-
न्द इन्द्रो देवतेन्द्रावाहने विनियोगः ॥ ध्यानम् ॥ इन्द्रः सुरपतिः
श्रेष्ठो वज्रहस्तो महाबलः । सहस्रनेत्रः पीनाङ्गः शतयज्ञकरः
प्रभुः॥ऋक्–ॐसजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहाशूर-
विद्वान् । जहिशत्रूँ रपमृधोनुदस्वाथाभयं कृणुहि विश्वतोनः॥
ॐभूर्भुवः स्वः इन्द्र इहागच्छेहतिष्ठ ॥ वामपार्श्वे अदित्यैरास्ना-
सीतिदध्यङ्ङाथर्वण ऋषिर्यजुश्छद इन्द्राणी देवतेन्द्राण्यावाहने
विनियोगः ॥ ध्यानम् ॥ वामे करे प्रकर्त्तव्या सौम्या सन्ता-
नमञ्जरी । वरदा मण्डिता कार्य्या द्विभुजा सर्वदा शची ॥

ऋक्-ॐ अदित्यरास्नासीसीन्द्राण्या उष्णीषः पूषासिधर्म्माय दीष्व ॥ ॐ भूर्भुवः स्वः इन्द्राणि इहागच्छेह तिष्ठ ॥ पश्चिमे शन्नोदेवीरिति दध्यङ्ङाथर्वण ऋषिर्गायत्रीछन्दः शनिर्देवता शन्यावाहने विनियोगः ॥ ध्यानम् ॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥ ऋक्-ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये । शँय्योरभिस्रवन्तुनः॥ ॐ भूर्भुवः स्वः शने इहगच्छेहतिष्ठ ॥ दक्षिणपार्श्वे यमाय त्वेति दध्यङ्ङाथर्वण ऋषिर्यजुश्छन्दो यमो देवता यमावाहने विनियोगः ॥ ध्यानम् ॥ ईषन्नीलो यमः कार्य्यो दण्डहस्तो विजानता । रक्तदृक्पाशहस्तश्च महामहिषवाहनः ॥ ऋक्-ॐ यमायत्वांगिरस्वते पितृमते स्वाहा धर्म्माय स्वाहा धर्म्मपित्रे ॥ ॐ भूर्भुवः स्वः यम इहागच्छेहतिष्ठ ॥ वामपार्श्वे प्रजापत इति हिरण्यगर्भ ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापत्यावाहने विनियोगः ॥ ध्यानम् ॥ यज्ञोपवीती सिंहस्थ एकवक्त्रश्चतुर्भुजः । अक्षस्रजं स्रुवं बिभ्रत्कुण्डीं पुस्तं प्रजापतिः ॥ ऋक्-ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोअस्तुवय ँ स्यामपतयो रयीणाम्॥ॐ भूर्भुवः स्वः प्रजापते इहागच्छेहतिष्ठ ॥ नैर्ऋत्ये कयान इति वामदेव ऋषिर्गायत्री छन्दो राहुर्देवता राह्वावाहने विनियोगः॥ध्यानम्॥करालवदनः खड्गचर्म्मशूली वरप्रदः नीलसिंहासनस्थोऽत्र राहुःकार्यो मनीषिभिः॥ऋक्-ॐ कयानश्चित्रआभुवदूती सदावृधः सखा । कयाशचिष्ठया वृता ॥ ॐ भूर्भुवः स्वः राहो इहागच्छेहतिष्ठ ॥दक्षिणपार्श्वे कार्षिरसीति प्रजापतिर्ऋषिरनुष्टुप्छन्दः कालो देवता कालावाहने विनियोगः । ध्यानम् ॥ कालः करालवदनो नीलाङ्गश्च विभीषणः । पाशहस्तो दण्डहस्तः कार्य्यो वृश्चिकरोमवान् ॥ ऋक्-ॐकार्षिरसि समुद्रस्य त्वा क्षित्या उन्न-

यामि समापो अद्भिरग्मतसमोषधीभिरोषधीः ॥ ॐ भूर्भुवः स्वः कालइहागच्छेहतिष्ठ ॥ वामपार्श्वे नमोस्त्विवति देवश्रवाऋषिस्त्रिष्टुप्छन्दः सर्प्पा देवताः सर्प्पाणामावाहने विनियोगः॥ ध्यानम्॥ अक्षसूत्रधराः सर्प्पाः कुंडिकापुच्छभूषणाः ॥ एकभोगास्त्रिभोगा वा सर्वे कार्य्याश्च भीषणाः । ऋक्—ॐ नमोस्तुसर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ ॐभूर्भुवः स्वः सर्प्पा इहागच्छत इह तिष्ठत इति ॥ वायव्ये केतुमिति मधुच्छन्द ऋषिर्गायत्रीछन्दः केतुर्देवता केत्वावाहने विनियोगः॥ ध्यानम् ॥ धूम्रोद्विबाहुर्वरदो गदाहस्तो महाबलः । गृध्रासनः किरीटी च केतुः कार्यो ध्वजाकृतिः ॥ ऋक्—ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्याअपेशसे । समुषद्भिरजायथाः ॥ ॐ भूर्भुवः स्वः केतो इहागच्छेहतिष्ठ॥ दक्षिणपार्श्व इन्धाना इति प्रजापतिर्ऋषिर्यजुश्छन्दश्चित्रगुप्तो देवता चित्रगुप्तावाहने विनियोगः ॥ ध्यानम् ॥ अपीच्यवेषः स्वाकारो द्विभुजः सौम्यदर्शनः । पुस्तकालोकनपरश्चित्रगुप्तः शुभप्रदः ॥ ऋक्—ॐ इन्धानास्त्वाशत ँ हिमाद्युमन्त ँ समिधीमहिवयस्वन्तो वयस्कृत ँ सहस्वन्तःसहस्कृतम् अग्नेसपत्नदम्भनामदब्धासो अदाभ्यं चित्रावसोस्वतितेपारमशीय ॥ ॐ भूर्भुवः स्वः चित्रगुप्त इहागच्छेहतिष्ठ॥वामपार्श्वे ब्रह्मजज्ञानमिति गौतम ऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता ब्रह्मावावाहने विनियोगः॥ ध्यानम् ॥कुंकुमारुणसर्वाङ्गश्चतुर्वक्त्रःप्रजेश्वरः। ब्रह्मा हंसस्कन्धरूढः कर्त्तव्यः परमार्थवित् ॥ ऋक्—ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः । सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः । ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छेह तिष्ठ ॥ ततो गणपत्यादिपञ्चलोकपालान्राहोरुत्तरपार्श्वे गणानान्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गणपतिर्देवता गणपत्या-

वाहने विनियोगः ॥ ध्यानम् ॥ चतुर्भुजस्त्रिनेत्रश्च नागयज्ञोपवी-
तवान् । सिंदूरवर्णः शुभदो गणेशो राहुसौम्यगः ॥ऋक्-ॐगणा
नान्त्वागणपति ँ हवामहे प्रियाणान्त्वाप्रियपति ँहवामहेनिधी-
नान्त्वा निधिपति ँ हवामहे वसो मम । आहमजानिगर्भधमात्व
मजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः गणपते इहागच्छेहतिष्ठ॥ शने-
रुत्तरतःअम्बे इति प्रजापतिऋषिरनुष्टुप्छन्दो दुर्गा देवता दुर्गावाहने
विनियोगः ॥ ध्यानम् ॥ चतुर्भुजा शंखचक्रकृपाणत्रिशिखावहा।
कालाभ्रसन्निभा देवी दुर्गा कार्य्याऽभयप्रदा॥ऋक्-ॐ अम्बेअम्बि
केअम्बालिकेनमानयतिकश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पी-
ल्यवासिनीम् ॥ ॐ भूर्भुवः स्वः अम्बिके इहागच्छेहतिष्ठ ॥ रवेरु-
त्तरतः वातोवामन इति बृहस्पतिऋषिरुष्णिकछन्दो वायुर्देवता
वाय्वाहने विनियोगः ॥ ध्यानम् ॥ पृथ्वीपृष्ठं समासीनः सर्वा-
लङ्कारशोभितः । ध्वजधर्ता प्राणकर्ता शीघ्रगामी समीरणः ॥
ऋक्-ॐ वातो वामनो वागन्धर्वाः सप्तविँशतिः। ते अग्रे-
श्वमयुञ्जँस्ते अस्मिन्नवमादधुः ॥ॐ भूर्भुवः स्वः वायो इहागच्छे-
ह तिष्ठ ॥ राहोदक्षिणतः घृतमिति दीर्घतमा ऋषिः पंक्तिश्छन्द
आकाशो देवता आकाशावाहने विनियोगः ॥ ध्यानम् ॥ नीलो-
त्पलाभं गगनं तद्वर्णाम्बरधारि च। चन्द्रार्कहस्तं कर्तव्यं द्विभुजं
सौम्यदंडवत् ॥ ऋक्-ॐ घृतं घृतपावानः पिबत वसां वसापावानः
पिबतान्तरिक्षस्यहविरसि॥ॐभूर्भुवः स्वःआकाश इहागच्छेहतिष्ठ॥
केतोर्दक्षिणतः यावांकशेति मेधातिथिर्ऋषिर्गायत्रीछन्द अश्विनौ
देवतेआश्विनेयावाहने विनियोगः ॥ ध्यानम् ॥ द्विभुजौ देवभि-
षजौ कर्त्तव्यौ देहसंयुतौ । तयोरोषधयः कार्य्या दिव्या दक्षिणह-
स्तयोः॥ऋक्-ॐयावां कशामधुमत्यश्विनासूनृतावती।तयायज्ञमि
मिक्षतम्॥ॐ भूर्भुवः स्वः अश्विनाविहागच्छतमिहतिष्ठतम्॥ अथ

पूर्वे इन्द्रम्॥त्रातारमिति गर्ग ऋषिस्त्रिष्टुप्छंद इन्द्रो देवतेंद्रावाहने विनियोगः ॥ ध्यानम् ॥ चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः । शचीपतिः सहस्राक्षो विपुलांसः सुमध्यमः ॥ ऋक्—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् । ह्वयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ ॐ भूर्भुवः स्वः इन्द्र इहागच्छेहतिष्ठ ॥ आग्नेये त्वन्नो अग्नइति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवताऽग्न्यावाहने विनियोगः ॥ ध्यानम् ॥ छागपृष्ठसमासीनः सप्तार्चिः शक्तिधारकः । साक्षसूत्रः पिङ्गनेत्रो वरदोऽग्निः समीरितः ॥ ऋक्—ॐ त्वन्नो अग्ने तव देवपायुभिर्मघोनोरक्षतन्वश्चवन्द्य । त्रातातोकस्यातनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते ॥ ॐ भूर्भुवः स्वः अग्ने इहागच्छेह तिष्ठ ॥ दक्षिणे यम इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो यमोदेवता यमावाहने विनियोगः॥ ध्यानम्॥ महिषासनसंस्थश्च धर्म्मराजश्चतुर्भुजः । दण्डखड्गाभयकरः कार्य्यः सर्वपरेतपः ॥ ऋक्—ॐ यमश्विनासरस्वती हविषेन्द्रमवर्द्धयत् । सबिभेदवक्षमवन्नसुचानासुरेसचास्वाहा॥ ॐभूर्भुवः स्वः यम इहागच्छेहतिष्ठ ॥ नैर्ऋत्ये एष इति विवस्वानृषिरतिजगती छन्दो निर्ऋतिर्देवता निर्ऋत्यावाहने विनियोगः॥ध्यानम्॥ रक्तहक्पाशभृत्क्रुद्धो निर्ऋतिर्विकृताननः । प्रेतस्थः खड्गहस्तश्च ध्यातव्यःसर्वदैव तु ॥ ऋक्— ॐ एषते निर्ऋतेभागस्तंजुषस्वस्वाहाग्निनेत्रेभ्यो देवेभ्यःपुरःसद्भ्यः स्वाहायमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यः स्वाहा विश्वेदेवनेत्रेभ्यो देवेभ्य पश्चात् सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वामरुन्नेत्रेभ्योवादेवेभ्यः उत्तरासद्भ्यः स्वाहासोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वन्तस्तेभ्यः स्वाहा ॥ ॐ भूर्भुवःस्वः निर्ऋते इहागच्छेहतिष्ठ॥पश्चिमे तत्त्वायामीति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता वरुणावाहने विनियोगः ॥

ध्यानम्॥वरुणः पाशभृत्सौम्यः प्रतीच्यां मकराश्रयः।पाशहस्तात्मको देवो जलराश्यधिपो महान् ॥ऋक्—ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहबोध्युरुशꣳ समान आयुः प्रमोषीः ॥ ॐ भूर्भुवः स्वः वरुण इहागच्छेहतिष्ठ ॥ वायव्ये आनो नियुद्भिरिति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो वायुर्देवता वाय्वावाहने विनियोगः ॥ ध्यानम् ॥ मृगपृष्ठसमारूढः खड्गहस्तो महाबलः । वायुः प्राणप्रदो देवः कार्य्यः सर्वविभूषणः । ऋक्—ॐ आनो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहियज्ञम् ।वायोऽअस्मिन्त्सवनेमादयस्व यूयंपातःस्वस्तिभिःसदानः ॥ ॐ भूर्भुवः स्वः वायो इहागच्छेहतिष्ठ ॥ उत्तरे वयमितिबन्धुर्ऋषिस्त्रिष्टुप्छन्दः सोमोदेवता सोमावाहने विनियोगः ॥ ध्यानम् ॥ दशाश्वरथगः सोमो गदापाणिर्वरप्रदः । नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्त्तितः ॥ ऋक् ।ॐ वयꣳ सोमव्रतेतवमनस्तनूषु बिभ्रतः।प्रजावन्तः सचेमहि ॥ ॐ भूर्भुवः स्वः सोम इहागच्छेहतिष्ठ ॥ईशाने तमीशानमिति गौतम ऋषिर्जगतीछन्द ईशानो देवतेशानावाहने विनियोगः ॥ ध्यानम् ॥ पूर्वोत्तरेग्निनेत्रश्च वृषभस्थस्त्रिशूलधृक् । कपालपाणिश्चन्द्रार्धभूषणः परमेश्वरः ॥ ऋक्—ॐ तमीशान जगतस्तस्थुषस्पतिं धियं जिन्वमवसेहूमहेवयम्।पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ॐ भूर्भुवःस्वः ईशान इहागच्छेहतिष्ठ॥ पश्चिमनैर्ऋत्ययोर्मध्ये अहिरिति प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽनन्तो देवताऽनन्तावाहने विनियोगः ॥ ध्यानम् ॥ फणाङ्काधिपतिर्देवोऽनन्तनामा महाबलः । पातालवासी रुचिरमणिभूषणभूषितः॥ऋक्—ॐअहिरिव भोगैः पर्य्येति बाहुं ज्यायाहतिम्परिबाधमानः ।हस्तघ्नोविश्वावयुनानिविद्वान् पुमान्पुमाꣳ

सम्परिपातु विश्वतः ॥ ॐ भूर्भुवःस्वः अनन्त इहागच्छेहतिष्ठ ॥ पूर्वेशानयोर्मध्ये ब्रह्मसूर्य्यसममिति वामदेव ऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता ब्रह्मावाहने विनियोगः॥ ध्यानम् ॥ हंसपृष्ठसमासीनः स्रुवहस्तो महाबलः । पद्मयोनिश्चतुर्मूर्त्तिर्ब्रह्मा कार्यः पितामहः ॥ ऋक्-ॐ ब्रह्मसूर्य्यसमज्योतिर्द्यौः समुद्रसमꣳसदइन्द्रः । पृथिव्यै येषीयान्गोस्तुमात्रासविच्छेत् ॥ ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छेहतिष्ठ ॥ इति दिक्पालाः ॥ अथ नाममन्त्रैः यथा रवेः पूर्वे शेषेहागच्छेह तिष्ठ ॥ सोमस्याग्रे वासुके इहागच्छेहतिष्ठ॥ भौमस्याग्रे तक्षकेहागच्छेहतिष्ठ ॥ बुधस्याग्रे कर्कोटकेहागच्छेहतिष्ठ ॥ गुरोरग्रे पद्मेहागच्छेहतिष्ठ ॥ शुक्रस्योत्तरे महापद्मेहागच्छेहतिष्ठ ॥ शनेः पश्चिमे शंखपालेहागच्छेहतिष्ठ ॥ राहोरग्रे कम्बलेहागच्छेहतिष्ठ॥ केतोरग्रे कुलिकेहागच्छेह तिष्ठ ॥ ततो बहिर्भूगृहे पूर्वभागे अश्विन्यादिसप्त नक्षत्राणीहागच्छतेह तिष्ठत ॥ विष्कंभादिसप्तयोगा इहागच्छतेह तिष्ठत॥बवबालवकरणे इहागच्छतमिह तिष्ठतम् ॥सप्त द्वीपा इहागच्छतेहतिष्ठत । ऋग्वेदेहागच्छेहतिष्ठ । दक्षिणे पुष्यादि सप्तनक्षत्राणीहागच्छतेह तिष्ठत ॥ धृत्यादिसप्तयोगा इहागच्छतेहतिष्ठत ॥ कौलवतैतिलकरणे इहागच्छतमिहतिष्ठतमिति । सप्तसागराः इहागच्छतेहतिष्ठत॥ यजुर्वेदेहागच्छेहतिष्ठ ॥पश्चिमे स्वात्यादिसप्तनक्षत्राणीहागच्छतेह तिष्ठत॥वज्रादि सप्त योगा इहागच्छतेह तिष्ठत॥गरवणिजकरणे इहागच्छेतमिहतिष्ठतम् ॥ सप्तपातालानीहागच्छतेहतिष्ठत ॥ सामवेदेहागच्छेह तिष्ठ ॥ उत्तरे अभिजिदादिसप्त नक्षत्राणीहागच्छतेह तिष्ठत ॥साध्यादिषड्योगा इहागच्छतेह तिष्ठत ॥ विष्टिकरणेहागच्छेह तिष्ठ ॥ भूरादिसप्तलोका इहागच्छतेह तिष्ठत ॥ अथर्ववेदेहागच्छेह तिष्ठ ॥ वायव्ये ध्रुवेहागच्छेह तिष्ठ ॥ सप्तर्षय इहागच्छतेह तिष्ठत । अथ यथावकाशं

गङ्गाद्याः सप्त सरितः इहागच्छतेह तिष्ठत ॥ सप्त कुलाचला इहागच्छतेह तिष्ठत ॥ अष्टौ वसव इहागच्छतेह तिष्ठत ॥ द्वादशादित्या इहागच्छतेह तिष्ठत ॥ एकादशरुद्रा इहागच्छतेह तिष्ठत ॥ एकोनपञ्चाशन्मरुत इहागच्छतेह तिष्ठत ॥ षोडशमातर इहागच्छतेह तिष्ठत ॥ षड्ऋतव इहागच्छतेहतिष्ठत ॥ द्वादशमासा इहागच्छतेह तिष्ठत॥द्वे अयने इहागच्छतमिहतिष्ठतम् ॥ पञ्चदश तिथय इहागच्छतेह तिष्ठत ॥ षष्टिसँव्वत्सरा इहागच्छतेह तिष्ठत ॥ सुपर्णा इहागच्छतेह तिष्ठत ॥ नागा इहागच्छतेह तिष्ठत ॥ सर्प्पा इहागच्छतेह तिष्ठत ॥ यक्षा इहागच्छतेह तिष्ठत ॥ गन्धर्वा इहागच्छतेह तिष्ठत ॥ विद्याधरा इहागच्छतेह तिष्ठत ॥ अप्सरस इहागच्छतेह तिष्ठत ॥ रक्षांसीहागच्छतेह तिष्ठत ॥ भूतानीहागच्छतेह तिष्ठत ॥ मनुष्या इहागच्छतेह तिष्ठत ॥ पूर्वे ब्रह्मन्निहागच्छेह तिष्ठ ॥ मध्ये विष्णो इहागच्छेहतिष्ठ ॥ पश्चिमे शिवेहागच्छेह तिष्ठ । उत्तरेस्कन्देहगच्छेह तिष्ठ ॥ विनायकेहागच्छेह तिष्ठ ॥सरस्वतीहागच्छेहतिष्ठ ॥ कमले इहागच्छेह तिष्ठ ॥ अम्बिके इहागच्छेह तिष्ठ ॥ सिद्धेइहागच्छेह तिष्ठ ॥ बुद्धे इहागच्छेह तिष्ठ ॥ वनस्पत इति मन्त्रस्य गर्ग ऋषिस्त्रिष्टुप्छन्दो वनस्पतिर्देवता वनस्पत्यावाहने विनियोगः॥ध्यानम्। वनस्पतिः कल्पवृक्षः सर्ववर्णसमन्वितः । स्तम्भोयं सर्वजनतानेत्रानन्दप्रदो हि सः ॥ ऋक्—ॐवनस्पतेविड्ंगोहिभूयाअस्मत्सखाप्रतरणःसुवीरः।गोभिः सन्नद्धो असिवीडयस्वास्थातातेजयतुजेत्वानि ॥ ॐभूर्भुवः स्वः वनस्पत इहागच्छेहतिष्ठ ॥ आसनम् ॥ मुक्तावैडूर्य्यमणिभिः खचितं शुद्धमासनम् ॥ नानावर्णमयं दिव्यं गृह्यतां परमेश्वराः ॥ आवाहनम् ॥ कृपया देवलोकेशाः साङ्गाः सर्वात्मनिग्रहाः। इहागच्छत भद्रं मे क्रियतां लोकपूजितैः ॥ पाद्यम् ॥ शुद्धपात्रस्थितं दिव्यं नानापङ्कजशोभितम् । जलमेतत्तु

पाद्यार्थं गृह्यतां सुरसत्तमाः॥अर्घ्यम्॥ सप्तगङ्गाहृतं तोयं सर्वदृष्टि-
मनोहरम् । ताम्रपात्रस्थितं देवा गृह्यतां परमोत्तमम् ॥ पञ्चामृत-
म् ॥ पयोदधिसिताक्षौद्रघृतनिर्मितमद्भुतम् । पञ्चामृतमिदं दिव्यं
गृह्यतां सर्वदेवताः ॥ स्नानीयम् ॥ सर्वतीर्थाहृतं तोयं सर्वौषधि-
विमिश्रितम् । स्नानीयं कृपया देवा गृह्यतामङ्गसौख्यदम् ॥ यज्ञो-
पवीतम् ॥ वेदमंत्रैर्मंत्रितानि शुद्धकार्प्पासजानि च । उपवीतानि
देवेशा गृह्यंतां मम सिद्धये ॥ वस्त्राणि ॥ शीतवातोष्णसंत्राणं
लज्जाया रक्षणं परम् ॥ वस्त्रसघं मया दत्तं गृह्यतां परमेश्वराः ॥
भूषणानि ॥ भूषणानां महार्हाणां पटलं सर्वरञ्जनम् । अङ्गशोभा-
करं देवा गृह्यतामर्पितं मया ॥ चन्दनम् ॥ मलयाचलसंभूतं
कर्पूरैलाविमिश्रितम् । भालशोभाकरं देवाश्चन्दनं प्रतिगृह्यताम् ॥
अक्षताः॥शुद्धमुक्ताफलाभानामक्षतानां व्रजं परम्।गृह्यतां त्रिदशाः
सर्वेप्सितप्रदमघौघहम् ॥ पुष्पाणि॥ मालतीमल्लिकाजानां पुष्पा-
णां पटलं वरम्। गृह्यतां परया प्रीत्या मद्दत्तं जगदीश्वराः॥धूपः ॥
वनस्पतिरसोत्पन्नो गन्धाढ्यःसुमनोहरः।आघ्रेयस्त्रिदशाः शुद्धधू-
पोऽयं प्रतिगृह्यताम् ॥ दीपः ॥ सुप्रकाशो महादीपः सर्वत्र
तिमिरापहः ॥ साज्यसद्वर्त्तिकायुक्तो गृह्यतां परमेश्वराः॥नैवेद्यम्॥
सत्पात्रसिद्धं पक्वान्नं नानाव्यञ्जनसंयुतम् ॥ नैवेद्यं परमप्रीत्या
गृह्यतां सुरसत्तमाः ॥ ॐ नैवेद्याङ्गाचमं दिव्यं शुद्धतोयसमन्वितम्।
करानननविशुद्ध्यर्थं गृह्यतां जगदीश्वराः ॥ उपायनम् ॥ हिरण्य-
गर्भगर्भस्थं हेमं बीजमनुत्तमम् ॥ उपायनं मया दत्तं गृह्यतां सुर-
सत्तमाः ॥ फलानि ॥ सुधाखदिरताम्बूलनारिकेलफलानि च ।
गृह्यतां परया प्रीत्या देवाः स्वर्लोकवासिनः॥ क्षमापनम् ॥ अज्ञा-
नादथवा लोभात्प्रमादाद्वा कृतं मया।यत्पूजनं तत्क्षमित्वा गृह्यतां
परमेश्वराः ॥

अग्निस्थापनम् ।

वरणद्रव्याणि ॥ स्वर्णांगुलीयासनवस्त्रगन्धमालाम्बुपात्रक्रमुकप्रसूनैः । विप्रान्सदाचाररताञ्छ्रुतिज्ञान्याज्योध्वरे संवृणुयात्कुलार्हान् ॥ सहस्रहोमादारभ्य सहस्रदशकावधि । हस्तप्रमाणमात्रैव वेदी कार्य्या मनीषिभिः ॥ स्थण्डिलं मृन्मयं कार्य्यं चतुर्विंशाङ्गुलायतम् । द्व्यङ्गुलं तु भवेत्कण्ठं व्यासस्य वचनं यथा ॥ गर्भाधानात्समारभ्यसमावर्त्तनकावधि।प्रादेशमात्राकर्तव्यावेदिकाकोविदैः सदा॥संकल्प एव मुख्यःस्यात्स्नानदानादिकर्म्मसु।कर्म्म संकल्परहितं तत्सर्वं निष्फलं भवेत्॥ सामग्रीं सम्पाद्य आचम्य २ वरुणपूजनोक्तमन्त्रैर्वरुणं सम्पूज्य अद्येत्यादि० अमुकोऽहं ममास्य पुत्रस्य करिष्यमाणचूडोपनयनवेदारम्भसमावर्तनकर्मसु इयदात्मकग्रहमखमण्डपे आदौ पद्धत्युक्तप्रकारेणाग्निस्थापनं करिष्ये इति संकल्प्य ॥ कुशैर्हस्तमात्रमितां भूमिं परिसमूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन यथोत्तरं तिस्रो रेखा विलिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य पूर्वे क्षिप्त्वा जलेनाभ्युक्ष्य पीठं पूजयेत्॥कुशाक्षतैः रत्नमन्दिरायनमः,चतुर्द्वारमण्डलायनमः, रत्नवेदिकायै नमः, श्वेतच्छत्राय नमः, रत्नसिंहासनाय नमः,धर्म्माय नमः,ज्ञानाय नमः, वैराग्यायनमः,ऐश्वर्य्यायनमः,अधर्म्मायःनमः,अज्ञानाय नमः,अवैराग्यायनमः,अनैश्वर्य्याय नमः॥अथ तैजसे पात्रेऽग्निग्रहणम्।मयीति मन्त्रस्य वत्सारऋषिः ककुप्छन्दोग्निर्देवताग्निग्रहणे विनियोगः ॥ॐ मयिगृह्णाम्यग्रे अग्निंरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥ गर्भ इति विरूप ऋषिरुष्णिक्छन्दोऽग्निर्देवता गर्भाधाने विनियोगः॥ॐगर्भोअस्योषधीनांगर्भोवनस्पतीनांगर्भोविश्वस्यभूतस्याग्निगर्भोअपामसि ॥ विवस्वन्निति गृत्समद ऋषिर्गायत्रीछन्दोऽग्निर्देवता पुंसवने

विनियोगः ॥ ॐ विवस्वानादित्यैषते सोमपीथ तस्मिन्मत्स्व-
श्रदस्मैनरोवर्चसेदधातन । यदाशीर्दादम्पतिर्वमिमश्नुतः।पुमान्पु-
त्रोजायतेविन्दतेवस्वधाविश्वाहारथएधतेगृहे॥कस्त्वासत्य इति वा-
मदेवऋषिर्गायत्रीछन्दोग्निर्देवता सीमन्तोन्नयने विनियोगः ॥ ॐ
कस्त्वासत्यो मदानाम॑ हिष्ठोमत्सदन्धसः।दृढाचिदारुजेवसु ॥
अजीजन इति अरुणत्रसदस्युर्ऋषिरनुष्टुप्छन्दोग्निर्देवताजातकर्म्म-
णि विनियोगः॥ॐअजीजनोहिपवमानसूर्य्य विधारेशक्मनापयः।
गोजीरयार॑हमाणःपुरन्ध्या॥यदापीति भृगुर्ऋषिस्त्रिष्टुप्छन्दोग्नि-
र्देवता नाम्नि विनियोगः॥ॐयदापिपेषमातरं पुत्रः प्रमुदितोधयन्।
एतदग्नेअनृणोभवाम्यहं तौपितरौमयासम्पृचरुस्थांसन्माभद्रंणपृ-
क्तो विपृचस्थविमपाप्मनागृह्ण ॥ पूषेति तापस ऋषिर्निचृत्साम्नी
पंक्तिश्छन्दो लिंगोक्ता देवता निष्क्रमणे विनियोगः॥ ॐपूषा
पञ्चाक्षरेणपञ्चदिशउदजयत्ताउज्जेष॑सविताषडक्षरेण षड्तूनुदजय-
त्तानुज्जेषम्मरुतः सप्ताक्षरेण सप्तग्राम्यान्पशूनुदजय॑स्तानुज्जेषं
बृहस्पतिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जेषम् ॥ अन्नपत इति
नाभानेदिष्ठ ऋषिर्बृहतीछन्दोऽन्नं देवताऽन्नप्राशने विनियोगः ॥
ॐअन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणः । प्रप्रदातारंतारिषऊर्ज्जंनो
धेहिद्विपदेचतुष्पदे ॥ अग्न इति भरद्वाज ऋषिर्गायत्रीछन्दोग्निर्देवता
चौलकरणे विनियोगः ॥ ॐअग्नआयाहिवीतयेगृणानोहव्यदातये॥
निहोतासत्सिबर्हिषि ॥भद्रंकर्णेभिरिति गौतम ऋषिस्त्रिष्टुप्छन्दो-
ग्निर्देवता कर्णवेध विनियोगः ॥ ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवा॑ सस्तनूभिर्व्यशेमहि
देवहितं यदायुः ॥ अग्निरेकाक्षरेणेति तापस ऋषिर्निचृदार्षी गायत्री
वा साम्नी बृहती छन्दो लिंगोक्ता देवताः ॥ १ । २ ॥ उपनयने
विनियोगः ॥ॐअग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्ष-
रेणद्विपदोमनुष्यानुदजयतान्तानुज्जेषंविष्णुस्त्र्यक्षरेण त्री ल्लोका-

नुदजयत्तानुज्जेषꣳसोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम्।
अश्वस्येति गर्ग ऋषिरनुष्टुप्छन्दोग्निर्देवता वेदारम्भे विनियोगः॥
ॐअश्वस्यान्नस्य सम्पत्तिः पुत्राणामभिसम्पदे॥ आयुर्बलश्रिया-
ददन्त्वासान एहि रुन्धति॥ व्रतमिति आंगिरसऋषिरनुष्टुबादि-
च्छन्दांसि अग्निर्देवता समावर्तने विनियोगः॥ ॐव्रतं कृणु-
ताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः। देवीधियं मनामहेसमृ-
लीकामभिष्टये। वर्चोधायज्ञवाहसꣳसुतीर्थानोअसद्वशेयेदेवामनोजा
तामनोयुजोदक्षकृतवस्तेनोवन्तुतेनः पान्तु तेभ्यः॥ गाव इति
प्रागाथ ऋषिर्गायत्रीछन्दोग्निर्देवता गोदानेविनियोगः॥ गाव-
उपावतावतं यज्ञस्यरप्सुदाउभाकर्णाहिरण्मया॥ भग इति वसिष्ठ
ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता परिणये विनियोगः॥ ॐ भगएवभग-
वाँअस्तुदेवास्तेन वयंभगवन्तः स्याम। तन्त्वाभगसर्वइज्जोहवीति
सनो भगपुरएताभवेह॥ ऋतावानमिति प्रजापतिर्ऋषिःपंक्तिश्छ-
न्दोग्निर्देवता चतुर्थ्यां विनियोगः॥ ॐ ऋतावानंवैश्वानरमृतस्य
ज्योतिष्मतीअसृङ्वर्म्ममीमहे॥ उपयाम गृहीतोसीति वैखानस
ऋषिः २।३।४ मन्त्राणां क्रमश आसुर्य्युष्णिकयाजुषीजगती-
भुरिगार्षीगायत्रीछन्दांसि सोमाग्नी देवते अवाहने विनियोगः॥
ॐ उपयामगृहीतोस्यग्नये त्वा वर्चस एष ते योनिरग्नये
त्वा वर्चसे। अग्नेवर्चस्विन्वर्चस्वांस्त्वं देवेष्वसि वर्चस्वानहं
मनुष्येषु भूयासम्। अग्निर्मूर्धेति विरूपऋषिर्गायत्रीछन्दो-
ग्निर्देवता स्थापने विनियोगः॥ ॐ अग्निर्मूर्द्धादिवः ककु-
त्पतिः पृथिव्या अयम्। अपाꣳरेताꣳसिजिन्वति॥ इति वा
तूष्णीं कांस्यपात्रोपनीतमग्निं स्वाभिमुखं वेद्यां स्थापयेत्॥
ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन
यज्ञपतिं तेन मामव॥ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं

तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वेदेवासइह मादयन्तामों प्रतिष्ठ ॥ ॐ भूर्भुवः स्वः भो अग्ने इहागच्छेहतिष्ठ ॥ ॐ इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्द्धारपाभं जपाभम् । हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जै रत्नं कोदण्डमिक्षूद्भवमथ गुणकं चांकुशं पञ्चबाणान् । बिभ्राणासृक्कपाले त्रिनयनलसितापीनवक्षोरुहाढ्या देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ इति ध्यानं विधाय ॥ ब्रह्माणं वृणुयात् ॥ पाद्यादीनि समर्प्पयामि वासोंगुलीयकासनफलेभ्यो नमः ।ब्राह्मणाय नमः सम्पूज्य॥अद्येत्यादि० अमुकोऽहं ममास्य पुत्रस्य करिष्यमाणचूडोपनयनवेदारम्भसमावर्त्तनकर्म्मसु तदुपयोगिकायुतात्मकनवग्रहमखमण्डपे मखसंरक्षणाय नवग्रहवैदिकमन्त्रैस्तिलयवाज्याहुतिकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुमेभिर्वासोंगुलीयकासनफलैर्बृहस्पत्यादिदैवतैरमुकगोत्रममुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ इति वरणद्रव्यं ब्रह्मणे दत्त्वा प्रार्थयेत् ॥ ॐ यथा चतुर्मुखो ब्रह्मा वेदशास्त्रविशारदः । तथा त्वं मम यज्ञेऽस्मिन् भव ब्रह्मा द्विजोत्तम ॥ इति सम्प्रार्थ्य । वृतोस्मीति ब्रह्मणः प्रतिवचनम् ॥ यथाविहितं कर्म्म कुरु, करवाणि ॥ ततो यजमानोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अस्मिन्कर्मणि त्वं मे ब्रह्मा भव, भवानि ॥ ततो ब्रह्माणं कुशासने कल्पिते उदङ्मुखमुपवेशयेत् ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततः परिस्तरणम् ॥ बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तमग्नितः प्रणीतापर्य्यन्तं परिस्तीर्य्य

ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयम्,पविच्छेदनार्थं कुशत्रयम्, प्रोक्षणीपात्रमाज्यस्थाली चरुस्थाली सम्मार्जनकुशाः पञ्च वेणीरूपोपयमनकुशाःसप्त पलाशसमिधस्तिस्रः स्रुवःआज्यं षट्पञ्चाशदुत्तरमुष्टिशतद्वयावच्छिन्नतण्डुलपूर्णपात्रम् एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि अमीषामुत्तरतः साधारणान्युपकल्पनीयानि।ततःपवित्रच्छेदनकुशैः स्वप्रादेशमिते पवित्रे च्छित्त्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय व्यस्त द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रं पवित्रं धृत्वा तेन प्रोक्षणीजलस्य त्रिरुत्पवनं कुर्य्यात् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणानामिकाङ्गुष्ठाभ्यां पवित्रं गृहीत्वा तेन प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा ।ग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य ज्वलदुल्मुकेन प्रदक्षिणक्रमेण हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ ततः स्रुवमधोमुखं प्रतप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात् ॥ ततोऽग्निप्रदक्षिणक्रमेणाज्यमग्नेरवतार्य्याग्रतो निदध्यात् ॥ प्रोक्षणीवत् त्रिरुत्पूय चावेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः पूर्ववत् प्रोक्षण्युत्पवनं कुर्य्यात् ॥ उपयमनकुशान् वामहस्ते कृत्वा समुत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रोऽग्नौ प्रक्षिपेत् ॥ तत्र मन्त्राः ॥ समिधाग्निमिति आंगिरस ऋषिर्गायत्रीछन्दोग्निर्देवता समिद्धोमे विनियोगः ॥ ॐ समिधाग्निं दुवस्यते घृतैर्बोधयतातिथिम् । अस्मिन् हव्याजुहोतन ॥ सुसमिद्धायेति वसुश्रुत ऋषिर्गायत्री छन्दोग्निर्देवता समिद्धोमे विनियोगः ॥ ॐ सुसमि-

द्धाय शोचिषे घृतं तीव्रं जुहोतन ॥ अग्नये जातवेदसे स्वाहा ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीता-पात्रे पवित्रं निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्ध-तमेऽग्नौ घृताहुतीर्दद्यात् ॥ तत्र प्रजापत्यादिद्वादशाहुतिपर्य्यन्तं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कार्य्यः ॥ प्रजा-पत्यादिचतुर्णां मन्त्राणां प्रजापतिऋषिस्त्रिष्टुप्छन्दो मन्त्रलिङ्गोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजा-पतये ॥ ततोग्निमध्ये इन्द्रायस्वाहा इदमिन्द्राय इत्याघारौ । ततो-ग्निपूर्वार्धे अग्नयेस्वाहा इदमग्नये । सोमाय स्वाहा इदं सोमाय । इत्याज्यभागौ ॥ भूरादिव्याहृतित्रयस्य प्रजापतिऋषिर्गायत्र्यु-ष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनि-योगः ॥ ॐ भूः स्वाहा इदं भूः । ॐ भुवः स्वाहा इदं भुवः । ॐ स्वः स्वाहा इदं स्वः ॥ एता महाव्याहृतयः । अक्षतैः पूर्वे ऋग्वेदायः नमः। दक्षिणे यजुर्वेदाय नमः। पश्चिमे सामवेदायनमः। उत्तरे अथर्ववेदाय नमः। आवाहयेत् ॥ आवइति प्रजापतिर्ऋषि-रनुष्टुप्छन्दोग्निर्देवता अग्निविशेषावाहने विनियोगः ॥ ॐआवो-देवासईमहे वामं प्रयत्यध्वरे।आवोदेवास आशिषो यज्ञियासोहवा-महे ॥ स्वस्तिशक्तिकपाशाङ्कुशवरदाभयदधत्रिमुकुटादिविविध-भूषणैर्भूषितोवताच्चिरंपावकःप्रसन्नोनः । हरकोमलकमलपिङ्गल-लोहितलोचनं त्रिशिखं वेदशिखं चक्रधरमक्षसूत्रकमण्डलुव्य-ग्रहस्तप्रजकस्कन्धसमारूढं दिव्यरूपं सुपूजितं वैश्वानरमहमा-वाहयिष्ये ॥ अग्ने वैश्वानर जातवेद इहावहलोहिताक्ष सर्वकर्म्माणि साधय स्वाहा ॥ तावत्त्वं तिष्ठ यावन्मे ब्रह्मकर्म्म समाप्यते। प्रतिभावसुपस्कृत्य वैश्वानर यथासुखम् ॥ अग्नेऽत्र त्वं सुप्रति-ष्ठितो भवेति वैश्वानरपृष्ट इति मन्त्रद्वयस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छ-

न्दोग्निर्देवताग्निपूजने विनियोगः। ॐ वैश्वानरोनऊतयआ-
प्रपातु परावतः। अग्निर्नसुष्टुतीरूपः॥ ॐ पृष्टोदिविपृष्टोअग्निः
सनोदिवासरिषः स्याचुनक्तमितिद्वाभ्यांमन्त्राभ्यां वा सम्पूज्य॥
काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुचिस्तथैव लोलायमाना इति सप्तजिह्वाः॥
इति सप्तजिह्वामुद्रां प्रदर्श्य चतुर्थ्यन्तनाममन्त्रैः सम्पूज्य प्रार्थ-
येत्॥ ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः॥ तदेवशुक्रं
तद्ब्रह्मताआपः स प्रजापतिः॥ सर्वे निमेषा जज्ञिरेविद्युतः पुरु-
षादधि।नैनमूर्ध्वन्नतिर्य्यञ्चन्नमध्येपरिजग्रभत्॥ नतस्यप्रतिमाअ-
स्तियस्यनाममहद्यशः।हिरण्यगर्भ इत्येषः मामाहिꣳसीदित्येषाय-
स्मान्नजात इत्येषः॥ एषहि देवः प्रदिशोनुसर्वाः पूर्वोजातः स
उगर्भे अन्तः।स एव जातः सजनिष्यमाणः प्रत्यञ्जनांस्तिष्ठति
सर्वतोमुखः॥ चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्तह-
स्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याꣳआ-
विवेश॥पिङ्गभ्रूः श्मश्रुकेशान्तः पिङ्गाक्षो जटिलोरुणः। छागस्थः
साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः॥ रुद्रतेजःसमुद्भूतं द्विमूर्धानं
द्विनासिकम्॥ याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम्॥
स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणैः॥ तोमरं व्यजनं चैव
घृतपात्रं तु वामकैः॥ बिभ्रन्तं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम्॥
दक्षिणं तु चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखम्॥ द्वादशकोटिमूर्त्याख्यं
द्विपञ्चाशत्कलायुतम्॥ स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम्।
रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम्॥ रौद्रं वागीश्वरीरूपं
वह्निमावाहयाम्यहम्॥ त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते॥
आगच्छ भगवन्नग्ने यज्ञेऽस्मिन्सन्निधौ भव॥ पाद्यम्॥ मन्दा-
किन्याः समानीतं शुद्धपात्रस्थमुत्तमम्।पाद्यं परिश्रमहरं गृहाणाग्ने

नमोस्तु ते॥अर्घ्यम् ॥ स्वर्णपात्रस्थितं दिव्यं नानापद्मैः सुशोभितम् ॥ गृहाणाग्ने मयानीतमर्घ्यं सर्वसुखावहम् ॥ पंचामृतम् ॥ दधिदुग्धाज्यमधुभिः कल्पितं शर्करायुतम् ॥ पञ्चामृतं गृहाणाग्ने स्नानार्थं सर्वसिद्धिदम् ॥ आचमनीयम् ॥ कर्पूरवासितं वारि मन्दाकिन्याः समाहृतम्॥आचमार्थं गृहाणाग्ने मुदा सर्वशुभंकरम्॥ स्नानीयम्।सरस्वतीगौतमीभ्यां समानीतं शुभं जलम् ॥ कस्तूरीशशिसंयुक्तं गृह्णाग्ने स्नानहेतवे ॥ वस्त्रम् ॥ अतिसूक्ष्ममखण्डं च शुद्धोर्णाकल्पितं मया॥लज्जानिवारकं वस्त्रं गृहाणाग्ने समाहृतम् ॥ चन्दनम्॥श्रीखण्डवासितं दिव्यं चन्दनं चन्द्रसन्निभम् ॥ भालशोभाकरं गृह्ण मयानीतं धनञ्जय ॥ अक्षतान् ॥ शुद्धमुक्ताफलाभैस्तैरक्षतैः शशिसन्निभैः॥द्योतयामि जगद्धातः प्रसीदाग्ने शुभं कुरु॥ पुष्पाणि॥ पुष्पाणि मल्लिकाजातीचम्पकादीनि यानि च ॥ गृह्णाग्ने तानि सर्वाणि समानीतानि सर्वतः॥धूपम् ॥ वनस्पतिरसोत्पन्नो गन्धाढ्यः सुमनोहरः ॥ आघ्रेयोऽग्ने मयानीतो गृह्यतां परमेश्वर ॥ दीपम् ॥ साज्यसद्वर्त्तिकायुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ नैवेद्यम् ॥ द्राक्षाखण्डलवङ्गैलामारीचेक्षुफलानि च॥गृहाणाग्ने भक्ष्य मुदा मम यज्ञविवृद्धये॥ जलम् ॥ गङ्गादितीर्थसम्भूतं नानागन्धसमन्वितम् ॥ करास्यपादशुद्ध्यर्थं गृहाणाग्ने मयाहृतम्॥उपायनम् ॥ हिरण्यगर्भगर्भस्थं हैमं बीजं विभावसोः॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ फलम् ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ इति फलम् ॥ कुण्डस्य मध्यमं पार्श्वमग्नेरास्यं प्रकीर्त्तितम् ॥ तस्मिन् सर्वाणि कार्य्याणि साधनीयानि नित्यशः॥नमस्कारः॥नमस्ते देवदेवेश नमस्ते वरद प्रभो । वैश्वानर नमस्तेऽस्तु सर्वदा मङ्गलं कुरु ॥ त्वन्नो अग्ने सत्वन्नो

अग्ने इति द्वयोर्वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्त-होमे विनियोगः॥ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳ सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नो अग्ने वमोभवोतीनेदिष्ठो अस्याउषसो व्युष्टौ । अवयक्ष्वनो वरुणꣳ रराणो वीहिमृडीकꣳ सुहवो न एधि स्वाहा॥इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्न इति विराड् ऋषिर्गायत्री छन्दोऽग्निर्देवता प्रायश्चित्त-होमे विनियोगः ॥ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्व-मया असि। अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये॥ ये ते शतमिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो मन्त्रलि-ङ्गोक्ता देवताः। प्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः॥उदुत्तममिति शुनः-शेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्तहोमे विनियोगः॥ ॐउदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथावयमादित्यव्रतेतवानागसोअदितये स्याम स्वाहा । इदं वरुणायादितये। चतुर्भागं तिलान्नं च द्विभागं चाज्यमेव च। यवान्नं तु त्रिभागं स्याद्भागमेकं तु तण्डुलम् ॥ तिलाः स्युः षोडशप्रस्था यवा द्वादश तण्डुलाः। चत्वारो गोघृतं चाष्टप्रस्थं यागेऽयुतात्मके ॥ तिस्रो मुद्राः समाख्याता मृगी हंसी च सूकरी। तासु मृग्येव शुभदा वैदिके होमकर्म्मणि ॥ ऋत्विक्प्रार्थना । अस्य यागस्य निष्पत्तौ भवन्तः प्रार्थिता मया। सुप्रसन्नाः प्रकुर्वन्तु यागकर्म्म यथोचितम् ॥ गणाधिपतये देया प्रथमा या वराहुतिः। अन्यथाकरणे दोषो व्रतिनाशकरः स्मृतः ॥ ऋत्विजो

विनियोगपूर्वकहोमं कर्य्युः। ग्रहमन्त्रहोमानन्तरं ग्रहयागपद्धत्युक्त-देवतानां वैदिकमन्त्रैर्होमं कारयित्वा स्तम्भपूजनपद्धत्युक्तप्रकारेण दिक्पालेभ्यो बलिं दत्त्वोत्तराङ्गहोमः कर्त्तव्यः॥ अद्येत्यादि॰ अमुकोऽहं ममास्य पुत्रस्य करिष्यमाणचूडोपनयनवेदारम्भसमा-वर्त्तनकर्म्मसु कारितस्य ब्राह्मणद्वारा नवग्रहमन्त्राङ्गहोमकर्म्मण उत्तराङ्गसिद्ध्यर्थे होमं करिष्ये॥ व्याहृतित्रयस्य प्रजापतिर्ऋषिर्गा-यत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता उत्तराङ्गहोमे विनियोगः॥ ॐ भूः स्वाहा इदमग्नये। ॐ भुवः स्वाहा इदं वायवे । ॐ स्वः स्वाहा इदं सूर्य्याय॥ पुनः प्रायश्चि-त्तहोमं कृत्वा॥ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो-ऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः॥ ॐ प्रजापतये स्वा इदं प्रजापतये॥ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निद-वता स्विष्टकृद्धोमे विनियोगः॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते। संस्रवं प्राश्य ब्रह्मणे पूर्णपात्रं दद्यात् पाद्या-दिभिः पूर्णपात्रं सम्पूज्य अद्येत्यादि॰ मया कारितस्य ब्राह्मणद्वारा नवग्रहमन्त्राङ्गहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः साङ्ग-तासिद्ध्यर्थे इदं तण्डुलपूर्णपात्रं सदक्षिणं प्रजापतिदैवतममुकगोत्रा-यामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे इति दत्त्वा। ॐ अक्रन्कर्म्मकर्म्मकृतः सह वाचा मयो भुवा। देवेभ्यः कर्म्मकृत्वास्तं प्रेतसचाभुवः। स्वस्तीतिब्राह्मणः प्रतिब्रूयात्। ततः पूर्णाहुतिहोमः॥ अद्येत्यादि॰मयाकारितस्य ब्राह्मणद्वारानवग्रहमन्त्राङ्गहोमकर्म्मणः पूर्णतासिद्ध्यर्थे मृडनामाग्नौ पूर्णाहुतिहोमं करिष्ये॥ पाद्यादिभिर्मृ-डाग्निं सम्पूज्य रक्तसूत्रेण स्रुवं वेष्टयेत्॥ तत्र मन्त्रः॥ ॐ स्रुचश्च मे चमसा च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मे धिषवणश्च मे पूतभृच्च मे आहवनीयश्च मे वेदिश्च मे बर्हिषश्च

मे बभूथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् । स्रुवपात्रे सयज्ञदण्डं पीतवस्त्राच्छादितं घृताभिघारितं नारिकेलफलं संस्थाप्य वामहस्ते धृत्वा उत्थाय यजमानः समुद्रादिति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ समुद्रादूर्म्मिर्मधुमाँऽउदारदुपाꣳशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः स्वाहा ॥ मूर्धानमिति भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐमूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृतमाजातमग्निम् । कविꣳसम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा ॥ पुनरिति सोमाहुतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । पुनस्त्वादित्यारुद्रावसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथयज्ञैः । घृतेन त्वंतन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्यऽओषधीभ्यः स्वाहा ॥ पूर्णादर्वीति हिरण्यगर्भऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवतापूर्णाहुतिहोमेविनियोगः ॥ ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो ॥ सप्त इति सप्तानां मन्त्राणां सप्तर्षय ऋषयः १ त्रिष्टुम् २-५ उष्णिक् ३-४-७ गायत्री ६ जगती अग्निरपरेषां मरुतो देवताः पूर्णाहुतिहोमे विनियोगः । ॐ सप्त त अग्ने समिधः सप्तजिह्वाः सप्तर्षयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधात्वा यजन्ति सप्त योनीरापृणस्व घृतेन ॥ ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यꣳहाः । ॐ ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च मितश्च सम्मितश्च सभराः । ॐ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ताच विधर्त्ता च विधारयः । ॐ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमि-


त्रश्च दूरे अमित्रश्च गणः । ॐ ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतेन । मितासश्च समितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥ ॐ स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी ॥ धामन्त इति वामदेवऋषिर्जगती छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ धामन्ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि । अपामनीके समिथे य आभृतस्तमस्याम मधुमन्तं त ऊर्मिम् स्वाहेति समिद्धतमेऽग्नौ घृतधारया सह जुहयात् । ततः स्रुवहस्तः सर्त्विगाचार्य्यः प्रदक्षिणाचतुष्टयं कुर्य्यात् । ॐ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे स्रुवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् । ॐ प्राणश्च मेऽपानश्च मे व्यानश्च मे सुश्च मे चित्तं च मे आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥ ॐ ओजश्च म सहश्च म आत्मा च मे तनू च मे शर्म्म च मे वर्म्म च मेंगानि च मेऽस्थीनि च मे परूꣳषि च म शरीराणि च मे आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥ ॐ ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे मश्च मेंभश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ॐ प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ तनूपा इति अवत्सार ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताग्न्यालम्भने विनियोगः । ॐ तनूपा अग्नेसि तन्वं मे पाह्यायुर्दाग्नेस्यायुर्मे देहि वर्चोदाग्नेऽसि

वर्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृण मेधां मे देवः सविता आदधातु मेधां देवी सरस्वती आदधातु मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ततः सुमित्रियान इति दध्यङ्ङाथर्वण ऋषिरापो देवताः शिरःप्रोक्षणमार्जने विनियोगः।ॐ सुमित्रियान आप ओषधयः सन्तु इति सपवित्रहस्ताभ्यां प्रणीताजलेन शिरः सम्प्रोक्ष्य दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति शिरोमार्गेण प्रणीतां भ्रामयित्वैशान्यां न्युब्जीकुर्य्यात् ।ततः परिस्तरणक्रमेण घृताक्तं बर्हिरुत्थाप्य । देवागात्विति अत्रिऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता घृताक्तबर्हिर्होमे विनियोगः । ॐ देवागातुविदोगातुं वित्त्वागातुमितमनसस्पत ॥ इमं देवयज्ञ ँ स्वाहा वातेधाः स्वाहा । इति हस्तेन जुहुयात् । त्र्यायुपकरणम् । त्र्यायुषमिति नारायणऋपिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरणे विनियोगः । ॐ त्र्यायुषं जमदग्नेरिति ललाटे, कश्यपस्य त्र्यायुषमिति ग्रीवायाम्,यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले,तन्नो अस्तु त्र्यायुषमिति हृदि बिन्दुरूपम् । यज्ञदशांशं तर्पणम्, तद्दशांशं मार्जनम्, तद्दशांशं ब्राह्मणभोजनम् । ततः प्रार्थना । श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं बलं श्रियम् ॥ आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥इति विसर्ज्जनम्॥ॐ गच्छ त्वं भगवन्नग्ने स्वस्थानं कुण्डमध्यतः।हव्यमादाय देवभ्यः शीघ्रं देहि प्रसीद मे॥

दक्षिणानियमः ।

स्वर्णं रौप्यं च ताम्रं तदितरमथ यच्चापलं दक्षिणा स्यादाचार्यांशार्धमेवं ग्रहहवनकृतामर्धकं द्वारपाणाम् ॥ अन्याग्नेभ्यो यथास्वं सुरुचिरवसनाभूषणानि प्रदद्यादीनानाथांश्च बन्धूञ्छ्रुतिहतविमतींस्तर्प्पयेदध्वरेऽन्नैः ॥

सप्तदशरेखात्मकसर्वतोभद्रम् ।



चतुरस्त्रे चतुष्कोष्ठे कर्णसूत्रसमन्विते । चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम् ॥ मध्येमध्ये यथा मत्स्या भवेयुः पातयेत्तथा । पूर्वापरायते द्वेद्वे मन्त्री याम्योत्तरायते । पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयम् । पूर्ववत्कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ॥ तदुद्भूतेषु मत्स्येषु दद्यात्सूत्रचतुष्टयम्॥ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत् ॥ यावच्छतद्वयं मन्त्री षट्पञ्चाशत्पदान्यपि । तावत्तेनैव विधिना तत्र सूत्राणि पातयेत् ॥ षट्त्रिंशतापदैर्मध्ये लिखेत्पद्मं

सुलक्षणम्।बहिः पंक्त्या भवेत्पीठं पंक्तियुग्मेन वीथिका ॥द्वारशोभोपशोभास्राङ्घ्रिप्राभ्यां परिकल्पयेत्। शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत् ॥ पद्मक्षेत्रस्य सन्त्यज्य द्वादशांशं बहिः सुधीः। तन्मध्यं विभजेद्वृत्तैस्त्रिभिः समविभागतः ॥ आद्यं स्यात्कर्णिकास्थानं केशराणां द्वितीयकम्। तृतीयं तत्र पत्राणां मुक्तांशेन दलाग्रकम् ॥ बाह्यवृत्तान्तरालस्य मानेन विधिना सुधीः। निधाय केशराग्रेषु परितोऽर्धनिशाकरान् ॥ लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत्। दलाग्राणां च यन्मानं तन्मानाद्वृत्तमालिखेत् ॥ तदन्तरालतन्मध्यसूत्रस्योभयतः सुधीः। आलिखेद्वाह्यहस्तेन दलाग्राणि समन्ततः ॥ दलमूलेषु युगशः केशराणि प्रकल्पयेत्। एतत्साधारणं प्रोक्तं पङ्कजं तत्र वेदिभिः। पदानि त्रीणि पादार्थं पीठकोणेषु मार्जयेत् ॥अवशिष्टैःपदैर्विद्वान् पीठगात्राणि कल्पयेत्। पदानि वीथिसंस्थानि मार्जयेत्पंक्त्यभेदतः ॥ दिक्षु द्वाराणि रचयेद्द्विचतुष्कोष्ठकैस्ततः। पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वतः ॥ उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम्। अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम् ॥ रञ्जयेत्पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम्। पीतं हरिद्राचूर्णं स्यात्सितं तण्डुलसम्भवम् ॥ कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम्। बिल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम् ॥ अंगुलोत्सेधविस्तारा सीमारेखा सिताशुभा।कर्णिका पीतवर्णेन केशराण्यरुणेनच ॥ शुक्लवर्णेन पत्राणि तत्सन्धीञ्श्यामलेन तु। रजसा रञ्जयेन्मन्त्री यद्वा पीतैव कर्णिका॥केशराः पीतरक्ताः स्यू रक्तानि च्छदनानि च। सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा॥रञ्जयेत्पीठगर्भाणि पादाः स्युररुणप्रभाः। गात्राणि तस्य शुक्लानि वीथीष्वपि चतुसृषु ॥ आलिखेत्कल्पलतिकां सर्वदृष्टिमनोहराम्।

वर्णैर्नानाविधैश्चित्रां दलपुष्पफलान्विताम् ॥द्वाराणि श्वेतवर्णानि कोणान्यसितभानि चारक्ता शोभा सम्मुद्दिष्टोपशोभावुपिशङ्गिला॥ तिस्रो रेखा बहिः कुर्य्यात्सितरक्तासिताः क्रमात् । मण्डलं सर्वतोभद्रमेतत्साधारणं स्मृतम् ।पृथ्व्यादिचतुराशीतिदेवानां स्थापनाय च॥ अद्येत्यादि० अमुकशर्म्माहं ममास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणाय द्विजत्वसम्पादकश्रौतस्मार्त्तकर्म्मानुष्ठानसिद्धिद्वारा ब्रह्मवर्चोभिवृद्ध्येकरिष्यमाणचूडोपनयनवेदारम्भसमावर्त्तनकर्म्मसु तदुपयोग्ययुतात्मकनवग्रहमखमण्डपे मखसंरक्षणाय पूर्वाङ्गतया सप्तदशरेखानिर्म्मितषट्पञ्चाशदधिकशतद्वयकोष्टकृतसर्वतोभद्रविभक्तपदगतपृथ्व्यादिसप्तसरित्पर्य्यन्तचतुरशीतिदेवतानां पूजनं करिष्ये। वरुणविधिना वरुणं सम्पूज्य प्रतिमाः संस्थाप्य जलाक्षतपुष्पैः पूजनं कुर्य्यात् । तद्यथा-तत्रादौ कर्णिकायाम्। स्योना पृथिवीति मेधातिथिर्ऋषिर्गायत्रीछन्दः पृथ्वी देवता पृथ्व्यावाहने विनियोगः। ध्यानम्। शुक्लवर्णा मही कार्य्या दिव्याभरणभूषिता। चतुर्भुजा रत्नसस्योषधिपात्रसरोजयुक् ॥ ऋक्—ॐ स्योना पृथिविनोभवानृक्षरानिवेशनी ।यच्छानः शर्म्म सप्रथाः॥ॐभूर्भुवः स्वः पृथ्वीहागच्छेह तिष्ठह सुप्रतिष्ठिता वरदा भव॥ द्वितीये केशराख्यपदे मेरुम्। प्रपर्वतस्येति देववात ऋषिस्त्रिष्टुप्छन्दो मेरुर्देवता मेर्वावाहने विनियोगः। ध्यानम्-सर्वरत्नौषधिमयः पृथ्वीमध्यपदः प्रभुः। उत्तुङ्गशिखरः कार्य्यो मेरुः पर्वतपूजितः ॥ ऋक् ॐ प्रपर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः । ता आववृत्रन्नधरागुदक्ता अहिर्बुध्न्यमनुरीयमाणाः । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ ॐ भूर्भुवःस्वः मेरो इहागच्छेह तिष्ठ ॥ तृतीये पत्रस्थाने ब्रह्माणम्—ब्रह्मजज्ञानमिति गौतमऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता ब्रह्मावाहने

विनियोगः । ध्यानम्--चतुर्भुजो हंसपत्रश्चतुराननशोभितः ॥ चतुर्वेदधरः शुभ्रो ब्रह्मा विश्वैककारणम्॥ऋक् ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः । सबुध्न्याउपमा अस्यविष्ठा-सतश्च योनिमसतश्च विवः ॥ ॐभूर्भुवः स्वः ब्रह्मन्निहागच्छेति । बहिरीशाने ईशानम् । तमीशानमिति गोतमऋषिर्जगतीछन्द ईशानोदेवतेशानावाहने विनियोगः । ध्यानम् । त्रिदृङ्भस्माख्य ईशानो वृषवाहो जटाधरः । पञ्चवक्रो महायोगी कर्त्तव्यः सर्वशंकरः ॥ ऋक्-ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसेहूमहे वयम् ॥ पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ॐ भूर्भुवः स्वः ईशानेहागच्छेति॰।पूर्वे इन्द्र-म् । त्रातारमिति गर्ग ऋषिस्त्रिष्टुप्छन्द इन्द्रोदेवतेन्द्रावाहने विनि-योगः । ध्यानम्-ऐरावतसमारूढो वज्री स्वर्लोकराड् विभुः । इन्द्रः शतक्रतुर्देवो नानालङ्कारभूषितः ॥ ऋक्-ॐ त्रातारमि-न्द्रमवितारमिन्द्रꣳहवेहवे सुहवꣳशूरमिन्द्रम्।ह्वयामि शक्रं पुरुहूतमि-न्द्रꣳ स्वस्ति नो मघवाधात्विन्द्रः ॥ ॐ भूर्भुवः स्वः इन्द्रेहाग-च्छेति । आग्नेय्यामग्निम् । त्वन्नो अग्नेति वामदेव ऋषिस्त्रिष्टुप्छ-न्दोग्निर्देवताग्न्यावाहने विनियोगः । ध्यानम् । मेषवाहो महातेजा द्विमूर्द्धा च द्विनासिकः । सप्तहस्तः सायुधश्च कर्त्तव्योग्निः सशक्तिकः ॥ ऋक्-ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः ।यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ ॐ भूर्भुवः स्वः अग्ने इहागच्छेति । दक्षिणे यमम् । यमायत्वेति दध्यङ्ङाथर्वण ऋषिर्यजुश्छन्दो यमो देवता यमावाहने विनियोगः । ध्यानम्-यमो राजा चतुर्हस्तो बृहद्वक्षा विशालदृक् । दण्डखड्गाभयकरो नीलाञ्जननिभोपमः ॥ ऋक्-ॐ यमायत्वाङ्गिरस्वते पितृमते

स्वाहा धर्म्माय स्वाहा धर्म्मः पित्रे॥ ॐभूर्भुवःस्वः यमेहागच्छेति।
नैर्ऋत्यां निर्ऋतिम्।असुन्वन्तमिति मधुच्छन्दा ऋषिस्त्रिष्टुप्छन्दो
निर्ऋतिर्देवता निर्ऋत्यावाहने विनियोगः। ध्यानम्। प्रेतवाहो
रक्तनेत्रो विकृतास्योऽसिसत्करः। पाशभृन्निर्ऋतिः कार्य्यो यज्ञर-
क्षणहेतवे॥ ऋक्—ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येमन्विहि
तस्करस्य।अन्यमस्मदिच्छसात इत्यानमो देव निर्ऋते तुभ्यमस्तु॥
ॐ भूर्भुवःस्वः निर्ऋते इहागच्छेति। पश्चिमे वरुणम्। तत्त्वायाया-
मीति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता वरुणावाहने
विनियोगः। ध्यानम्। कुम्भीरथसमारूढः पाशभृन्मकराश्रयः।
कर्त्तव्यः सागराधीशो वरुणः पश्चिमाश्रितः॥ ऋक्—ॐतत्त्वायामि
ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो
वरुणेह बोध्युरुशꣳसमान आयुः प्रमोषीः॥ ॐ भूर्भुवः स्वः
वरुणेहागच्छेति। वायव्यां वायुम्। वातोवामन इति बृहस्पतिऋ-
षिरुष्णिक्छन्दो वायुर्देवता वाय्वावाहने विनियोगः। ध्यानम्।
मृगारूढो महावेगः खड्गहस्तः समीरणः। सर्वाभरणभूषाढ्यो
वायुर्ध्वजधरः शुभः॥ ऋक्—ॐ वातो वा मनो वा गन्धर्वाः
सप्तविꣳशतिः ते अग्नेश्वप्रयुजंस्ते अस्मिन्नवमादधुः॥ ॐ भूर्भुवः
स्वः वायो इहागच्छेति। उत्तरे सोमम्। सोममिति बापस ऋषि-
रनुष्टुप्छन्दः सोमो देवता सोमावाहने विनियोगः॥ ध्यानम्।
दशाश्वरथगामी च श्वेतवर्णः सिताम्बरः। गदापाणिः प्रकर्त्तव्यः
सोमः सर्वकलान्वितः॥ ऋक्—ॐ सोमꣳराजानमवसेऽग्नि गीर्भिर्ह-
वामहे आदित्यान् विष्णुꣳ सूर्य्यं ब्रह्माणं च बृहस्पतिम्॥ ॐ
भूर्भुवः स्वः सोमहागच्छेति। बहिरीशान्यां रुद्रान्। अजैकपाद-
हिर्बुध्न्योविरूपाक्षोऽथ रैवतः।हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी रुद्रसंज्ञकाः। एकादशेमे सम्पूज्या
महायज्ञे त्रिशूलिनः॥ आरुद्रास इति श्यावाश्व ऋषिर्जगतीछन्दो

रुद्रा देवता रुद्राणामावाहने विनियोगः । ध्यानम् । रुद्राः करालवदना वरा भयकराः शुभाः । जटाजूटधराः कार्य्या यज्ञ-क्षणतत्पराः ॥ ऋक्—ॐ आरुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय । गन्तन इर्यवो अस्मत्प्रतिहर्य्यते मतिस्तृष्णजेनदिव उत्साऽउदन्यवे ॥ ॐ भूर्भुवः स्वः रुद्रा इहागच्छतेति । इन्द्रदक्षे वसून् । ध्रुवोऽध्वरश्च सोमश्चानल आपोऽनिलस्तथा । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ ज्मया इति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो वसवो देवता वसूनामावाहने विनियोगः । ध्यानम् । दिव्यवस्त्रा दिव्यदेहा दिव्यमाल्यविभूषणाः । कर्त्तव्या वसवः सौम्या यागशान्तिविधायकाः ॥ ऋक् । ॐ ज्मया अत्र वसवो रन्तदेवा उरावन्तरिक्षे मर्जयन्त शुभ्राः । अर्वाक्पथ उरुत्रयः कृणुध्वश्श्रोता दूतस्य जग्मुषो नो अस्य ॥ ॐ भूर्भुवः स्वः वसव इहागच्छतेति । इन्द्रवामे आदित्यान् । धाता रुद्रोर्य्यमा मित्रो वरुणः सूर्य्य एव च । भगो विवस्वान् पूषा च सविता त्वाष्ट्रकोऽच्युतः ॥ त्यान्निति सामद ऋषिर्गायत्रीछन्द आदित्या देवता आदित्यानामावाहने विनियोगः । ध्यानम् । आदित्या अरुणाः कार्य्याः सप्ताश्वरथमास्थिताः । अस्य यागस्य शान्त्यर्थं वराभयकराः शुभाः ॥ ऋक्—ॐ त्यान्यक्षत्रियाँ अव आदित्यान्याचिषामहे । सुमृलीका अभिष्टये ॥ ॐ भूर्भुवः स्वः आदित्या इहागच्छतेति । अग्निदक्षेऽश्विनौ ॥ सनत्कुमारवैधात्रौ ज्ञातव्यावश्विनौ शुभौ । अश्विनाविति गोतम ऋषिरुष्णिक्छन्दोऽश्विनौ देवतेऽश्विनोरावाहने विनियोगः । ध्यानम् । सनत्कुमारवैधात्रौ कार्य्यौ द्वावश्विनौ शुभौ । द्विभुजौ देवभिषजौ सूर्य्यतेजोधरौ सदा । ऋक्—ॐ अश्विनावर्त्तिरस्मिदागोमद्दस्राहिरण्यवत् । अर्वाग्रथं समनसा नियच्छन्तम् । ॐ भूर्भुवः स्वः अश्विनाविहाग-

च्छतमिति । अग्निवामे विष्णुम् । विष्णोरराटमिति उतथ्य ऋषि-र्यजुश्छन्दो विष्णुर्देवता विष्णवावाहने विनियोगः । ध्यानम् । कार्य्यो विष्णुः शंखचक्रगदापद्मधरः क्रमात्॥ वनमालालसद्ग्रीव-श्चतुर्हस्तः सुरेडितः । ऋक्-ॐविष्णोरराटमसि विष्णोंश्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छेति । यमदक्षे दुर्गाम् । तामिति सौभ-रिऋषिस्त्रिष्टुप्छन्दो दुर्गा देवता दुर्गावाहने विनियोगः। ध्यानम् । शंख चक्रं कृपाणं च त्रिशूलं बिभ्रती करैः ॥ श्यामलाभ्रनिभा दुर्गा कार्य्या यज्ञप्रशान्तये॥ऋक्-ॐ तामग्निवर्णां तपसा ज्वलन्तीं वैरो॰ चनीं कर्म्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः । ॐभूर्भुवःस्वः दुर्गे इहागच्छेति। यमवामे स्वधाम् ।उदीरिता-मिति शंख ऋषिस्त्रिष्टुप्छन्दः स्वधा देवता स्वधावाहने विनियोगः॥ ध्यानम्।पितृप्रीतिकरा शक्तिः पाशमुद्गरधारिणी॥ शुभ्रवर्णा यज्ञ-शान्त्यै कर्त्तव्या द्विकरा स्वधा ॥ ऋक्-ॐ उदीरितामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।असुं य ईयुरवृका ऋतज्ञास्तेनोवन्तु पितरो हवेषु ॥ ॐभूर्भुवःस्वः स्वधे इहागच्छेति॰ । निर्ऋतिदक्षे मृतिम्। परंमृत्योरिति संकुसुकऋषिस्त्रिष्टुप्छन्दो मृतिर्देवता मृत्या-वाहने विनियोगः। ध्यानम्।मृतिः कार्य्या खड्गदण्डकरा श्यामल-रूपिणी।कालशक्तिर्महाशक्तिर्यज्ञकर्म्मसमृद्धये॥ ऋक्-ॐ परं मृत्यो अनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजाᳪरीरिषो मोत वीरान्॥ॐभूर्भुवः स्वः मृते इहा-गच्छेति।निर्ऋतिवामे दक्षम्।आदितिरिति बृहस्पतिर्ऋषिरनुष्टुप्छन्दो दक्षोदेवता दक्षावाहने विनियोगः। ध्यानम् । दक्षः सुनेत्रो द्विभुजो वराभयधरः क्रमात् । पीताम्बरः पीतवपुः कर्त्तव्यो देवसंस्तुतः ॥ ऋक्-ॐ अदितिर्ह्यजनिष्ठ दक्षयातवतां देवाँ अन्वजायन्त भद्रा

अमृतबन्धवः ॥ ॐ भूर्भुवः स्वः दक्षेहागच्छेति । वरुणदक्षिणे गणपतिम् । गणानान्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गणपतिर्देवता गणपत्यावाहने विनियोगः । ध्यानम् । दन्ताक्षसूत्रपरशुमोदकान्धारयन्सदा । गजाननो गणपतिर्नागयज्ञोपवीतवान् । ऋक्--ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणांत्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे वसो मम । आहमजानि गर्भधमात्वमजासि गर्भधम् ॥ ॐ भूर्भुवः स्वः गणपते इहागच्छेति । वरुणवामे स्कन्दम् । यत्रेति अप्रतिरथ ऋषिः पंक्तिश्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः।ध्यानम् । शुक्लाम्बरधरः कार्य्यो मयूरवरवाहनः । स्कन्दो रक्तः षण्मुखोत्र यज्ञरक्षणहेतवे॥ऋक्--ॐ यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव । तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु॥ॐ भूर्भुवः स्वः स्कंदेहागच्छेति । वायुदक्षिणे गन्धर्वम् । गन्धर्वस्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गन्धर्वो देवता गन्धर्वावाहने विनियोगः।ध्यानम् । गन्धर्वोरणलावण्यकलाकौशलतत्परः। विचित्रवस्त्राभरणः कार्य्यो वीणाप्रवादनः ॥ ऋक्--ॐ गन्धर्वस्त्वा विश्वावसुःपरिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः॥ॐभूर्भुवः स्वः गन्धर्वेहागच्छेति । वायुवामे ऋषभम् । ऋषभमिति वैराज ऋषिरनुष्टुप्छन्दो ऋषभो देवता ऋषभावाहने विनियोगः। ध्यानम् । ऋषभोऽजिनसंविष्टःशुभ्रवासाः सुसौम्यदृक् । कर्त्तव्योत्राक्षमालाकमण्डलुर्द्विभुजो विभुः ॥ ऋक्--ॐऋषभं मासमासानां सपत्नानां विषासहिम्।हन्तारं कृधि शत्रूणां विराजं गोपतिं गवाम् ॥ॐ भूर्भुवः स्वः ऋषभेहागच्छेति सोमदक्षिणे प्रजापतिम् । प्रजापत इति हिरण्यगर्भ ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापत्यावाहने विनियोगः । ध्यानम् । एकवक्त्रश्चतुर्हस्तोऽक्षस्रुक्स्रुवकुण्डिकाः । पुस्तकं धारयन्देवः

कर्त्तव्योत्र प्रजापतिः ॥ ऋक्–ॐ प्रजापते नत्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ ॐ भूर्भुवः स्वः प्रजापते इहागच्छेति । सोमवामेऽदितिम् । अदितिर्द्यौरिति गौतम ऋषिस्त्रिष्टुप्छन्दोऽदितिर्देवताऽदित्यावाहने विनियोगः। ध्यानम्।अदितिर्द्विभुजाकार्य्या पद्महस्ता सुभूषणा । सुरूपा वामदृग्देवी यज्ञकार्य्यप्रसाधिनी ॥ ऋक्–ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवाऽदितिः पञ्चजनाऽदितिर्जातमदितिर्जनि त्वम् ॥ ॐ भूर्भुवः स्वः अदिते इहागच्छेति । ईशानदक्षे ध्रुवम् । ध्रुवासीति प्रजापतिर्ऋषिर्गायत्री छन्दो ध्रुवो देवता ध्रुवावाहने विनियोगः । ध्यानम् । शुभ्रवर्णो ध्रुवः कार्य्यो द्विहस्तोऽभयदर्प्पहा । वराभयकरो यज्ञशान्तौ विघ्नविनाशनः ॥ ऋक्–ॐ ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया॥ॐ भूर्भुवः स्वः ध्रुवेहागच्छेति । अन्तरेशानीदिशमारभ्य नाममन्त्रैर्मन्त्राभावे तारपूर्वं चतुर्थ्यन्तं समुच्चरेत् । नाम तन्नाममन्त्रेति संज्ञया प्रकटीकृतम् । ॐ वैनायिक्यै नमःॐभूर्भुवः स्वः वैनायिकीहागच्छेति । पूर्वे।ॐ ऐन्द्र्यै नमः।ॐ भूर्भुवः स्वः ऐन्द्रीहागच्छेति । आग्नेय्याम् । ॐ कौमार्यै नमः ॐ भूर्भुवः स्वः कौमारीहागच्छेति । दक्षिणे । ॐ ब्राह्म्यै नमः ॐ भूर्भुवः स्वः ब्राह्मीहागच्छेति । नैर्ऋत्याम् । ॐ वाराह्यै नमः ॐ भूर्भुवः स्वः वाराहीहागच्छेति । पश्चिमे । चामुण्डायै नमः ॐ भूर्भुवः स्वः चामुण्डे इहागच्छेति । वायव्याम् ! ॐ वैष्णव्यै नमः ॐ भूर्भुवः स्वः वैष्णवीहागच्छेति । उत्तरे।ॐऐश्वर्य्यै नमः ॐ भूर्भुवः स्वः ईश्वरीहागच्छेति। ईशानादिदिशां वामपार्श्वेषु। ॐ गौतमाय नमः ॐ भूर्भुवः स्वः गौतमेहागच्छेति । पूर्ववामे।

ॐ भरद्वाजाय नमः ॐ भूर्भुवः स्वः भरद्वाजेहागच्छेति । आग्नेयवामे–ॐ विश्वामित्राय नमः ॐ भूर्भुवः स्वः विश्वामित्रेहागच्छेति । दक्षिणवामे–ॐ कश्यपाय नमः ॐ भूर्भुवः स्वः कश्यपेहागच्छेति । नैर्ऋत्यवामे–ॐ जमदग्नये नमः ॐ भूर्भुवः स्वः जमदग्ने इहागच्छेति। पश्चिमवामे--ॐ वसिष्ठाय नमः ॐ भूर्भुवः स्वः वसिष्ठेहागच्छेति । वायव्यवामे--ॐ अत्रये नमः ॐ भूर्भुवः स्वः अत्रे इहागच्छेति । उत्तरवामे--ॐअरुन्धत्यै नमः ॐ भूर्भुवः स्वः अरुन्धतीहागच्छेति । वीथीशानदिशमारभ्य--ॐ त्रिशूलाय नमः ॐ भूर्भुवः स्वः त्रिशूलेहागच्छेति । पूर्वे--ॐ अशनये नमःॐ भूर्भुवः स्व अशने इहागच्छेति । आग्नेय्ये--ॐ शक्तये नमः ॐ भूर्भुवः स्वः शक्ते इहागच्छेति । दक्षिणे--ॐदण्डाय नमः ॐ भूर्भुवः स्वः दण्डेहागच्छेति । नैर्ऋत्ये--ॐ खड्गाय नमः ॐ भूर्भुवः स्वः खड्गेहागच्छेति। पश्चिमे-ॐ पाशाय नमः ॐ भूर्भुवः स्वः पाशेहागच्छेति । वायव्ये--ॐ अङ्कुशाय नमः ॐ भूर्भुवः स्वः अंकुशेहागच्छेति । उत्तरे--ॐ गदाय नमः ॐ भूर्भुवः स्वः गदे इहागच्छेति । वीथीषु पूर्वादिचतुर्दिक्षु मास इति प्रजापतिर्ऋषिर्गायत्रीछन्दो विश्वेदेवा देवता, विश्वेषां देवानामावाहने विनियोगः । ध्यानम् । विश्वेदेवा शुभ्रवर्णा मालापुस्तकधारिणः । पितॄणां ब्राह्मणाः कार्य्याः समूहात्मकरूपिणः ॥ ऋक्--ॐ मासश्चर्षणीधृतो विश्वेदेवास आगत दाश्वांसो दाशुषः सुतम् । ॐ भूर्भुवः स्वः विश्वेदेवा इहागच्छेति । दक्षिणे पितॄन् । आयन्त्विति शंख ऋषिस्त्रिष्टुप्छन्दः पितरोदेवताः पितॄणामावाहने विनियोगः।ध्यानम्।पितरः श्वेतवपुषः सोष्णीषाः स्रगलंकृताः । यज्ञरक्षाविधानेषु समूहात्मकरूपिणः ॥ ऋक्--ॐ आयन्तु नःपितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तुतेव-

ऽस्त्वस्मान्।ॐ भूर्भुवः स्वः पितर इहागच्छतेति।पश्चिमे सागरान्। लवणेक्षुसुरासर्प्पिर्दधिदुग्धजलाभिधाः। सागराः सप्त विख्याता यज्ञशान्तिविधायकाः ॥ धाम्न इति गौतम ऋषिर्गायत्री छन्दः सागराः देवताः सागराणामावाहने विनियोगः। ध्यानम्।सागराः सर्वरत्नाढ्याः शुभ्रवर्णा महाशयाः। यज्ञशान्तौ पूतदेहाः कर्त्तव्या मण्डलात्मकाः॥ ऋक् ॐ धाम्नोधाम्नो राजन्नितो वरुणोनु मुञ्च यदापो अघ्न्या इति वरुणेतिशयामहे ततो वरुण नो मुञ्च॥ ॐ भूर्भुवः स्वः सागरा इहागच्छतेति। उत्तरे सरितः। गंगा च यमुना चैव कावेरी नर्म्मदा तथा। गोदा सरस्वती सिन्धुः सप्तैताः सरितः स्मृताः॥ इममिति सन्धुक्षत्प्रैयमेध ऋषिर्जगती छन्दः सरितो देवताः सरितामावाहने विनियोगः। ध्यानम्। मीनवाहनसंस्थाश्च सरितः सप्त शोभनाः। कर्त्तव्याः श्वेत-वर्णाभा यज्ञशान्तिविधायिकाः॥ ऋक्--ॐ इमं मे गंगे यमुने सरस्वति शतदुस्तोमं सचतापरुष्ण्या। असिक्न्या मरुद्वृधे वितस्त-यार्जीकीये शृणुह्या सुषोमया॥ॐभूर्भुवः स्वः सरित इहागच्छतेति। विश्वेदेवपितृसागरसरितश्चतस्रो देवता ज्ञेयाः। आवाहनम्॥ ॐ आगच्छतागच्छत भो देवता यज्ञमण्डपे। क्रियमाणामिमां पूजां गृह्णीत परया मुदा॥आसनम्॥ नानारत्नसमायुक्तं कार्त्तस्वरविभू-षितम्। आसनं देवताः शुद्धं गृह्णीताध्वरसिद्धये॥ पाद्यम्॥ सुतप्तं तैजसे पात्रे निर्धूतं पावनं जलम्।पाद्यं गृह्णीत मन्नीतं देवताः सिद्धसेविताः॥ अर्घ्यम्॥गंगादितीर्थसम्भूतं गन्धपुष्पाक्षतैर्युतम्॥ अर्घ्यपात्रस्थितं तोयं गृह्णीत मम देवताः॥ आचमनीयम्॥ कर्पूरवासितं वारि स्वर्धुन्यादिभिराहृतम्। आचम्यतां मया सर्वा देवता यज्ञसिद्धये। स्नानम्॥ कृष्णागौतमिकावेणीतापीभ्यः समुपाहृतम्। सर्वौषधियुतं तोयं स्नानीयं प्रतिगृह्यताम्॥ पयः-

स्नानम् ॥ पृथिव्यां धेनवो याश्च यज्ञसाधनहेतवः । तासां दुग्धं गृहीत्वा भोः स्नानं कुरुत देवताः ॥ दधिस्नानम् ॥ धेनुदुग्धसमुद्भूतं दधि सम्यक्पवित्रकम् । गृह्णीत देवता यूयं स्नानार्थं च मयाहृतम्॥ घृतस्नानम् ॥ देवानां प्रीतिदं यज्ञे घृतं परमपावनम् ॥ धेनुजं परया प्रीत्या गृह्णीत मम देवताः॥मधुस्नानम् । सरघाभिः समुन्नीतं मधु पुष्पसमुद्भवम् । गृह्णीत देवताः प्रीत्या स्नानार्थं पितृतुष्टिदम्। शर्करास्नानम् । अपोमयीं सितामिक्षुकाण्डोदकसमुद्भवाम् । गृह्णीत पितृदेवानां तुष्टिदां देवताः शुभाम्॥जलस्नानम् ॥ नानासरित्तीर्थजातं नानागन्धसमन्वितम् ॥ जलं गृह्णीत परया मुदा स्नानीयमुत्तमम् ॥ वस्त्रम् ॥ शरच्चन्द्रांशुसद्गौरमूर्णाकार्प्पाससम्भवम् । वस्त्रसंघं प्रगृह्णीत देवता यज्ञसिद्धये ॥ यज्ञोपवीतम् ॥ प्रजापतेः समुद्भूतं शुभ्रं कार्प्पासनिर्म्मितम् । उपवीतव्रजं यज्ञे गृह्णीतात्र च देवताः॥ गन्धम् ॥ मलयाचलजं पीतशुभ्रं चन्दनमुत्तमम् । गृह्णीत देवता यूयं भालशोभाप्रदं मखे ॥ अक्षताः ॥ अक्षतान् धवलान् दिव्यान् मुक्ताप्रतिमरूपिणः । शालितण्डुलजान् यज्ञे प्रतिगृह्णीत देवताः॥ पुष्पाणि ॥ मालतीमल्लिकाकञ्जपुष्पाणि ऋतुजानि च । गृह्णीत देवता यूयं यज्ञसंसिद्धये मुदा ॥ दूर्वाः ॥ शतपर्वलताः श्यामा वंशवृद्धिकराश्च याः । दूर्वा गृह्णीत यज्ञेस्मिन् देवता भो मयार्प्पिताः॥धूपः॥वनस्पतिरसोत्पन्नो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ दीपः ॥ साज्यं सद्वर्त्तिभिर्दीप्तं वह्निना संहृतं मया।दीपं गृह्णीत यज्ञेस्मिन् देवताः सर्वतो मुदा ॥ नैवेद्यम्॥अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्।भक्ष्यभोज्यसमायुक्तं प्रतिगृह्णीत देवताः॥जलम्।साधारणजलं यूयं करास्यांघ्रिविशुद्धये । प्रतिगृह्णीत सततं देवताः परया मुदा ॥ उपायनम् । हिरण्यरौप्यताम्राद्यन्यतमं यन्मयार्प्पितम् । उपायनं प्रगृह्णीत


देवताः परया मुदा ॥ फलानि । नारिकेलकखर्ज्जूराक्षोटकादीनि यानि भोः। देवताः प्रतिगृह्णीत फलानि ऋतुजानि मे ॥ नीराजनम् । कर्प्पूरवर्त्तिकाभिश्च ज्वलन्तीभिः समन्ततः । नीराजयामि सततं देवताः शुभभव्यदाः ॥ प्रदक्षिणा॥पापानि सर्वाणि पदे पदे या हरत्यहो तत्क्षणमेव नृणाम् । प्रदक्षिणां तां परभक्तिभावाद्दत्तात्र भव्याखिलदेवतायै ॥ पुष्पाञ्जलिः । अनेकपुष्पै रत्नाढ्यैः पूरितं शुभमञ्जलिम् । ददामि प्रीतये हृष्टाः प्रतिगृह्णीत देवताः ॥ नमस्कारः । समर्पितं मया यद्यत्पूजनावसरेऽखिलम्। तत्तद्गृह्णीत सुमुदा देवता येन मे शुभम् ॥ यज्ञोपवीतसंस्कारः ॥ प्रक्षालितं शुभ्रं यज्ञोपवीतं ब्रह्मरुद्रसवितृग्रन्थिकं समाचारान्निर्म्माय ब्रह्मकलशे संस्थाप्य अक्षतैः ॐकारदैवत्याय प्रथमतन्तवे नमः। ॐ नागदैवत्याय द्वितीयतन्तवे नमः।ॐअग्निदैवत्याय तृतीयतन्तवे नमः । ॐ सोमदैवत्याय चतुर्थतन्तवे नमः ॐ असुराचार्य्यदैवत्याय पञ्चमतन्तवे नमः । ॐ प्रजापतिदैवत्याय षष्टतन्तवे नमः । ॐ ऋषिदैवत्याय सप्तमतन्तवे नमः ॐ भानुदैवत्यायाष्टमतन्तवे नमः । ॐ देवदैत्यदैवत्याय नवमतन्तवे नमः । ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः । ॐ परब्रह्मणे नमः । सावित्र्याभिमन्त्र्य ॐ प्राणानां ग्रन्थिरसि रुद्रोमा विशतान्तकः । तेनान्नेनाप्यायस्वेति एतन्तेति प्रतिष्ठाप्य ॐ भूर्भुवः स्वः भो नवतन्तुदेवता यज्ञोपवीतस्था इहागच्छतेति। त्र्यम्बकमिति पठित्वा पाद्यादीनि समर्प्पयामि यज्ञोपवीतस्थोंकारादिनवतन्तुदेवताभ्यो नमः सम्पूज्य सूर्य्यं दर्शयन् ब्रह्मस्कन्धे परिधापयेत्। उपनयनसमये तस्माद्देवतार्घ्यं कुमारस्य स्कन्धोपरि परिधापयेत् आचार्य्यः सहस्रधा ब्रह्मगायत्रीमन्त्रं च जपेत् ॥

वास्तुपूजनम् ।

हस्तात्मकवितर्यां तु श्वेतवस्त्रं परिन्यसेत् । तत्र तन्त्रोक्तरीत्यैव यथाकथितरंगकैः॥मण्डलं विलिखेद्वास्तोःशारदातिलके यथा। तत्र मध्ये ब्रह्मवास्तू स्थापयेत्स्वर्णकल्पितौ ॥ ततो वक्ष्यामि दीक्षांगं वास्तुयागपुरस्सरम्।कृते न येन मंत्रज्ञो दीक्षायाः फलमश्नुते॥राक्षसं वास्तुनामानं हत्वाधिष्ठाप्यतत्तनुम् । स्थितास्त्रिपञ्चाशदेवास्तेभ्यः पूर्वं बलिं हरेत् । बलिमण्डलमेतेषां यथावदभिधीयते । पूर्वापरायतं सूत्रं विन्यसेदुक्तमानतः॥तन्मध्यं किंचिदालम्ब्य मत्स्यौ द्वौ परिकल्पयेत् । तयोर्मध्ये स्थितं सूत्र विन्यसेद्दक्षिणोत्तरम्॥द्वाभ्यां द्वाभ्यां तथाग्राभ्यां कोणेषु मकराँल्लिखेत्।मत्स्यमध्ये स्थिताग्राणि तत्र सूत्राणि पातयेत्॥ चतुरस्रं भवेत्तत्र चतुष्कोष्ठसमन्वितम् ॥ तत्पुनर्विभजेन्मन्त्री चतुःषष्टिपदं यथा॥ ईशानाद्रक्षसो यावद्यावदग्ने प्रभञ्जनः। एवं सूत्रद्वयं दद्यात्कर्णसूत्रं समाहितः ॥ ब्रह्माणं पूजयेदादौ मध्ये कोष्ठचतुष्टये । दिक्चतुष्के तु पूर्वादिं यजेदर्य्यमणोन्तरम्। विवस्वन्तं ततो मित्रं महीधरमतः परम् । कोणार्धकोष्ठद्वन्द्वेषु वह्न्यादिपरितः पुनः ॥ सावित्रं सवितारं च शक्रमिन्द्रं जयं पुनः । रुद्रं जयन्तं च यजेदपश्चैवापवत्सकम् । तत्कर्णसूत्रोभयतः कोणद्वन्द्वेषु देशिकः । शर्वं गुहं चार्य्यमणं जृम्भकं संयजेत्ततः॥ चरकीं च विदारीं च पूतनां पापराक्षसीम् । अर्चयेदिक्षु पूर्वादिसार्धाद्यन्तपदेष्विमान् ॥ अष्टावष्टौ विभागेन देवान् देशिकसत्तमः ॥ क्रमादीशानपर्ज्जन्यशिखिबीभत्ससंज्ञकान् ॥ पिलिपिच्छं सत्यभृशौ चान्तरिक्षं तु पूर्वके। अग्निं पूष्णं च वितथं यमं च गृहरक्षकम् ॥ गन्धर्वं भृंगराजं च मृगं दक्षिणतस्तथा। दौवारिकं च सुग्रीवं वरुणं पुष्पदन्तकम् ॥ असुरं च तथा पापं रोगं पितृंस्तु पश्चिमे। वायुं नागं च सोमं च मुख्यं भल्लाटमेव च ॥

शेषं दितिं चादितिं तु कुवेरदिशि पूजयेत् ॥ उक्तानामपि देवानां पदान्यापूर्वपञ्चभिः ॥ रजोभिस्तेष्वथैतेभ्यः पायसान्नैर्वलिं हरेत्। अथवा स्वस्वबलिभिर्वास्तुमण्डलमर्चयेत्। पूर्वतःपश्चिमान्ता उत्तरतो दक्षिणान्ता नवरेखाः चतुस्राणि चतुःषष्टिपदानि एतेषु षोडशपदानि सम्मार्ज्य,अष्टचत्वारिंशज्जातानि ततो विदिक्प्रथमकोष्ठेषु कणसूत्राणि दत्त्वा द्विपञ्चाशज्जातानि मध्ये कोष्ठरहितस्थाने ब्रह्मवास्तू बोध्यौ ॥ कर्णसूत्रं तिर्यक्सूत्रम् ॥ मत्स्यः अंकः ॥

वास्तुमण्डलम् ।



अद्येत्यादि० अमुकशर्म्माहं ममास्य कुमारस्य बैजिकगार्भिकदुरितोपशमनपूर्वकब्रह्मवर्चोभिवृद्ध्ये करिष्यमाणचूडोपनयनवेदारम्भसमावर्तनकर्म्मसु मखसंरक्षणाय पूर्वाङ्गतया ब्रह्मादित्रिपञ्चाशद्देवतात्मकवास्तुपूजनं करिष्ये । वरुणविधिना वरुणं सम्पूज्य

वेद्याश्वतसृषु दिक्षु चतुरो लोहशंकून्स्थापयेत् । ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वतः ।अस्मिन् गृहेऽवतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ तत ईशानादिषु सदीपं दधिमाषभक्तबलिं सुपूजितं दद्यात्।ॐरुद्रेभ्यश्चैव सर्प्पेभ्यो ये चान्ये तां समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ आग्नेये--अग्निभ्यश्चैव सर्प्पेभ्यो ये चान्ये तां समाश्रिताः । बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ नैर्ऋत्ये । नैर्ऋत्याधिपतिश्चैव ये चान्ये तत्र राक्षसाः । बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ वायव्ये । वायव्याधिपतिश्चैव ये चान्ये तत्र राक्षसाः। बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्॥मध्ये हरितं ब्रह्माणम्।ब्रह्मजज्ञानमिति गौतम ऋषिस्त्रिष्टुप्छन्दो ब्रह्मा देवता ब्रह्मावाहने विनियोगः । ध्यानम् । चतुर्मुखोऽरुणो ब्रह्माऽक्षमालास्रुवतोयभृत् । लम्बोदरो हंससंस्थः श्मश्रुलो वास्तुहृत्स्थितः ॥ ऋक्--ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद् व्रिसीमतः सुरुचो वेन आवः । सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः । ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छेति । पीतं विवस्वन्तम्।विवस्वन्निति कुत्स ऋषिरनुष्टुप्छन्दोविवस्वान्देवता विवस्वदावाहने विनियोगः । ध्यानम् । विवस्वान् द्विभुजः शोणद्युतिश्चण्डश्च पंकजी । कर्म्मसाक्षी रथी वास्तोः शिरोभागं समाश्रितः ॥ ऋक् । ॐ विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्वश्रदस्मै नरो वर्चसे दधातन॥ॐ भूर्भुवःस्वः विवस्वन्निहागच्छेति । श्वेतं मित्रम् । मित्रस्येति विश्वामित्र ऋषिर्गायत्री छन्दो मित्रो देवता मित्रावाहने विनियोगः । ध्यानम् । हलाब्जध्वजवज्राख्यहस्तो मित्रो हरिस्थितः । ऊर्द्धाधः श्यामलो गौरो वास्तोर्मूर्ध्नि समाश्रितः ॥ ऋक्--ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि द्युम्नं ।चित्रश्रवस्तमम् ॥ ॐ भूर्भुवः स्वः

मित्रेहागच्छेति । नीलं महीधरम् । यद्ग्राम इति प्रजापतिर्ऋषिरनुष्टुप्छन्दो महीधरो देवता महीधरावाहने विनियोगः। ध्यानम् । सहस्रवदनःश्रीमाञ्छंखचक्राक्षकुम्भभृत्। नीलो महीधरो वास्तोर्दक्षभ्रुवि समाश्रितः। ऋक्—ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमावयमिदं तदवयजामहे स्वाहा ॥ ॐ भूर्भुवः स्वः महीधरेहागच्छेति । कपिलं सावित्रम् । उपयाम गृहीतोसीति विवस्वानृषिर्गायत्री छन्दः सावित्रो देवता सावित्रावाहने विनियोगः । ध्यानम् । सावित्रो द्विभुजः कार्य्यो वेदपाठरतः सदा । पद्मगौरः पद्मनिष्ठो वास्तोर्वामभ्रुवि स्थितः ॥ ऋक्—ॐ उपयाम गृहीतोसि सावित्रोसि च नोधा असि च नो मयि धेहि जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सावित्रे ॥ ॐ भूर्भुवः स्वः सावित्रेहागच्छेति । कपिलं सवितारम् ॥ विश्वानीति श्यावाश्वऋषिर्गायत्री छन्दः सविता देवता सावित्रावाहने विनियोगः । ध्यानम् । सविता जनिता विश्वं द्विबाहुः कपिलच्छविः । रथगामी पद्मपाणिर्वास्तुदक्षिणनेत्रगः ॥ ऋक्—ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥ ॐ भूर्भुवः स्वः सवितरिहागच्छेति । शुभ्रं शक्रम् । इन्द्र इति अप्रतिरथ ऋषिस्त्रिष्टुप्छन्दः शक्रो देवता शक्रावाहने विनियोगः । ध्यानम् । सहस्राक्षो गजारूढः शक्रः श्वेतांग उन्नतः । वज्रोत्पलकरः श्रीमान् वास्तोर्वामाक्षिसंस्थितः॥ ऋक्--ॐ इन्द्रा आसन्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां जयंतीनां मरुतो यन्त्वग्रम् ॥ ॐ भूर्भुवः स्वः शक्रेहागच्छेति । कपिलमिन्द्रम्। आयात्विति वामदेवऋषिस्त्रिष्टुप्छन्द इन्द्रो देवतेन्द्रावाहने विनियोगः । ध्यानम् । इन्द्र ऐरावतारूढः कपिलो दैत्यमर्दनः । कुलिशाक्षकरो वास्तोर्दक्षश्रवसि संस्थितः ॥ऋक्--ॐआयात्विन्द्रो

वस उपन इह स्तुतः । सधमादस्तु शूरः । वातधानस्तविषीर्यस्य पूर्वद्यौर्नक्षत्रममभिभूति पुष्यात् ॥ ॐ भूर्भुवः स्वः इन्द्रेहागच्छेति । कपिलं जयम् । गोत्रभिदमिति अप्रतिरथ ऋषिस्त्रिष्टुप्छन्दो जयो देवता जयावाहने विनियोगः।ध्यानम्।।जयो वज्रधरो देवो महोग्रोऽतुलविक्रमः।कपिलांगो गजारूढो वास्तोर्वामश्रुतिस्थितः ॥ ऋक्-ॐ गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्मप्रमृणन्तमोजसा । इमꣳ सजाता अनुवीरयध्वमिद्रꣳ सखायो अनुसꣳ रभध्वम्। ॐ भूर्भुवः स्वः जयेहागच्छेति । नीलं रुद्रम् । यात इति परमेष्ठी ऋषिरनुष्टुप्छन्दो रुद्रो देवता रुद्रावाहने विनियोगः । ध्यानम् । रुद्रो गोस्थो जटी त्र्यक्षोरुग्वराभयसूत्रधृक् । नीलः कृत्यम्बरो वास्तोर्दक्षनासासमाश्रितः ॥ ऋक्-ॐ याते रुद्र शिवातनूरघोरापापकाशिनी । तयानस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ ॐ भूर्भुवः स्वः रुद्रेहागच्छेति । शुभ्रं जयन्तम् । जीमूतस्येति भरद्वाज ऋषिस्त्रिष्टुप्छन्दो जयन्तो देवता जयन्तावाहने विनियोगः । ध्यानम् । जटिलः श्मश्रुलः शान्तः कमण्डलवक्षसूत्रभृत् । जयन्तोऽजासनो गौरो वास्तोर्वामनसि स्थितः ॥ ऋक्-ॐ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तन्वा जयत्वꣳ सत्वा वर्म्मणो महिमा पिपर्त्तु ॥ ॐ भुर्भुवः स्वः जयन्तेहागच्छेति । शुभ्रा आपः । आप इति देवश्रवा ऋषिरनुष्टुप्छन्द आपो देवता अपामावाहने विनियोगः । ध्यानम् । आपः शुभ्राः पीतवस्त्रा घनगाः पद्मभूषणाः । अक्षाब्जपाशपात्राणि बिभ्रन्त्यो वास्तुवक्रगाः ॥ ऋक्-ॐ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि ॥ ॐ भूर्भुवः स्वः आप इहागच्छतेति । कृष्णमापवत्सम् । आते वत्स इति कण्व ऋषिर्गायत्री

छन्द आपवत्सो देवताऽऽपवत्सावाहने विनियोगः । ध्यानम् । आपवत्सो महातेजा द्विभुजः सिंहवाहनः । वरपाशधरो नीलो वास्तोः कण्ठं समाश्रितः ॥ ऋक्--ॐ आतेवत्सो मनो यमत्पर-माचित्सधस्थात् । अग्ने त्वां कामया गिरा ॥ ॐ भूर्भुवः स्वः आपवत्सेहागच्छेति।श्वेतं शर्वम्। मानो महान्तमिति कुत्स ऋषि-र्जगती छन्दः शर्वो देवता शर्वावाहने बिनियोगः । ध्यानम् । वरशक्तिधरो गौरो ब्रह्मचर्य्यपरः सदा । शर्वः सत्रार्थसन्दर्शी वास्तोर्दक्षांसमाश्रितः ॥ ऋक्--ॐ मानो महान्तमुतमानो अर्भकं मानः उक्षन्तमुतमान उक्षितम् ।मानो वधीः पितरं मोतमातरं मानः प्रियास्तन्वो रुद्र रीरिषः॥ ॐ भूर्भुवः स्वः शर्वेहागच्छेति । शुभ्रं स्कन्दम्। यदक्रन्द इति दीर्घतमा ऋषिस्त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहने विनियोगः । ध्यानम् । स्कन्दः शुभ्राकृतिः कार्य्यो रक्तवस्त्रसमावृतः ।मयूरवरमारूढो वास्तुवामांससंस्थितः॥ ऋक्--ॐ यदक्रन्दः प्रथमं जायमान उद्यन्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं त अर्वन् ॥ ॐ भूर्भुवः स्वः स्कन्देहागच्छेति रक्तमर्य्यमणम् । अर्य्यमणमिति षडग्निर्ऋषिरनुष्टुप्छन्दोर्य्यमा देवताऽर्य्यमावाहने विनियोगः । ध्यानम् । अर्य्यमारुणवर्णस्तु दीप्तिमान् रथवाहनः । सुपद्ममाली खट्वांगी वास्तोर्दक्षिणपार्श्वगः ॥ ऋक्--ॐ अर्य्यमणं बृहस्पति-मिन्द्रं दानाय चोदय।वाचं विष्णुꣳ सरस्वतीꣳसवितारं च वाजिनꣳ स्वाहा ॥ ॐ भूर्भुवः स्वः अर्य्यमन्निहागच्छेति । पीतं जृम्भकम् । यदेषामिति वत्स ऋषिर्गायत्री छन्दो जृम्भको देवता जृम्भका-वाहने विनियोगः । ध्यानम् । जृम्भकः खड्गहस्तस्तु बहुजृम्भ-णतत्परः । पीतवर्णोऽरुणो वास्तोर्वामपार्श्वसमाश्रितः॥ ऋक्--ॐ यदेषां पृषतिरथैः प्रष्टिर्वहति रोहितः । यान्ति शुभ्राणिरिणपः ।

ॐ भूर्भुवः स्वः जृम्भकेहागच्छेति । कृष्णां चरकीम् । यन्त इति मधुच्छन्द ऋषिः पंक्तिश्छन्दश्चरकी देवता चरक्यावाहने विनियोगः । ध्यानम् । अंकुश डमरुं शंखं कुण्डलं बिभ्रती करैः । चरकी श्यामलाकारा वास्तुरक्षभुजाश्रिता ॥ ऋक्--ॐ यन्ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् । तन्ते विष्याम्यायुषो नमध्यादथैतं पितुमद्धि प्रसूतो नमो भूतो येदं चकार ॥ॐ भूर्भुवः स्वः चरकीहागच्छेति । कपिलां विदारीम् । अक्षराजायेति नारायण ऋषिः प्रकृतिश्छन्दो विदारी देवता विदार्य्यावाहने विनियोगः । ध्यानम् । विशालरोमा शोभाढ्या चापबाणधरा वरा । विदारिका बिडालास्या वास्तुवामभुजाश्रिता ॥ ऋक्--ॐ अक्षराजाय कितवकृतायादिनवदर्शं त्रेतायै कल्पितम् । द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातंक्षुधे योगा विकृन्तं तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्य्यं पाप्मने शैलगम् ॥ ॐ भूर्भुवः स्वः विदारीहागच्छेति । पीतां पूतनाम् । कटुप्रियायेति आत्रेय ऋषिर्जगती छन्दः पूतना देवता पूतनावाहने विनियोगः । ध्यानम् । राक्षसीवृन्दमध्यस्था पूतना बालघातिनी । कर्त्तव्याचलतुल्यांगी वास्तुदक्षिणबाहुगा ॥ ऋक्--ॐ कटुप्रियाय धान्ने मनामहे स्वक्षत्राय स्वयशमेमहे वयम् । आमेन्यस्य रजसो यदभ्रआँ अपो वृणाना वितनोति मायिनी ॥ ॐ भूर्भुवः स्वः पूतने इहागच्छेति । कृष्णां पापराक्षसीम् । यस्यास्त इति मधुच्छन्द ऋषिस्त्रिष्टुप्छन्दः पापराक्षसी देवता पापराक्षस्यावाहने विनियोगः । ध्यानम् । रक्तानना धूम्रवस्त्रा राक्षसीगणसंवृता । पापराक्षसिका कृष्णा वास्तोर्वामगबाहुगा ॥ ऋक्--ॐ यस्यास्ते घोर आसं जुहोम्येषां बन्धानामवसर्जनाय यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहंपरिवेद विश्वतः।ॐभूर्भुवः स्वः पापराक्षसीहागच्छेति।

शुभ्रमीशानम् । तमीशानमिति गोतम ऋषिर्जगती छन्द ईशानो देवतेशानावाहने विनियोगः । ध्यानम् । शुभ्रवर्णो जटाजूटधारकः परमेश्वरः । ईशानोऽत्र प्रकर्त्तव्यो वास्तुदक्षप्रबाहुगः ॥ ऋक्-ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसेहूमहे वयम् ।पूषा नो यथा वेद सामसद्वृधे रक्षितापायुरदब्धः स्वस्तये ॥ॐभूर्भुवः स्वःईशानेहागच्छेति।श्वेतं पर्ज्जन्यम् । शन्नो वात इति दध्यङ्ङाथर्वण ऋषिरनुष्टुप्छन्दःपर्ज्जन्यो देवता पर्जन्यावाहने विनियोगः। ध्यानम् । नौस्थस्तडित्वान् पर्ज्जन्यो नानावर्णपरिश्रुतः।ज्योतिर्धूमाम्बुवातात्मा वास्तोर्वामप्रबाहुगः ॥ ऋक्-ॐ शन्नो वातः पवता$^{\smile}$शं नस्तपतु सूर्य्यः।शन्नः कनिक्रदद्देवःपर्ज्जन्योऽअभिवर्षतु ॥ॐभूर्भुवः स्वः पर्ज्जन्येहागच्छेति । कज्जलाकारं शिखिनम् । नमःशम्भवायेति परमेष्ठी ऋषिर्बृहती छन्दःशिखी देवता शिख्यावाहने विनियोगः । ध्यानम् ।शिखी कर्पूरधवलो यद्वाञ्जनचयप्रभः । वरत्रिशूलहस्तश्च वातोर्दक्षिणनाडिगः । ऋक्-ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ॐ भूर्भुवः स्वः शिखिन् इहागच्छेति। शुभ्रं बीभत्सम्।उदस्तम्भीति विश्वामित्र ऋषिस्त्रिष्टुप्छन्दो बीभत्सो देवता बीभत्सावाहने विनियोगः । ध्यानम् । बीभत्सो विपुलांगस्तु बाणासिकुलिशाम्बुभृत् । कर्म्मरोद्धाभीतिकरो वास्तोर्वामशिराश्रितः ॥ ऋक्-ॐ उदस्तम्भीत्समिधानाकमृष्वो अग्निर्भवन्तु तमो रोचनानाम्। यदी भृगुभ्यः परिमातरिश्वा गुहासन्त हव्यवाहं समीधे ॥ ॐ भूर्भुवः स्वः बीभत्सेहागच्छेति ॥ कृष्णंपिलिपिच्छम्। कास्विदिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः पिलिपिच्छो देवता पिलिपिच्छावाहने विनियोगः। ध्यानम् ।पिलिपिच्छो बृहत्कायो धनुर्बाणधरो युवा । मयूरपिच्छभृद्वास्तोर्दक्षहस्तस्थलस्थितः ॥

ऋक्। ॐ कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशंगिला। कास्विदासीत्पूर्वचितिः। किꣳ स्विदासीद्बृहद्वयः॥ ॐ भूर्भुवः स्वः पिलिपिच्छेहागच्छेति। कपिलं सत्यम्। सत्यं च मेति देवाऋषयो विराट्शक्करीछन्दः सत्यो देवता सत्यावाहने विनियोगः। ध्यानम्। सत्यो भूतहितो धर्म्मो वरदाभयपाणिकः॥ प्रसन्नाब्जनिभो वास्तोर्वामहस्ततस्थलस्थितः॥ ऋक्—ॐ सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम्॥ॐ भूर्भुवः स्वः सत्येहागच्छेति। कपिलं भृशम्॥आत्वाहार्षमिति ध्रुव ऋषिरनुष्टुप्छन्दो भृशो देवता भृशावाहने विनियोगः। ध्यानम्। भृशः पुष्पविमानस्थः सपुष्पेषुधनुःकरः। गौरो नाररतो वास्तोर्दक्षपाणितलश्रितः॥ ऋक्—ॐ आत्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वाञ्छन्तु मात्वद्राष्ट्रमधिभ्रशत्॥ ॐ भूर्भुवः स्वः भृशेहागच्छेति। शुभ्रमन्तरिक्षम्। घृतमिति दीर्घतमा ऋषिः पंक्तिश्छन्दोऽन्तरिक्षं देवतान्तरिक्षावाहने विनियोगः। ध्यानम्। शंखचक्रधरं देवमसितं वासितं तथा। अन्तरिक्षं वास्तुवामपाणेस्तलमुपाश्रितम्॥ ऋक्—ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा॥ ॐ भूर्भुवः स्वः अन्तरिक्षेहागच्छेति। रक्तमग्निम्। त्वन्नो अग्न इति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवताऽग्न्यावाहने विनियोगः। ध्यानम्। पिंगभ्रूः श्मश्रुकेशान्तः पिंगाक्षो जटिलोरुणः। सहाक्षसूत्रोग्निर्वास्तोर्दक्षहस्तांगुलिश्रितः॥ ऋक्। ॐ त्वन्नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोकस्य तनये गवामस्य निमेषꣳ रक्षमाणस्तव व्रते॥ ॐ भूर्भुवः स्वः अग्ने इहागच्छेति। श्यामलं पूष्णम्। स्वयम्भूरसीति सूर्य्य ऋषिर्याजुषी

छन्दः पूषा देवता पूषावाहने विनियोगः । ध्यानम् । महास्वनः कृष्णवर्णो द्विभुजो गजवाहनः । पूषा वास्तोर्वामहस्तांगुलिदेशं समाश्रितः॥ऋक्–ॐ स्वयम्भूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि सूर्य्यस्यावृत्तमन्वावर्त्ते॥ॐ भूर्भुवः स्वः पूषन्निहागच्छेति । पीतं वितथम् । तत्सूर्य्यस्येति कुत्स ऋषिस्त्रिष्टुप्छन्दो वितथो देवता वितथावाहने विनियोगः । ध्यानम् । पीतवर्णस्तु वितथः कलेरप्रतिमासनः । कृष्णवर्णोऽथवा वास्तोः पृष्ठदेशं समाश्रितः॥ ऋक्–ॐ तत्सूर्यस्य देवत्वं तन्महित्वं मद्ध्याकर्त्तो विततᳪ सञ्जभार । यदेदयुक्त हरितः सधस्था दाद्रात्रीवासस्तनुतेसिमस्मै ॥ ॐ भूर्भुवः स्वः वितथेहागच्छेति। श्यामं यमम् । यमायत्वेति दध्यङ्ङाथर्वण ऋषिर्यजुश्छन्दो यमो देवता यमावाहने विनियोगः । ध्यानम् । रक्ताक्षो महिषारूढो दण्डपाशधरो यमः । कर्म्मज्ञोऽञ्जनसंकाशो वास्तोर्वक्षःस्थलस्थितः ॥ ऋक्–ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तुः पृथिव्याः सᳪ स्पृशस्पाहि आर्चिरसि शोचिरसि तपोसि ॥ ॐ भूर्भुवः स्वः यमेहागच्छेति । श्वेतं गृहरक्षाकरम् । गृहामेति आसुरिर्ऋषिः पंक्तिश्छन्दो गृहरक्षाकरो देवता गृहरक्षाकरावाहने विनियोगः । ध्यानम् । गृहरक्षाकरः शुभ्रो गदासिवरचर्म्मभृत् । पञ्चास्यवाहनः क्रूरो वास्तोर्दक्षस्तनस्थितः ॥ ऋक्–ॐ गृहामाविभीतमावे पध्वमूर्ज्ज बिभ्रत एमसि ऊर्ज्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ॐ भूर्भुवः स्वः गृहरक्षाकरेहागच्छेति । श्वेतं गन्धर्वम्। गन्धर्वस्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो गन्धर्वो देवता गन्धर्वावाहने विनियोगः । ध्यानम् । सुष्ठुवेषः शिखी गौरो गन्धर्वो ध्यानवच्छुचिः । वीणाकमण्डलुधरो वास्तोर्वामस्तनस्थितः ॥ ऋक्–ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य

परिधिरस्यग्निरिड ईडितः ॥ इन्द्रस्य बाहुरसि दक्षिणो विश्वस्या-
रिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः॥मित्रावरुणौ त्वोत्त-
रतः परिधतां ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै यजमानस्य परि-
धिरस्यग्निरिड ईडितः । ॐ भूर्भुवः स्वः गन्धर्वेहागच्छेति ।
नीलं भृंगराजम् । सौरी बलाकेति भुरिग् ऋषिर्जगतीछन्दो
भृंगराजो देवता भृंगराजावाहने विनियोगः। ध्यानम् । सुनीलांगो
महाकायः कुंकुमारुणविग्रहः । भृंगराजः खेटखड्गी वास्तोरुद-
रसंस्थितः ॥ ऋक्-ॐ सौरीबलाकाशार्गः सृजयः शयाण्डकस्ते
मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दूलो वृकः
पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥ ॐ भूर्भुवः स्वः
भृंगराजेहागच्छेति । रक्तं मृगम् । मृगोनेति जय ऋषिस्त्रिष्टुप्छन्दो
मृगो देवता मृगावाहने विनियोगः । ध्यानम् । मृगः कृष्णोऽ-
रुणो वापि वरदाभयमुद्रिकः । वरासनश्चारुनेत्रो वास्तोर्नाभिं
समाश्रितः ॥ ऋक्-ॐ मृगो न भीमः कुचरो गिरिष्ठाः परावत
आजगन्धा परस्याः । सृकꣳसꣳ शायपविमिन्द्रतिग्मं विशत्रू-
न्ताढिविमृधो नुदस्व ॥ॐ भूर्भुवः स्वः मृगेहागच्छेति । धूम्रं दौवा-
रिकम्। द्वे रूपे इति कुत्स ऋषिस्त्रिष्टुप्छन्दो दौवारिको देवता
दौवारिकावाहने विनियोगः । ध्यानम्। दौवारिको वेत्रमुद्राधरो
भूतिविभूषितः । मुक्ताभः पादुकारूढो वास्तोः क्रोडस्थलास्थितः॥
ऋक्-ॐ द्वे विरूपे चरतः स्वर्थे अन्यान्यावत्समुपधापयेते हरिर-
न्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥ ॐ
भूर्भुवः स्वः दौवारिकेहागच्छेति । पीतं सुग्रीवम् । नीलग्रीवा इति
परमेष्ठी ऋषिरनुष्टुप्छन्दः सुग्रीवो देवता सुग्रीवावाहने विनियोगः।
ध्यानम् । पद्मासनो हेमवर्णो द्विभुजोध्वरगात्रभृत् । सुग्रीवः
कामदो वास्तोर्दक्षकट्यां समाश्रितः ॥ ऋक्-ॐ नीलग्रीवाः

शितिकण्ठादिव॑ रुद्रा उपश्रिताः । तेषा॑ सहस्रयोजनेव धन्वानि तन्मसि ॥ ॐ भूर्भुवः स्वः सुग्रीवेहागच्छेति । शुभ्रं वरुणम् । वरुणस्येति शुनःशेपऋषिर्गायत्रीछन्दो वरुणो देवता वरुणावाहने विनियोगः ॥ ध्यानम् । वरुणो यादसां नाथो नक्रस्थः पाटलांशुकः । शंखपाशधरः शुभ्रो वास्तोर्वामकटिस्थितः ॥ ऋक्-ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥ ॐ भूर्भुवः स्वः वरुणेहागच्छेति । पीतं पुष्पदन्तम् । नमोगणेभ्य इति कुत्स ऋषिः शक्वरी छन्दः पुष्पदन्तो देवता पुष्पदन्तावाहने विनियोगः । ध्यानम् ।पुष्पदन्तोभ्रसंकाशः खगपक्षविराजितः । महाबलो वास्तुदक्षजंघादेशं समाश्रितः ॥ ऋक्-ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमोनमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमोनमः॥ॐभूर्भुवः स्वः पुष्पदन्तेहागच्छेति । कृष्णमसुरम् । यमश्विनेति कक्षीवानृषिस्त्रिष्टुप्छन्दोऽसुरोदेवताऽसुरावाहने विनियोगः।ध्यानम्।असुरोमेचकाभासःकरालास्योंगवर्जितः।सिंहारूढो वास्तुवामजंघादेशं समावृतः॥ ऋक्-ॐयमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमन्त॑ शुक्रं मधुमन्तमिन्दु॑ सोम॑ राजानमिह भक्षयामि ।ॐ भूर्भुवः स्वः असुरेहागच्छेति । कृष्णं पापम् ।एतत्ते इति वसिष्ठ ऋषिः पंक्तिश्छन्दः पापो देवता पापावाहने विनियोगः। ध्यानम् । पापः कृष्णोऽथवा धूम्रो नन्दावरदमुद्रिकः । कपोतवाहनो वास्तोरुषस्थतलमाश्रितः ॥ ऋक्-ॐएतत्ते रुद्रा वसन्तेन परोमूजवतोतीहि। अवतत धन्वा पिनाकवासः कृत्तिवासा अहि॑ शन्न शिवोतीहि ॥ ॐ भूर्भुवः

स्वः पापेहागच्छेति। रक्तं रोगम् । यद्देवा इति प्रजापतिर्ऋषिरनु-
ष्टुप्छन्दो रोगो देवता रोगावाहने विनियोगः। ध्यानम् । रोगः
पाशधरो रक्तो दुरात्मा व्याधिसंग्रहः । दुष्कर्म्मा मर्दनो वास्तोर्वृ-
षणस्थलमाश्रितः॥ऋक्-ॐ यद्देवादेवहेडनं देवासश्चकृमावयम् ॥
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः॥ ॐ भूर्भुवः स्वः
रोगेहागच्छेति।शुभ्रान् पितॄन् । आयन्तु न इति शंख ऋषिस्त्रिष्टु-
प्छन्दः पितरो देवता पितॄणामावाहने विनियोगः।ध्यानम्। पितरः
शुभ्रवसनाःकुशतोयकराः सदा । महोदराः सोमलोका वास्तोस्त्रि-
कमवस्थिताः ॥ ऋक्-ॐ आयन्तु नः पितरः सोम्यासोऽग्नि-
ष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन् यज्ञे स्वधया मदन्तोऽधि-
ब्रुवन्तु तेवन्त्वस्मान्॥ ॐ भूर्भुवः स्वः पितर इहागच्छतेति । रक्तं
बायुम् । वयो येतेति गृत्समद ऋषिर्गायत्रीछन्दो वायुर्देवता
वाय्वावाहने विनियोगः। ध्यानम् । वायुर्धन्वी गजारूढो जग-
त्प्राणश्चलो युवा ॥ अंकुशध्वजबिभ्राणो वास्तोर्दक्षिणजानुगः ॥
ऋक्-ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्त्सो-
मपीतये॥ ॐ भूर्भुवः स्वः वायो इहागच्छेति ।कृष्णं नागम्।अहि-
रिवेतिपायुर्ऋषिस्त्रिष्टुप्छन्दो नागो देवता नागावाहने विनियोगः।
ध्यानम् । नागः कृष्णासितः कार्य्यो जिह्मगः कुण्डिकाक्षभृत् ।
फणामणिद्योतितांगो वास्तुवामगजानुगः॥ऋक्-ॐअहिरिव भोगैः
पर्य्येति बाहुं ज्याया हेतिम्परिबाधमानः। हस्तघ्नो विश्वा वयु-
नानि विद्वान् पुपान्पुमा ँ सम्परिपातु विश्वतः ॥ ॐ भूर्भुवः
स्वः नागेहागच्छेति । शुभ्रं सोमम् । सोममिति तापस ऋषिरनु-
ष्टुप्छदः सोमो देवता सोमावाहने विनियोगः । ध्यानम् । सोमो
नरविमानस्थो वरहस्तो गदाधरः ।गौरो महेश्वरः श्रीमान्वास्तो-
र्दक्षस्फिजि स्थितः ॥ ऋक्-ॐ सोम ँ राजानमवसेग्निमन्वारभा-

महे। आदित्यान्विष्णुꣳसूर्य्य ब्रह्माणं च बृहस्पतिम् ॥ ॐ भूर्भुवः स्वः सोमेहागच्छेति। शुभ्रं मुख्यम् ।मानस्तोक इति कुत्स ऋषिर्जगती छन्दो मुख्यो देवता मुख्यावाहने विनियोगः। ध्यानम् ॥ मुख्यो देवो विश्वकर्मा वास्तुकुम्भाक्षसूत्रभृत् ॥ निपुणः कासरारूढो वास्तुवामस्फिजि स्थितः। ऋक्—ॐ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः ॥ मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमि त्वा हवामहे ॥ ॐ भूर्भुवः स्वः मुख्येहागच्छेति । नीलं भल्लाटम् ॥ इमा इति कुत्स ऋषिर्जगती छन्दो भल्लाटो देवता भल्लाटावाहने विनियोगः । ध्यानम् । भल्लाटश्चन्द्रसंकाशो वरमुद्रागदाधरः । ग्रहपुत्रो वास्तुदक्षपाददेशं समाश्रितः ॥ ऋक्—ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ यथाशमसद्द्विपदे शं चतुष्पदे विश्वम्पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ॐ भूर्भुवः स्वः भल्लाटेहागच्छेति। श्वेतं शेषम् । या इति देवश्रवा ऋषिरनुष्टुप्छन्दः शेषो देवता शेषा वाहने विनियोगः। ध्यानम्। शेषः कृष्णाशितः शूरो वरशूलेषुचापभृत् ॥ गृध्रपक्षः कृशो दीर्घो वास्तोर्वामपदाश्रितः ॥ ऋक्—ॐ या इषवो यातुधानानां ये वा वनस्पतिꣳरनुये वाव्रटेषु शेरते तेभ्यः सर्प्पेभ्यो नमः ॥ ॐ भूर्भुवः स्वः शेषेहागच्छेति। दितिं रक्ताम् । हिरण्यरूपा इति वरुण ऋषिस्त्रिष्टुप्छन्दो दितिर्देवता दित्यावाहने विनियोगः ॥ ध्यानम् । दितिः शोणात्मिका खड्गधारिणी शूलधारिणी ॥ वृषवाहा वास्तुदक्षपादांगुलिसमाश्रिता ॥ ऋक्—ॐ हिरण्यरूपा उषसोविरोक उभाविन्द्रा उदिथः सूर्य्यश्च॥ आरोहतं वरुणमित्रगर्त्तन्ततश्चक्षाथामदितिं दितिं च मित्रोसि वरुणोसि ॥ ॐ भूर्भुवः स्वः दिते इहागच्छेति। कृष्णामदितिम् । एड एहीति श्रुतबन्धुर्ऋषिर्गायत्रीछन्दोऽदितिर्देवताऽदित्या-

वाहने विनियोगः । ध्यानम् ॥ छत्रवज्रांकुशाभीतीर्बिभ्राणा
ख्यानभूषिता । अदितिः श्यामला वास्तुवामपादांगुलिस्थिता ॥
ऋक्—ॐ एड एह्यदित एहि काम्या एतमपिबः कामधरणं भूयात्॥
ॐ भूर्भुवः स्वः अदिते इहागच्छेति।मध्ये नागात्मकं शुभ्रवास्तुम्।
वास्तोष्पतइति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो वास्तुर्देवता वास्त्वा-
वाहने विनियोगः॥ध्यानम्॥ वास्तुर्भूम्यर्पितशिराः पुरप्रासादना-
यकः ॥ ब्रह्मपुत्रः शुभ्रवर्णो धनुर्बाणवराभयी ॥ आवाहनम् ॥
आवाहयाम्यहं वास्तुं चतुर्बाहुं महाबलम्॥नागरूपं सर्वदेवशरीरं
यज्ञमण्डपे ॥ ऋक्—ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो
अनमीवोभवानः । यत्त्वेमहे प्रतितन्नोजुषस्व शन्नोभव द्विपदेशं
चतुष्पदे ॥ॐ भूर्भुवः स्वः वास्तो इहागच्छेहतिष्ठ । वास्तवेनमः।
सम्पूज्य प्रार्थयेत् ॥ वास्तो स्वामिन् ब्रह्मपुत्र शुभ्रवस्त्र चतुर्भुज ॥
यज्ञं रक्ष ममाभीष्टं प्रसाधय मुदा प्रभो ॥ ९४ ॥ ततो वास्तु-
विशेषपूजनम् ॥ ॐ एतन्ते देवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥
तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥१॥ ॐ मनोजूतिर्जुषता-
माज्यस्यबृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु ।
विश्वेदेवासइहमादयन्तामोम्प्रतिष्ठ ॥ ॐ भूर्भुवः स्वः ब्रह्मादित्रिपं-
चाशद्देवताविग्रहसांगवास्तो इहागच्छेहतिष्ठेह सुप्रतिष्ठितो वरदो
भवेति प्राणप्रतिष्ठां कृत्वा वैदिकमन्त्रैः पूजनं कुर्य्यात् ॥तद्यथा॥
आवाहनम् ॥ एह्येहि वास्तो भगवन् ब्रह्मपुत्र महाबल ॥ सांगो-
पाङ्गमखे पूजां गृहाण त्वं मया कृताम् ॥ आसनम् ॥ नानारत्न-
समायुक्तं कार्त्तस्वरविभूषितम् ॥आसनं गृह्ण वास्तो त्वं यज्ञसिद्धिं
कुरुष्व मे ॥ पाद्यम् ॥ सुतप्तं तैजसे पात्रे निर्धूतं पावनं जलम् ॥
पाद्यं गृहाण मन्नीतं वास्तो स्वामिन् नमोस्तु ते ॥ अर्घ्यम् ॥
अयोने भगवन् भर्गललाटस्वेदसम्भव॥ गृहाणार्घ्यं मया दत्तं

वास्तो स्वामिन्नमोस्तु ते ॥ आचमनम् ॥ कर्पूरवासितं वारि स्वर्धुन्यादिभिराहृतम् ॥ आचामं कुरु देव त्वं वास्तो यज्ञं सुसाधय ॥ स्नानम् ॥ ॐवरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥ पयःस्नानम् ॥ ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तारिक्षेपयोधाःपयस्वतीःप्रदिशःसन्तु मह्यम्॥ दधिस्नानम्।दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नोमुखाकरत्प्रणआयूंषितारिषत्॥घृतस्नानम् ॥ ॐघृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥ मधुस्नानम् ॥ ॐ मधुवाता ऋतायते मधुक्षरन्तिसिन्धवः। माध्वीर्नःसन्त्वोषधीः। शर्करास्नानम्॥ॐअपा ँ रसमुद्वयस ँ सुर्य्येसन्त ँ समाहितम् । अपा ँ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिमिन्द्राय त्वा जुष्टतमम् ॥जलस्नानम् ॥ ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वाकामधुक्षः॥ शुद्धस्नानम् ॥ ॐ पंचनद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधासोदेशेऽभवत्सरित् ॥ वस्त्रम् ॥ॐ युवासुवासाः परिवीत आगात्सउश्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्योमनसा देवयन्तः ॥ यज्ञोपवीतम् ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ भूषणानि ॥ ॐ अलंकरणमसि भूयोऽलंकारणं भूयाः ॥ चन्दनम् ॥ ॐ अ ँ शुनोत अ ँ शुःपृच्यतांपुरुषापुरुः । गन्धस्तेसोममवतुमदायरसो अच्युतः ॥ अक्षताः ॥ ॐ अक्षन्नमी मदन्तह्यवप्रिया अधूषत ।

अस्तोषतस्व भानवो विप्रान्नविष्ठयामती योजान्विन्द्रतेहरी ॥ पुष्पाणि ॥ ॐ याहरग्यमदग्निश्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च ॥ पुष्पमाला ॥ ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु। तेन संयथिता सुमनस आबध्नामि यशोमयी ॥ दूर्वा॥ॐ काण्डात्काण्डात्प्ररोहन्ति पुरुषः पुरुषस्परि। एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ धूपः ॥ ॐ धूरसि धूर्वधूर्वन्तं योस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः। देवाना-मसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥ दीपः ॥ ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ नैवेद्यम् ॥ ॐ अन्नपतेन्नस्य नो देह्य-नमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जन्नो धेहि द्विपदे शं चतुष्पदे ॥ जलम् ॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शँय्यो रभिस्रवन्तु नः ॥ फलानि ॥ ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।बृहस्पतिप्रसूतास्तानो मुंचंत्वꣳहसः ॥ दक्षिणा ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ नीराजनम् ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्य्योवर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥ प्रदक्षिणाचतुष्टयम् ॥ ॐ प्रतिपदसि प्रतिपदेत्वाऽनु-पदसि नुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ पुष्पाञ्जलिः ॥ ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योति व्याधी महारथो जायतां दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यज-मानस्यवीरो जायतां निकामे निकामेनः पर्जन्योवर्षतु फलवत्यो-

न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ नमस्कारः॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौ सजोषाः । यःशर्ठं० सतेस्तुवतेधायिपज्रइन्द्रज्येष्ठाअस्मा ५ अवन्तुदेवाः॥ ततो ब्रह्मादिनामममन्त्रैरेकैकामाज्याहुतिं दद्यात् ॥ ततो वास्तुहोमविषये। पायसं सतिलं विल्वफलानि च हुनेत्ततः । अष्टोत्तरशतं वास्तोष्पत इत्यपि मन्त्रतः ॥ वास्तोष्पत इति वसिष्ठ ऋषिस्त्रिष्टुप्छन्दो वास्तुर्देवता सतिलपायसबिल्वफलहोमे विनियोगः ॥ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः । यत्वेमहे प्रति तन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे स्वाहा ॥ १०८ आहुतयो देयाः ॥ यदीच्छेत्सात्त्विकीं पूजां देव्यै विद्वान्समर्प्पयेत् । मधुखण्डाज्यपूपान्नबलिं सम्पूज्य भक्तितः ॥देवाय तु पयोद्राक्षाखर्ज्जूरदधिसद्बलिम् ॥ अन्यथाकरणे दोषो दीक्षार्धफलभाग्भवेत् ॥ कपिलपञ्चरात्रे-पाद्यादिभिः समभ्यर्च्य यस्य देवस्य यो बलिः ॥ तस्मै दद्याद्बलिं तन्तु तत्तद्देवमुदे बुधः ॥ ब्रह्मणे ॥ पायसान्नबलिं गृह्ण पुष्पकर्पूरसंयुतम् ॥ ब्रह्मन् पापान्यशेषाणि दूरीकुरु पितामह ॥ १ ॥ विवस्वते ॥ चन्दनाद्यर्चितं नाथ कर्पूरागुरुमण्डितम् ॥ बलिं गृह्ण विवस्वन्मे सर्वदोषान् प्रणाशय ॥ २ ॥ मित्राय ॥ पायसान्नबलिं पुष्पैः संयुतं सगुडं तथा ॥ गृहाण मित्र मे यज्ञ रक्षोविघ्नं प्रणाशय ॥ ३ ॥ महीधराय ॥ माषौदनं समांसं च गन्धादिक्षीरसंयुतम्॥ महीधर गृहाण त्वं सर्वविघ्नान्प्रणाशय ॥ ४ ॥ सावित्राय ॥ पुष्पादिकुशपानीयं कर्पूरागुरुवासितम्॥ सावित्र त्वं गृहाणेमं शान्तिमत्र प्रयच्छ मे ॥ ५ ॥ सवित्रे॥ रक्तपुष्पबलिं भक्तरक्तगन्धसमन्वितम् ॥ गृहाणेमं मुदा हव्यं सवितस्ते नमो नमः ॥ ६ ॥ शक्राय ॥ माषभक्तबलिं वस्त्रगन्धाज्यालंकृतं प्रभो ॥ गृहाण शक्र यज्ञेऽस्मिन्

रक्षोविघ्नं प्रणाशय ॥ ७ ॥ इन्द्राय॥पुष्पकुंकुमसंयुक्तंशीतान्नब-
लिमुत्तमम् ॥ गृहाणेन्द्राध्वरे रक्षां कुरु तुभ्यं नमोनमः ॥ ८ ॥
जयाय ॥ सुवर्णपिष्टकबलिं वस्त्रगन्धसमन्वितम् ॥ सघृतं जय गृह्ण
त्वं शान्तिमत्र प्रयच्छ मे ॥ ९ ॥ रुद्राय ॥ पक्वापक्वामिषबलिं
वस्त्रपुष्पादिसंयुतम् ॥ गृहाणेमं मया दत्तं रुद्र तुभ्यं
नमोनमः ॥ १० ॥ जयन्ताय ॥ घृतौदनबलिं वस्त्रगन्धपु-
ष्पादिमण्डितम् ॥ गृहाणेमं जयन्त त्वं रक्षोभीतिं हरात्र भोः
॥ ११ ॥ अद्भ्यः ॥ क्षीरखण्डबलिं पुष्पमधुयुक्तं सवस्त्रकम् ॥
गृह्णीतापो हि सत्रेऽस्मिन् रक्षोभीतिहरा मम ॥१२॥आपवत्साय॥
गुडदध्योदनबलिं गन्धपुष्पसमन्वितम् ॥ गृहाणेमं नमस्तुभ्य-
मापवत्साभयं कुरु ॥ १३ ॥ शर्वाय ॥ दध्योदनबलिं रक्तपुष्पव-
स्त्रसमन्वितम् ॥ गृहाण सुमुखः शर्व रक्षोविघ्नं प्रणाशय ॥ १४ ॥
स्कन्दाय ॥ मांसौदनबलिं हृद्यं माषान्नोपरिसंस्थितम् ॥ गृहाण
देव त्वं स्कन्द वास्तुदोषं प्रणाशय ॥ १५ ॥ अर्यम्णे ॥ कृस-
रान्नबलिं मांसपोलिकापरिसंस्कृतम् ॥ अर्यमंस्त्वं गृहाणेमं रक्षो-
विघ्नं प्रणाशय ॥ १६ ॥ जृम्भकाय॥ रक्तमांसौदनबलिं समत्स्यं
गन्धसंयुतम् ॥ जृम्भक त्वं गृहाणेमं शान्तिमत्र प्रयच्छ मे ॥
॥ १७ ॥ चरक्यै ॥ वस्त्रगन्धसमायुक्तं घृतमांसबलिं मुदा॥गृहाण
चरकि त्वं मे रक्षोभीतिं प्रणाशय ॥ १८ ॥विदार्यै ॥ रक्तपुष्पा-
मिषबलिं रक्तगन्धसमन्वितम ॥ विदारि त्वं गृहाणेमं शान्तिं कुरु
दयानिधे ॥ १९॥ पूतनायै।माषान्नदधिभक्तादिबलिं तैलसमन्वि-
तम् ॥ गृहाण पूतने देवि शान्तरूपा सती मुदा ॥ २० ॥ पापरा-
क्षसिकायै ॥ मद्यमत्स्यामिषबलिं घृतपोलिसमन्वितम् । पापराक्ष-
सिके गृह्ण सदा शान्तिं कुरुष्व मे ॥ २१॥ ईशानाय ॥ शर्कराभ-
क्तदुग्धादिबलिं शुभ्रांशुकावृतम् । गृहाण सुमुखो भूत्वा ईशान

शुभदो भव ॥२२॥ पर्जन्याय ॥ घृतपक्वान्नकबलिं शालितण्डुल-मिश्रितम् ॥ पर्जन्य त्वं गृहाणेमं मम शान्तिं कुरु द्रुतम् ॥ २३ ॥ शिखिने ॥ वस्त्राज्यपक्वान्नबलिं सुगन्धिद्रव्यसाधितम् ॥ शिखिन् गृहाण मद्दत्तं रक्षोभीतिं निराकुरु ॥ २४ ॥ वीभत्साय ॥ छागक-र्णामिषबलिं पुष्पगन्धयुतं प्रभो ॥ वीभत्स गृह्ण रक्षोजभीतिं यज्ञे निराकुरु ॥२५॥ पिलिपिच्छाय ॥ मांसौदनबलिं माषभक्ताज्य-मधुसंयुतम् ॥ पिलिपिच्छ गृहाण त्वं सर्वतो मंगलं कुरु ॥२६॥ सत्याय ॥ गन्धपुष्पवितानान्नबलिं सक्तुसमन्वितम् ॥ गृहाण सत्य त्वं देव सदा शान्तिं कुरुष्व मे ॥२७॥ भृशाय ॥ मांसभ-क्तबलिं पूपमुद्गान्नपरिचर्चितम्॥गृहाण सततं रक्ष भृश यज्ञं नमोनमः ॥२८॥ अन्तरिक्षाय॥सबीजोत्पन्नदुग्धान्नबलिं खण्डविमिश्रितम्॥ धूम्राम्बरसमायुक्तमन्तरिक्ष गृहाण मे ॥२९॥ अग्नये ॥ शर्करा-खाद्यमध्वाज्यपक्वान्नबलिमुत्तमम्॥गृहाणाग्ने मयानीतं सर्वतो रक्ष मेऽध्वरम् ॥३०॥ पूष्णे॥ गोधूमपिष्टक्षीराज्यसाधितं सहशर्करम् ॥ संयावान्नबलिं गृह्ण पूषन्देव नमोस्तु ते ॥ ३१ ॥ वितथाय ॥ दधिगन्धबलिं पीतपुष्पवस्त्रसमन्वितम्॥गृहाणवितथ प्रीत्यावास्तु-दोषं प्रणाशय ॥३२॥ यमाय ॥ मधुभक्तबलिं हृद्यं रक्तवस्त्रादिम-ण्डितम्॥गृहाण परया प्रीत्या यम तुभ्यं नमोनमः ॥३३॥ गृह-रक्षाकराय ॥ पक्वमांसौदनबलिं नवनीतांशुकावृतम् ॥ गृहरक्षाकर प्रीत्या गृहणाध्वरशान्तये ॥ ३४ ॥ गन्धर्वाय ॥ पक्वान्नफल-पुष्पादिबलिं घृतसमन्वितम् ॥ गन्धर्व त्वं गृहाणेमं यज्ञस्यास्य शुभाप्तये ॥ ३५ ॥ भृङ्गराजाय ॥ मेषजिह्वामांसभक्तबलिं षड्र-सचर्चितम् ॥ गृहाण परया प्रीत्या भृङ्गराज नमोस्तु ते ॥ ३६ ॥ मृगाय ॥ तिलाज्यगन्धपुष्पादिबलिं कुशसमन्वितम् ॥ गृह्ण त्वं परया प्रीत्या मृग सौख्यकरो भव ॥ ३७ ॥ दौवारिकाय ॥

चन्दनागुरुसत्काष्ठबलिं पिष्टसमन्वितम् ॥ नीलाम्बरपरिच्छन्नं दौवारिक गृहाण मे ॥ ३८ ॥ सुग्रीवाय ॥ अपूपाज्यसितादुग्धगन्धपुष्पबलिं शुभम् ॥ दन्तकाष्ठेन सहितं गृह्ण सुग्रीव ते नमः ॥ ३९ ॥ वरुणाय ॥ पद्मपुष्पकुशस्तम्बबलिं पद्मान्नसंयुतम् ॥ गृहाण वरुण प्रीत्या यज्ञेऽस्मिन् शुभदो भव ॥ ४० ॥ पुष्पदन्ताय ॥ पायसान्नबलिं पुष्पगन्धाज्यपरिचर्चितम् ॥ पुष्पदन्त गृहाणेमं वास्तुदोषप्रशान्तये ॥ ४१ ॥ असुराय ॥ यवान्नगोदुग्धबलिं भक्तमद्यसमन्वितम् ॥ गृहाणासुर मद्दत्तं यज्ञरक्षां विधत्स्व भोः ॥ ४२ ॥ पापाय ॥ यवचूर्णाज्यदुग्धादिबलिं गन्धविमिश्रितम् ॥ गृहाण पापरक्षार्थं यज्ञस्यास्य समन्ततः ॥ ४३ ॥ रोगाय ॥ घृतमोदकसंयुक्तं गन्धलाजबलिं शुभम् ॥ गृहाण रोग सततं यज्ञरक्षां कुरुष्व मे ॥ ४४ ॥ पितृभ्यः ॥ मधुसर्पिःपायसान्नबलिं सकृसरान्नकम् ॥ गृह्णीत परया प्रीत्या पितरः सत्रवर्धनाः ॥ ४५ ॥ वायवे ॥ मांसौदनबलिं सर्पिःसंयुतं धूमितप्रभम् ॥ वायो गृहाण परया मुदा तुभ्यं नमोनमः ॥ ४६ ॥ नागाय ॥ शालिपिष्टबलिं दुग्धं घृतक्षौद्रसमन्वितम् ॥ गृहाण नाग त्वं प्रीत्या मद्दत्तं यज्ञशान्तये ॥ ॥ ४७ ॥ सोमाय ॥ दध्योदनापूपबलिं गोक्षीरमधुसंयुतम् ॥ गृहाण सोम त्वं देव वास्तुदोषं प्रणाशय ॥ ४८ ॥ मुख्याय ॥ नालिकेरौदनबलिं भक्तपीताम्बरान्वितम् ॥ गृहाण मुख्य सततं यज्ञं रक्ष मदीयकम् ॥ ४९ ॥ भल्लाटाय ॥ पायसान्नबलिं क्षौद्रमुद्गौदनसमन्वितम् ॥ भल्लाट त्वं गृहाणेमं यज्ञरक्षां विधत्स्व मे ॥ ५० ॥ शेषाय ॥ घृतौदनबलिं हृद्यं कर्पूरैलाविमिश्रितम् ॥ गृहाण शेष सततं रक्ष यज्ञं नमोस्तु ते ॥ ५१ ॥ दितये ॥ क्षीरखण्डाज्यसंयुक्तं पोलिकाबलिमुत्तमम् ॥ दिते गृहाण यज्ञं मे सर्वतो रक्ष ते नमः ॥ ५२ ॥ अदितये ॥ घृताक्तशर्करामि-

अपोलिकावलिमुत्तमम् ॥ श्वेतवस्त्रपरिच्छन्नमदिते गृह्ण ते नमः ॥ ॥ ९३ ॥ वास्तवे ॥ नानापक्वान्नसंयुक्तं नानागन्धविमिश्रितम् ॥ वास्तो छागबलिं गृह्ण सर्वान्दोषान् प्रणाशय ॥ ९४ ॥इति बलिप्रदानम् ॥ ततो वास्तवे नारिकेलार्घदानम् ॥ ॐअयोने भगवन् भर्गललाटस्वेदसम्भव । गृहाणार्घं मया दत्तं वास्तो स्वामिन्नमोस्तु ते ॥ प्रार्थना ॥ ॐ मन्त्रहीनं क्रियाहीनं भक्तिश्रद्धाविवर्जितम् ॥ यत्पूजितं मया वास्तो परिपूर्णं तदस्तु मे॥ नमस्ते देवदेवश वास्तो स्वामिन्नमोस्तु ते ॥ शान्ति कुरु सुखं देहि सर्वान्कामान्प्रयच्छ मे ॥ विसर्जनम् ॥ ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशूर्भवासचा ॥ अभावादुक्तयागस्य कुशपुष्पफलाक्षतैः । दधितण्डुलमाषान्नैर्यद्वा देयो बलिर्बुधैः ॥

केशाधिवासनम् ।

चूडाकर्म्मदिनात्पूर्वं रात्रौ केशाधिवासनम् ॥ शालायां ब्रह्मघोषेण युते काले चरेत्सुधीः ॥ स्त्रीणां मङ्गलवाग्जालैर्वितानितदिगम्बरे ॥ मण्डपोत्तरदेशे तु विद्वद्वृन्दसुशोभिते ॥ कांस्यपात्रे पल्वलार्थं रक्तवृषभगोमयम् ॥ तत्र दुग्धं विनिक्षिप्य दधि वा सर्वसिद्धिदम् ॥ नवनीतमयं पिण्डं शुभ्रवस्त्रोपसंवृतम् । तत्र संस्थापयेद्धीमाञ्शल्लकीकण्टकत्रयम् ॥ अयःक्षुरं ताम्रवृन्तं सप्तविंशतिकान् कुशान्॥ पीतकौशेयवस्त्राणां निर्मिते खण्डपंचके ॥ रोचनायवदूर्वाभिर्गौरसर्षपकाक्षतैः ॥ राजिकापूगमायूरपिच्छस्वर्णकराजतैः ॥ पञ्च पोटलिकाः कृत्वा रक्तसूत्रेण वेष्टयेत् ॥ त्रिगुणेन ततो विप्र एतत्तेतिप्रतिष्ठयेत् ॥ अलंकृतं माणवकं सुस्नातं च सुवाससम् ॥ जीवत्पुत्रधवायाश्च शिष्टायामनुभिर्गुणैः ॥ सुवस्त्रालंकृतायास्तु मातुरंके निवेशयेत ॥ पिता कुर्य्यादथाचार्य्यः संकल्पं प्राङ्मुखः शुचिः ॥ अद्येत्यादि० अस्यां सन्ध्यायामे-

तस्य कुमारस्य बैजिकगार्भिकदुरितोपशमनपूर्वकदीर्घायुष्यावाप्तये श्वःकरिष्यमाणचूडासंस्कारकर्मणः पूर्वाङ्गत्वसिद्धये शिष्टाचारात् केशाधिवासनं करिष्ये ॥ इति संकल्प्य ॥ तन्मण्डपस्थितदेवान् सम्पूज्य दक्षिणदिशि स्थितानां केशानां भागत्रयं विभज्य पुनरेकीकृत्य । प्रजापतेरिति नारायणऋषिर्गायत्रीछन्दः प्रजापतिर्देवता दक्षिणस्थकेशाभिमन्त्रणे विनियोग ॥ ऋक्--ॐ प्रजापतेस्त्वा हिंकारेणावजिघ्रामि गवां हिंकारेणावजिघ्रामि सहस्रायुषासौ जीव शरदां शतम् ॥ अस्मै इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता पश्चिमस्थकेशाभिमन्त्रणे विनियोगः ॥ ऋक्--ॐ अस्मै प्रयन्धि मघवन्नृजीषन्निन्द्र रायो विश्ववारस्य भूरेः ॥ अस्मै शतं शरदो जीव सेधा अस्मै वीराञ्छाश्वत इन्द्रशिप्रिन् ॥ क्षेमायेति अङ्गिरा ऋषिः प्रतिष्ठा छन्दो ब्रह्मा देवतोत्तरस्थकेशाभिमन्त्रणे विनियोगः ॥ ऋक्--ॐ क्षेमाय वः शान्त्यै प्रपद्ये शिव ँ शग्म ँ शँय्यो बलाय वर्चसे शँय्यो ॥ तत इंद्र इति ब्रह्माऋषिरुष्णिक्छन्द इन्द्रो देवता पूर्वस्थकेशाभिमन्त्रणे विनियोगः ॥ ऋक्--ॐइन्द्रः श्रेष्ठानि द्रविणानिधेहि चित्तं दक्षस्य सुभगत्वमस्मै । पोषं रयीणामरिष्टं तनूनां स्वात्मानं वाचः सुदिनन्त्वमह्नाम् ॥ यदिति दीर्घतमाऋषिस्त्रिष्टुप्छन्द इन्द्रो देवताशिखाभिमन्त्रणे विनियोगः॥ ऋक्--ॐ यदश्वायवासउपस्तृणंत्यधीवासं याहिरण्यान्यस्मै।सन्दानमर्वन्तं पड्वीशं प्रियादेवेष्वायामयन्ति एतन्तेति प्रतिष्ठाप्य दक्षिणादिक्रमेण पोटलिकाः शिरसि बध्नीयात् ।

चूडाकर्म्म ।

तच्च तृतीये विषमे वा वर्षे शुभेऽह्नि कृतनित्यक्रियो यजमानः स्वयमाचार्य्यद्वारा वा संस्कुर्य्यात् ॥ अद्येत्यादि॰ममास्य पुत्रस्य बीजगर्भसमुद्भवैनोनिबर्हणपूर्वकमायुर्बलाभिवृद्धये चूडाकर्म्माहं

करिष्ये तदङ्गतया त्रीन् ब्राह्मणानहं भोजयिष्ये तेभ्यो दक्षिणां च दास्ये ॥ इति सकल्प्य वेद्यां कुशकण्डिकामारभेत् ।कुशैर्हस्तमात्र-मितां भूमिं परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदके-नोपलिप्य स्रुवमूलेन प्रागग्रा यथोत्तरं तिस्रो रेखा विलिख्य उल्ले-खनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रो-पनीतमग्निं तूष्णीं स्वाभिमुखं वेद्यां स्थापयेत् ॥ ततोऽग्नेःपश्चिमतो यजमानदक्षिणदिशि स्नापितं कुमारमहतं वासः परिधाप्य माता अङ्के उपवेशयति।पाद्यादिभिर्वरणद्रव्यं सम्पूज्य ब्राह्मणं च सम्पूज्य अद्येत्यादि० ममास्य पुत्रस्य कर्त्तव्यचूडाकर्म्माङ्गीभूतहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्त्तुमनेन वरणद्रव्येणामुकगोत्रममु-कशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे इति वृत्वा । वृतोस्मीति ब्राह्मणःप्रतिब्रूयात् ॥ यथाविहितं कर्म्म कुर्विति यजमानः । कर-वाणीति ब्राह्मणः ॥ ततो यजमानोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्याग्निं प्रदक्षिणं कारयित्वा अस्मिन् कर्म्मणि त्वं मे ब्रह्मा भवेति यजमानः।भवानीति ब्राह्मणः ॥ ततो ब्राह्मणमुदङ्मुखं कल्पितासने उपवेश्य । प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्।।ततो बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तमग्नितः प्रणीतापर्य्यन्तं परि-स्तीर्य्याग्नेरुत्तरतःपश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकर-णाथ साग्रमनन्तर्गर्भिकुशद्वयं प्रोक्षणीपात्रम् आज्यस्थाली सम्मार्जनकुशाः पंचवेणीरूपोपयमनकुशाः सप्त पालाशसमिधस्तिस्रः स्रुवः आज्यं तण्डुलपूर्णपात्रम्।।एतानि पवित्रच्छेदनकुशानां पूर्व-पूर्वदिशि क्रमेणासादनीयानि । अमीषामुत्तरोत्तरतःसाधारणवस्तू-न्युपकल्पनीयानि । केशाधिवासनिकसामग्रीं नापितं सन्निधाय

पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं कुर्य्यात् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वाऽनामिकाङ्गुष्ठगृहीतपवित्राभ्यां प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वाग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ ततःस्रुवमधोमुखं प्रतप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात् ॥ तत आज्यमग्नेरवतार्याग्रतो निदध्यात् । ततःप्रोक्षणीवत् त्रिरुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य पूर्ववत्प्रोक्षण्युत्पवनं कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत्॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धःसमिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्दद्यात् ॥ तत्र प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कार्य्यः ॥ प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता आज्यहोमे विनियोगः॥ॐप्रजापतये स्वाहा इदं प्रजापतये इति मनसा।इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ॥अग्नये स्वाहा इदमग्नये ॥ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ॥भूरादिव्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोग ॥ ॐ भूः स्वाहा इदमग्नये । भुवः स्वहा इदं वायवे । स्वः स्वाहा इदं सूर्य्याय । एता महाव्याहृतयः ॥ पाद्यादिभिः सभ्यनामाग्निं संपूज्य । त्वन्नो अग्ने सत्वन्नो अग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दो

ग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ꣳसि प्रमुमुग्ध्यस्मत्स्वाहा । इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नो अग्ने वमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्व नो वरुण ꣳ रराणो व्वीहि मृडीक ꣳ सुहवो न एधि त्वाहा ॥ इदमग्नीवरुणाभ्याम् । अयाश्चाग्न इति विराड्ऋषि र्गायत्रीछन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्य नभिशस्ति पाश्च सत्यमित्वमया असि । अयानो यज्ञं वहास्य यानो धेहि भेषज ꣳ स्वाहा ।इदयग्नये॥ येते शतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो लिंगोक्ता देवताः प्रायश्चित्तहोमे विनियोगः॥ ॐयेते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।तेभिर्नो अद्य सवितोतविष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्काः स्वाहा ।इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यः॥ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्तदेवते प्रायश्चित्तहोमेविनियोगः ॐउदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ꣳ श्रथाय अथावयमादित्यव्रते तवानागसोअदितये स्याम स्वाहा इदं वरुणायादितये। एताः प्रायश्चित्तसंज्ञकाः॥ प्रजापतयइतिप्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता स्विष्टकृद्धोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा, इदं प्रजापतय ॥ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता स्विष्टकृद्धोमेविनियोगः॥ ॐअग्नये स्विष्टकृते स्वाहा,इदमग्नये स्विष्टकृते। संस्रवं प्राश्यपूर्णपात्रं सम्पूज्य।अद्येत्यादि॰ ममास्य पुत्रस्य कृतेतच्चूडाकर्म्माङ्गीभूतहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः प्रतिष्ठार्थं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणेब्राह्मणाय तुभ्यमहं सम्प्रददेस्वस्तीति प्रतिवचनम्।सुमित्रियान इति दध्यङ्ङाथर्वणऋषिरापो देवताः प्रोक्षणमार्जने विनियोगः ॥

ॐसुमित्रियान आप ओषधयः सन्तु। पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्य्यात् ॥देवागात्विति अत्रिर्ऋषिरुष्णिक् छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः ॥ॐ देवा गातु विदो गातुं वित्त्वागातुमितमनसस्पत । इमं देवयज्ञ ँ स्वाहा वातेधाः स्वाहा । इति बर्हिर्होमः ॥ ततो लग्नसामयिकग्रहप्रीतिकारकदानानि कृत्वा तत उष्णोदकेन पिता । उष्णेनवेति परमेष्ठी ऋषिः प्रतिष्ठा छन्दो लिङ्गोक्ता देवतोष्णोदकसेके विनियोगः ॥ ॐ उष्णेन वाय उदकेनेह्यदिते केशान् वप । इति सिक्त्वा मिश्रितोदकेन नवनीताद्यन्यतमपिण्डे सेकं तूष्णीं कृत्वा दक्षिणपश्चिमोत्तरक्रमेणपूर्वनिशानिबद्धकुमारकेशजूटिकात्रये दक्षिणजूटिकाम् । सवित्रेति प्रजापतिर्ऋषिर्गायत्रीछन्द आपो देवता मिश्रितोदकसेके विनियोगः ॥ ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चसे ॥ इति मिश्रितोदकेन सिक्त्वा दक्षिणभागस्थजूटिकाभागत्रयं कृत्वा एकामेकां जूटिकांप्रतिकुशत्रयसंयोजनं कृत्वा च शल्लकीकंटकेन तूष्णीं विवरणं कृत्वा भागत्रयंकुर्यात्। सप्तविंशतिकुशैः कुशत्रयमानीय तत्केशमूलसंलग्नाग्रजूटिकाप्रथमभागमध्यान्तरितं कुर्य्यात् ॥ओषध इति प्रजापतिर्ऋषिर्यजुश्छन्द ओषधिर्देवतान्तर्धाने विनियोगः ॥ ॐ ओषधे त्रायस्व स्वधिते मैन ँ हि ँ सीः ॥ सकुशकेशान् वामहस्तेन धृत्वा दक्षिणहस्तेन क्षुरमाधत्ते ॥ शिवो नामासीति नारायण ऋषिर्जगती छन्दः क्षुरो देवता क्षुरग्रहणे विनियोगः॥ॐ शिवोनामासि स्वधितिस्ते पिता नमस्ते अस्तु मामा हि ँ सीरिति क्षुरं गृहीत्वा ॥ निवर्त्तयामीति प्रजापतिर्ऋषिर्यजुश्छन्दः शिवो देवता जूटिकासंलग्ने विनियोगः॥ ॐ निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय

सुवीर्यायेति जूटिकासंलग्नं कृत्वा। येनेति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता केशच्छेदने विनियोगः ॥ ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासत् ॥ इतिच्छेदयित्वा ॥ कुशत्रयसहितां गोमयोपरि उत्तरस्यां निदध्यात्। पश्चिमभागस्थजूटिकायां सेचनादारभ्य संलग्नान्तं पूर्वोक्तमंत्रैः कृत्वा त्र्यायुषमिति नारायण ऋषिरुष्णिकछन्दः शिवो देवता केशच्छेदने विनियोगः ॥ ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषमिति च्छेदयित्वा। ततः पूर्ववदुत्तरस्थजूटिकायां येनेति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता केशच्छेदने विनियोगः ॥ ॐ येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यम्। तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये। इतिच्छेदयित्वा पूर्ववत्पूर्वस्थजूटिकायाम् ॥ यदिति वामदेवऋषिर्यजुश्छन्दः क्षुरो देवता केशच्छेदने विनियोगः ॥ ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति केशाञ्छिन्धि शिरो मास्यायुः प्रमोषीः। इति छेदयित्वा तूष्णीं समस्तं शिरः प्रक्षाल्य ॥ अक्षुण्वमिति वामदेवऋषिर्यजुश्छन्दः क्षुरो देवता क्षुरप्रदाने विनियोगः ॥ ॐ अक्षुण्वं परिवपेति नापिताय क्षुरं प्रयच्छेत् ॥ ततो नापितः शिखां गोष्पदाकृतिं वर्त्तुलां धृत्वा यथाकुलं समस्तशिरोवपनं कुर्य्यात् ॥ माता च केशान् दधिनवनीतान्यतमदुग्धपूर्णे कृतगोमयालवाले कांस्यपात्रे संस्थाप्य पल्वले निधापयेत् ॥ इति समाचारः ॥ ततः स्नात्वा कृताचमनः सुवस्थघृतदिग्धक्रमुकफलेन पूर्णाहुतिं समुत्थाय कुर्यात् ॥ मूर्द्धानमिति भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानर मृतऽ आजातमग्निम्। कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त

देवाः स्वाहा ॥ इति पूर्णाहुतिः ॥ तत उपविश्य स्रुवेण भस्मानीय त्र्यायुषमिति नारायण ऋषिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरणे विनियोगः॥दक्षिणानामिकाग्रगृहीतभस्मनाॐ—त्र्यायुषं जमदग्नेरितिललाटे।कश्यपस्य त्र्यायुषमिति ग्रीवायाम्।यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले। तत्तेअस्तु त्र्यायुषमिति हृदि बिन्दुरूपं तिलकं कृत्वा दूर्वाक्षतादिग्रहणं कृत्वा नापितं भक्ष्यभोज्यांशुकादिपारितोषिकदानेन सन्तोषयेदित्याचारः ॥

उपनयनम् ।

तत् शुद्धसमय उदगयने जन्मतो गर्भाद्वाष्टमेऽब्दे षोडशवर्षाभ्यन्तरेऽनुकूलदिवसे विहितनक्षत्रेऽनध्यायादिदोषरहिते यथाचारमुपनयनं कुर्य्यात् ॥ सामग्रीं सम्पाद्य अद्येत्यादि० ममैतस्य पुत्रस्य बीजगर्भसमुद्भवैनोनिबर्हणपूर्वकश्रौतस्मार्त्तकर्म्मानुष्ठानसिद्धिद्वारा ब्रह्मवर्चोऽभिवृद्ध्ये इज्याध्ययनदानादिषट्कर्म्मणां पाठहोमादिपंचनित्यानुष्ठानार्हयज्ञादीनां च चातुर्वर्ण्येषु स्वस्ववेदशाखासूत्रप्रवरगोत्रमुनिवर्णितविहिताविहितधर्म्मकरणानुकूलब्रह्मचर्य्यगृहस्थाश्रमादिषु यथामति तत्तत्फलानुसन्धानकृततदुपयोगिकर्म्मणां पंचमहापातकोपपातकातिपापानां ज्ञाताज्ञातप्रायश्चित्ताय एवंविधेऽस्मिन्मखकर्म्मणि षोडशसंस्कारान्तर्गतोपनयनसंस्कारं करिष्ये । तत्पूर्वांगतया त्रीन् ब्राह्मणान् भोजयिष्ये तेभ्यो दक्षिणां चाहं दास्ये । ततो बहिःशालायामानीतं चन्दनपुष्पमाლाद्यलंकृतं नग्नं कृतक्षौरं कुमारमाचार्य्योऽग्नेः पश्चात्स्वस्य दक्षिणतः समुपवेशयति । २ आचम्य अद्येत्यादि० अमुकगोत्रोऽमुशर्म्माहं शिष्यकुलपरम्परागतमेनं सुहृदयं माणवकं कर्त्तव्योपनयनकर्म्मसंस्कारेणोपनयिष्ये ॥ तत्र प्रजापतिं ध्यायन् ॥ हस्तमात्रमितां भूमिं परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोम-

योदकेनोपलिप्य स्रुवमूलेन प्रागग्रा यथोत्तरं तिस्रो रेखा विलिख्योल्लिखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रोपनीतमग्निं तूष्णीं स्वाभिमुखं वेद्यां स्थापयेत् ॥ ततः कुमारं बद्धांजलिं संबोधयत्याचार्य्यः।ॐब्रह्मचर्य्यमागामिति ब्रूहि ॐब्रह्मचर्य्यमागामिति कुमार आह।ब्रह्मचार्य्यसानीति ब्रूहीत्याचार्य्यः।ब्रह्मचार्यसानीति कुमार आह। अथाचार्य्यो माणवकं वासः परिधापयति। तत्राचार्य्यपठनीयो मन्त्रः ॥ येनेति अङ्गिरा ऋषिर्बृहती छन्दो बृहस्पतिर्देवता वासःपरिधाने विनियोगः॥ॐ येनेन्द्राय बृहस्पतिर्वासः पर्य्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ॥ ततो माणवकस्य द्विराचमनम् ॥ अथ माणवकस्य कटिप्रदेशे वेष्टनत्रयेण तत्प्रवरग्रन्थितां मेखलामाचार्य्यो बध्नाति ॥ तत्र माणवकपठनीयो मन्त्रः॥ इयमिति वामदेवऋषिस्त्रिष्टुप्छन्दो मेखला देवता मेखलाबन्धने विनियोगः ॥ ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनतीम आगात् । प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम् ॥ युवा सुवासा इति विश्वामित्रऋषिस्त्रिष्टुप्छन्दोयूपोदेवताऽधोवस्त्रपरिधानेविनियोगः॥ युवा सुवासाः परिवीत आगात् सउश्रेयान् भवति जायमानः। त धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ तत आचार्यो माणवकस्य शिखां बध्नीते सवित्र्या । तत आचार्य्यो माणवकस्य वामस्कन्धे यज्ञोपवीतं निवेशयति। यज्ञोपवीतमितिपरमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिंगोक्ता देवता यज्ञोपवीतपरिधाने विनियोगः ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ तत ऐणेयमजिनं माणवकस्तूष्णीं समन्त्रं वा परिधत्ते ॥ मित्रस्येति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दोऽजिनं देवताऽजिनधारणे

विनियोगः ॥ ॐ मित्रस्य चक्षुर्वरुणं वरीयस्तेजो यशस्यꣳ सुचिरं समिद्धम् । अनाहमस्मिन्वरुणं च जिष्णुम्वरश्रेष्ठवजिनं प्रधत्ते ॥ तत आचार्य्यो माणवकाय दण्डं प्रयच्छति॥तं च यो मे दण्ड इतिप्रजापतिर्ऋषिर्यजुश्छन्दो दण्डो देवता पालाशदण्डग्रहणे विनियोगः।ॐ यो मे दण्ड· परापतद्वैहायसोधिभूम्याम्। तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय ॥ ततो माणवको दण्डमुच्छ्रयति ॥ उच्छ्रयस्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो दण्डो देवता दण्डोच्छ्रयणे विनियोगः ॥ उच्छ्रयस्व वनस्पते ऊर्ध्वो मा पाह्यꣳहस आसयज्ञो दृच ॥ तत आचार्य्यः स्वांजलिगृहीतवारिणा कुमारस्यांजलिं पूरयति ॥ आपोहिष्ठेति सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता उदकसेचने विनियोगः ॥ ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन।महेरणाय चक्षसे।यो वः शिवतमो रसस्तस्य भाजयते हनः । उशतीरिव मातरः। तस्मा अरंगमामवः ॥ इति शिरसि जलं क्षिप्त्वा, यस्य क्षयाय जिन्वथ॥ इति जलं शिरः प्रदक्षिणक्रमेण भूमौ क्षिपेत ॥ आपोजनयथा च नः॥ इति पुनः शिरसि क्षिपेत ॥ ततः सूर्य्यमुदीक्षस्वेति आचार्य्येण प्रेषितो माणवकः सूर्य्यमुदीक्षते ॥ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरुष्णिक्छन्दः सूर्य्यो देवता सूर्य्यमुदीक्षणे विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणयामशरदः शतं प्रब्रवाम शरदः शतमदीना स्याम शरदः शतं भूयश्च शरदः शतात् ॥ अथ कुमारस्य दक्षिणांसं सहृदयं दक्षिणहस्तेन स्पृशत्याचार्य्यः ॥ ममेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता कुमारहृदयालंबने विनियोगः ॥ ॐ मम व्रते ते हृदयं दधामि । मम चित्तमनुचित्तं तेऽस्तु । मम वाचमेकमना जुषस्व। बृहस्पतिष्ट्वा नि-

युनक्तु मह्यम् ॥ ततः कुमारस्य दक्षहस्तं गृहीत्वाचार्य्यस्तं पृच्छति को नामासि । कुमारो ब्रूते । अमुकशर्म्माऽहं भोः । पुनराचार्य्यः पृच्छति कस्य ब्रह्मचार्य्यसि । कुमारो ब्रूते भवत इति । पुनराचार्य्यो ब्रूते ॥ ॐ इन्द्रस्य ब्रह्मचार्य्यस्यग्निराचार्य्यस्तवाहमाचार्य्यः श्रीमदमुकशर्म्मन् ॥ अथ माणवकं बद्धांजलिं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयत्याचार्य्यः । तत्राचार्य्यपठनीयो मन्त्रः ॥ भूतेभ्यः परिददामि प्रजापतये त्वा परिददामीति प्राच्याम् । देवाय त्वा सवित्रे परिददामीति दक्षिणस्याम् ॥ अद्भ्यस्त्वोषधीभ्यः परिददामीति प्रतीच्याम् । द्यावापृथिवीभ्यां त्वा परिददामीत्युदीच्याम् । विश्वेभ्यस्त्वा देवेभ्यः परिददामीत्यधः । सर्वेभ्यस्त्वाभूतेभ्यः परिददाम्यरिष्ट्यै इत्यूर्ध्वम् ॥ ततः कुमारोऽग्निं प्रदक्षिणीकृत्याचार्य्यस्योत्तरत उपविशति ॥ ततो ब्रह्मवरणम् ॥ पाद्यादिभिर्वरणद्रव्यं ब्राह्मणं च सम्पूज्य ॥ अद्येत्यादि० कर्त्तव्योपनयनांगीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुमनेन वरणद्रव्येणामुकगोत्रममुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मीति ब्राह्मणः प्रतिब्रूयात् ॥ यथाविहितं कर्म्म कुरु इत्याचार्य्यः ॥ करवाणीति ब्रह्मा ॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणं कारयित्वा अस्मिन् कर्म्मणि त्वं मे ब्रह्मा भवेत्याचार्य्यः ॥ भवानीति ब्राह्मणः ॥ ततः कल्पितासने ब्रह्माणमुदङ्मुखमुपवेशयेत् ॥ ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततः बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणितापर्य्यन्तं परिस्तीर्य्याग्नेरुत्तरतः पश्चिमदिशि, पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमन-

न्तर्गर्भं कुशद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, सम्मार्जनकुशाः पञ्च, वेणीरूपोपयमनकुशाः सप्त, पालाशसमिधस्तिस्रः, स्रुवः, आज्यम्, पूर्णपात्रम्; एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ॥ ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय व्यस्तं द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा प्रोक्षणीजलस्य त्रिरुत्पवनं कुर्य्यात् ॥ प्रोक्षणीपात्रं वामहस्ते धृत्वा दक्षिणानामिकांगुष्ठाभ्यामुत्तराग्रं पवित्रं गृहीत्वा तेन प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात्। तत आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥स्रुवमधोमुखं प्रताप्य सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात् ॥ तत आज्यमग्नेरवतार्य्याग्रतः संस्थाप्य प्रोक्षणीवत् त्रिरुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षण्युत्पवनं कुर्य्यात् ॥ उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रोऽग्नौ प्रक्षिपेत् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् ॥ तत्राद्यामारभ्य द्वादशाहुतिपर्य्यन्तं प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्त्तव्यः ॥ अग्निदक्षभागे प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतीन्द्राग्निसोमा देवता आज्यहोमे विनियोगः ॐ प्रजापतये स्वाहा, इदं प्रजापतये ॥ ततोऽग्निमध्ये ॥ ॐ इन्द्राय

स्वाहा, इदमिन्द्राय ॥ ततोऽग्निपूर्वार्द्धे ॥ ॐअग्नये स्वाहा, इदमग्नये ॥ ॐसोमाय स्वाहा, इदं सोमाय ॥ ततो वरुणस्योत्त-भनमिति वरुणप्रतिष्ठापूजने कृत्वा व्याहृतित्रयस्य प्रजापतिर्ऋ-षिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः ॥ ॐभूः स्वाहा, इदमग्नये ॥ ॐ भुवः स्वाहा, इदं वायवे ॥ ॐस्वः स्वाहा, इदं सूर्य्याय ॥ एता महाव्याहृतयः ॥ ततः समुद्भवनामाग्निं पाद्यादिभिः सम्पूज्य त्वन्नो सत्वन्नो मन्त्रद्व-यस्य वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ऋक्-ॐ त्वन्नो अग्नेवरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषा ँ सिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐसत्वन्नोअग्ने-वमोभवोतीनेदिष्ठोअस्याउषसो व्युष्टौ ॥ अवयक्ष्वनो वरुण ँ रराणोव्वीहिमृडीक ँ सुहवोनएधिस्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्ने इति मंत्रस्य विराड् ऋषिर्गायत्रीछन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि ॥ अयानो यज्ञं वहास्ययानोधेहि भेषजं स्वाहा ॥ इदमग्नये ॥ येते शतमिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो मंत्रलिङ्गोक्ता देवताः प्रायश्चित्तहोमे विनियोगः ॥ ॐ येते शतंवरुणयेसहस्रंयज्ञियाः पाशाविततामहन्तस्तेभिर्नोअद्यसविती-तविष्णुर्विश्वेमुंचन्तुमरुतः स्वर्काःस्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ उदुत्तममिति शुनःशेपऋ-षिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमंविमध्यम ँ श्रथाय।अथाव्वयमादि त्यव्रतेतवानागसोअदितयेस्यामस्वाहा ॥ इदं वरुणायादितये ॥ एताः प्रायश्चित्तसंज्ञकाः ॥ प्रजापतये स्वाहा, इदं प्रजापतये ॥

अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ॥ संस्रवं प्राश्याचम्य पूर्णपात्रं सम्पूज्य अद्येत्यादि० ममैतस्य कृतैतदुपनयनांगीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः प्रतिष्ठार्थमिदं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणेब्राह्मणाय तुभ्यमहं संप्रददे ॥ ॐ स्वस्तीति प्रतिवचनम् ॥ सुमित्रियान इति दध्यङ्ङाथर्वण ऋषिरापोदेवताःशिरःप्रोक्षणमार्जने विनियोगः ॥ ॐ सुमित्रियानआपओषधयः सन्तु॥पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य।दुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टि यं च वयंद्विष्मः॥इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्य्यात् ॥ देवागात्विति अत्रिर्ऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः । ॐ देवा गांतु विदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञꣳस्वाहा वातेधाः ॥ इति बर्हिर्होमः । कुमारस्यानुशासनम् । आचार्य्यः–ब्रह्मचार्य्यसि । ब्रह्मचारी–भवानि । आचार्य्यः--आपोशान।ब्रह्मचारी--अशानि । आचार्य्यः--कर्म्म कुरु। ब्रह्मचारी--करवाणि। आचार्य्यः–मा दिवा सुषुप्थाः। ब्रह्मचारी–न स्वपानि। आचार्य्यः–वाचं यच्छ। ब्रह्मचारी–यच्छानि । आचार्य्यः--समिधमाधेहि।ब्रह्मचारी–आदधानि । समाचारात्कलशाष्टकदानं लग्नदानादिकं गुरुवरणम् । तत्राधिकारिणः सुश्रुते । ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्तुमर्हति ॥ राजन्यो द्वयस्य । वैश्यो वैश्यस्यैव ॥ गार्ग्यः॥पितैवोपनयेत्पुत्रं तदभावे पितुः पिता । तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥ व्रतबन्धं कुमारस्य विना पितुरनुज्ञया। यः करोति द्विजो मोहान्नरकं प्रतिपद्यते ॥ आचार्य्याणां शतं पिता पाद्यादीनि समर्प्पयामि वरणद्रव्याय नमः गुरवे नमः। सम्पूज्य। अद्येत्यादि० अमुकोऽहं मम श्रौतस्मार्त्तकर्म्माधिकारसम्पादकद्विजत्वसिद्धये ब्रह्मगायत्रीदीक्षाग्रहणक-

र्म्मणि एतेन वरणद्रव्येणामुकदैवतेनामुकगोत्रममुकशर्म्माणं ब्राह्मणं गुरुत्वेन त्वां वृणे। इति दत्त्वा गुरुः वृतोस्मि । शंखघण्टाभेरीमृदङ्गतूर्य्यवादित्रादिरवे जायमाने वेदध्वनिना सह पतिपुत्रवतीस्त्रीणां मङ्गलवाग्जालैर्वितानितदिगम्बरे यज्ञमण्डपे शुभलग्ने गुरुमीक्षमाणाय गुरुणा समीक्षितायाचान्तोदकाय माणवकायाग्नेरुत्तरतः स्वस्य दक्षिणतः प्रत्यङ्मुखोपविष्टाय पिता प्रणवव्याहृतिपूर्व्विकां ब्रह्मगायत्रीं दक्षिणकर्णे त्रिवारं यथाक्रमं श्रावयेत् । तत्र । ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम् । प्रथमतः भर्गो देवस्य धीमहि। प्रथमतः धियो यो नः प्रचोदयात् । गायत्रीं ब्राह्मणस्य त्रैष्टुभीं क्षत्रियस्य जागतीं वैश्यस्य । यद्वा सर्वेषामेव पूर्वां ब्रूयात् । क्षत्रियस्य ॐ ता२ँसवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ॥ यामस्य कण्वो अदुहत्प्रपीना२ँ सहस्रधाराम्पयसा महीं गाम् ॥ वैश्यस्य तु । ॐ विश्वारूपाणि प्रतिमुञ्चते कविप्रासावीद्भद्रं द्विपदे शं चतुष्पदे । विनाकमख्यत्सवितावरेण्योनुप्रयाणमुषसो विराजति ॥ गुरुदक्षिणादानम् । पाद्यादीनि समर्प्पयामि दक्षिणाद्रव्याय नमः । सम्पूज्य अद्येत्यादि० मया कृतस्यास्य ब्रह्मगायत्रीदीक्षाग्रहणकर्म्मणः सांगफलावाप्तये इदं सुवर्णमग्निदैवतं गुरवे तुभ्यं सम्प्रददे । तस्मिन्नेवावसरे स्मार्त्तधर्म्मानुसारेण पञ्चायतनदीक्षामपि गृह्णाति ततस्तत्कालोपस्थितां सन्ध्यां कुर्वीत । सुश्रुवाहोमः । अग्ने सुश्रुव इति पञ्चमन्त्राणां ब्रह्मा ऋषिर्यजूंषि च्छन्दांसि अग्निर्देवताऽग्निसमिन्धने विनियोगः ॥ ॐ अग्ने सुश्रुवः सुश्रवसं मां कुरु स्वाहा । ॐ यथा त्वमग्ने देवानां सुश्रवः सुश्रवा असि स्वाहा । ॐ एवमा२ँ सुश्रवः सौश्रवसं कुरु स्वाहा ॥ ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि स्वाहा ॥ ॐ एवमहं मनुष्याणां देवस्य निधिपो भूयासं

स्वाहा ॥ केचित्तु मन्त्रत्रयमेव वदन्ति । एभिः पञ्चभिर्मन्त्रैरग्नि-
सन्धुक्षणम् । ब्रह्मचारी दक्षिणहस्तेन जलमादाय ईशानादारभ्ये-
शानपर्य्यन्तं भ्रामयेत् । पर्य्युक्ष्योत्थाय एकां समिधमादाय कर्णस-
म्मितां कृत्वा अग्नय इति प्रजापतिर्ऋषिः प्रकृतिश्छन्दः समिदेवता
समिधादाने विनियोगः । ॐ अग्नये समिधमाहार्षं बृहते जात-
वेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया
वर्चसा पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्य्यो मेधाव्य-
हमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्व्यन्नादो भूयासं
स्वाहा॥ अनेनैव मन्त्रेण द्वितीयां तृतीयां च समिधं जुहोति । एषा
त इति प्रजापतिर्ऋषिरनुष्टुप्छन्दः समिदेवता समिधादाने विनि-
योगः।ॐ एषा ते अग्ने समित्तया वर्धस्व चाचप्यायस्व । वर्धिषी-
महि च वयमाचप्याशिषीमहि । द्वितीयां तृतीयां च वा समिधं
जुहोति । सुश्रुवाहोमादिकं पूर्ववत्कृत्वा तूष्णीं पाणिं प्रतप्य मुखं
विमृशेत् । तनूपा इति बृहस्पतिर्ऋषिर्यजुश्छन्दोग्निर्देवताभ्यालम्भने
विनियोगः । ॐ तनूपा अग्नेऽसि तन्वं मे पाहि ॥ आयुर्दाग्नेस्या-
युर्मे देहि ॥ वर्चोदाग्नेऽसि वर्चो मे देहि ॥ अग्ने यन्मे तन्वा ऊनं
तन्म आपृण ॥ मेधां देवः सविता आदधातु ॥ मेधां देवी सर-
स्वती आदधातु ॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ॥
एभिः सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं प्रोञ्छति ॥ अत्र केचन पदार्थाः
समाचारपरम्पराप्राप्ततयालिख्यंते॥ अप्रतप्तपाणिभ्यां शिरःप्रभृति
पादपर्यंतानि सर्वांगानि समालभते ॥ ततो दक्षिणहस्तेन ॐ वाक्
च म आप्यायतामिति मुखं,प्राणश्च म अप्यायतामिति नासिका-
द्वयं, चक्षुश्च म आप्यायतामिति नेत्रद्वयं, श्रोत्रं च म आप्याय-
तामिति कर्णद्वयं, यशोबलं च म आप्यायतामिति बाहुद्वयं, समाल-
भ्यानामिकाग्रगृहीतभस्मना॥त्र्यायुषमिति नारायण ऋषिरुष्णिक्-
छन्दः शिवोदेवता त्र्यायुषकरणे विनियोगः ॥ ॐ त्र्यायुषं जमद-

ग्नेरिति ललाटे ।कश्यपस्य त्र्यायुषमिति ग्रीवायाम्॥यद्देवेषु त्र्यायुषमिति दक्षिणांसे। तन्नो अस्तु त्र्यायुषमिति हृदि ॥ ततो ब्रह्मचारी हस्तद्वयेन कर्णद्वयं गृहीत्वा अमुकगोत्रोऽमुकप्रवरोऽमुकशाख्यमुकवेदाध्याय्यमुकशर्म्माहं भोअग्ने त्वामभिवादये वारत्रयमिति कृत्वा गुरो त्वामभिवादये। आयुष्मान् भव सौम्येति गुरुर्ब्रूयात् ॥ततो भिक्षाचरणम्। ब्रह्मचारी भक्ष्यभोज्यद्रव्यसहितं शंबलं दक्षिणस्कंधे निधाय प्रथमं मातरं भिक्षेत्। अप्रत्याख्यायिनींस्त्रियं वायाचेत्।षड् द्वादश वा अपरिमिता वा भिक्षेत्॥ॐभवति भिक्षां देहि मातरिति ब्राह्मणः ॥ भिक्षां भवति देहीति क्षत्रियः ॥ भिक्षां देहि भवतीति वैश्यः ॥ एवं भिक्षित्वा ब्रह्मचारी गुरवे भिक्षां ददद्वदति भो गुरो इयं भिक्षा मया प्राप्ता । ततो ह वाग्यतस्तिष्ठेत्॥ गुरुर्ब्रह्मचारिणे नियमान् वदति॥अधःशय्या,क्षारलवणाशी, दण्डधार्य्यग्निपरिचर्य्याकरः पूर्वोक्तसमिदाहारकः, मनोवाक्कायकर्म्मभिर्गुरोर्हितकृत् ॥मधुमांसांजनोच्छिष्टशुल्कस्त्रीप्राणिहिंसनम्॥भास्करालोकनाश्लीलपरिवादादि वर्जयेत्॥पर्य्युषिततांबूलदन्तधावनदिवास्वापच्छत्रपादुकागन्धमाल्योद्वर्त्तनानुलेपनजलक्रीडाद्यूतनृत्यगीतवाद्यालापादीनि वर्जयेत्॥मेखलाकटिसूत्रकौपीनयज्ञोपवीताजिनदण्डानां धारणं कार्य्यम् ॥ नष्टानामेषां जले क्षेपणम्। नवानां समन्त्रकं ग्रहणं कार्य्यम्॥ अष्टचत्वारिंशद्वर्षान्तं वेदब्रह्मचर्य्यं चरेत्॥ द्वादश द्वादश वा प्रतिवेदं यावद्ग्रहण वा आचार्य्येणाहूत उत्थाय प्रतिश्रृणुयात्॥शयानश्चेदाचार्यआसीन आसीनश्चेत्तिष्ठन्,तिष्ठँश्चेदभिक्रामन्,अभिक्रामँश्चेदभिधावन् य एवं विद्यमानस्तस्य स्नातकस्य कीर्तिर्भवति ॥ त्रयः स्नातका भवन्ति ॥ विद्यास्नातकः, व्रतस्नातकः, विद्याव्रतस्नातकः, समाप्य वेदं यः समावर्तते स विद्यास्नातकः ॥ समाप्य व्रतं यः समावर्तते स

व्रतस्नातकः ॥उभयं समाप्य समावर्तते यः स विद्याव्रतस्नातकः॥ ब्राह्मणो बिल्वपालाशौ क्षत्रियो वाटखादिरौ ।वैश्योऽश्वत्थौदुम्बरौ च दण्डानर्हन्ति धर्म्मतः ॥

वेदारम्भः ।

सामग्रीं सम्पाद्य ।ॐविष्णुर्विष्णुर्हरिर्हरिः३आचम्य अद्येत्यादि० ममास्य पुत्रस्य श्रौतस्मार्त्तकर्म्माधिकारसम्पादकब्रह्मगायत्रीमन्त्र-दृढीकरणार्थं वेदारम्भमहं करिष्ये इति संकल्प्य पूर्वाङ्गतया त्रीन् ब्राह्मणान् भोजयिष्ये तेभ्यो दक्षिणां चाहं दास्ये॥गणेशादिपंचा-ङ्गपूजां विधाय कुशैर्हस्तमात्रमितां भूमिं परिसमुह्य तान् कुशानै-शान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन यथोत्तरं प्रागग्रास्तिस्रो रेखा विलिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृद-मुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रोपनीतमग्निं तूष्णींस्वाभिमुखंवेद्यां स्थापयेत् वेदारम्भकर्म्मणाहं यक्ष्ये ॥ तत्र प्रजापतिमिन्द्रमग्निं सोममंतरिक्षं वायुं ब्रह्माणं छंदांसि पृथिवीमग्निं ब्रह्माणं छंदांसि दिवं सूर्य्यं ब्रह्माणं छंदांसि दिशश्चन्द्रमसं ब्रह्माणं छंदांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिमनुमतिमग्निं वायुं सूर्य्यमग्नीवरुणौ सवितारं विष्णुं विश्वान्मरुतःस्वर्कान् वरुणमदितिं प्रजापतिं स्विष्ट-कृतं चाज्येनाहं यक्ष्ये ॥ ततो ब्रह्मवरणम् ॥ पाद्यादिभिर्वरणद्रव्यं सम्पूज्य अद्येत्यादि० कर्त्तव्यवेदारम्भाङ्गीभूतहवनकर्म्मणि कृता-कृतावेक्षणरूपब्रह्मकर्म्म कर्त्तुमनेन वरणद्रव्येणामुकदैवतेनामुक-गोत्रममुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे । वृतोस्मीति ब्राह्मणः प्रतिब्रूयात् ॥ यथाविहितं कर्म्म कुर्वित्याचार्य्यः ॥ करवाणीति ब्रह्मा ॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्नेःप्रदक्षिणक्रमेणास्मिन् कर्म्मणि त्वं मे ब्रह्मा भवेत्याचार्य्यः । भवानीति ब्राह्मणः ॥ ततः कल्पि-

तासने ब्रह्माणमुदङ्मुखमुपवेशयेत् । ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्ने-रुत्तरतः कुशोपरि निदध्यात् ॥ ततः परिस्तरणम् ॥ बर्हिषश्चतुर्थ-भागमादायाग्नेयादीशानान्तं ब्रह्मणोग्निपर्य्यन्तं नैर्ऋत्याद्वायव्या-न्तम् । अग्नितः प्रणीतापर्य्यन्तं परिस्तीर्य्याग्नेरुत्तरतः पश्चिम-दिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशद्वयं प्रोक्षणीपात्रम् । आज्यस्थाली सम्मार्जनकुशाः पञ्च, वेणीरूपोपयमनकुशाः सप्त, पालाशसमिधस्तिस्रः, स्रुवः आज्यं पूर्णपात्रम् एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासा-दनीयानि ॥ ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रद-क्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय व्यस्तं द्वाभ्या-मनामिकांगुष्ठाभ्याम् उत्तराग्रे पवित्रे गृहीत्वा प्रोक्षणीजलस्य त्रिरुत्पवनं कुर्य्यात् ॥ प्रोक्षणीपात्रं वामहस्ते धृत्वा दक्षिणाना-मिकांगुष्ठाभ्यामुत्तराग्रं पवित्रं गृहीत्वा तेन प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तु-सेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ ततः आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत ॥ स्रुवमधोमुखं प्रतप्य सम्मार्जनकुशानामग्रैर-न्तरतो मूलैर्बाह्यतः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वद-क्षिणतः कुशोपरि निदध्यात् ॥ तत आज्यमग्नेरवताय्याग्रतः संस्थाप्य प्रोक्षणीवत् त्रिरुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षण्युत्पवनं कुर्य्यात् ॥ उपयमनकुशान् वामहस्ते धृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रोऽग्नौ जुहुयात् । तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुर्ब्रह्मणा-

न्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् ॥ तत्राद्यारभ्य द्वादशाहुतिपर्य्यन्तं हुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्त्तव्यः ॥ अग्निदक्षभागे प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतीन्द्राग्निसोमा देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतय स्वाहा, इदं प्रजापतये ॥ ततोग्निमध्ये--ॐइन्द्राय स्वाहा, इदमिन्द्राय ॥ ततोऽग्निपूर्वार्धे--ॐ अग्नये स्वाहा, इदमग्नये ॥ ॐ सोमाय स्वाहा, इदं सोमाय ॥ ततो वरुणस्योत्तम्भनमिति कलशप्रतिष्ठापूजने कृत्वा ॥ व्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा, इदमग्नये ॥ ॐ भुवः स्वाहा, इदं वायवे ॥ ॐ स्वः स्वाहा इदं सूर्य्याय ॥ एता महाव्याहृतयः ॥ ततो हरिनामाग्निं पाद्यादिभिःसम्पूज्य त्वन्नो सत्वन्नो मन्त्रद्वयस्य वामदेव ऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँ सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ १ ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नो अग्ने वमोभवोतीनेदिष्ठो अस्या उषसोव्युष्टौ । अवयक्ष्व नो वरुण ँ रराणो व्वीहि मृडीक ँ सुहवो न एधि स्वाहा ॥ २ ॥ इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्नेमन्त्रस्य विराड्ऋषिर्गायत्रीछन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्व मया असि । अयानो यज्ञं वहास्य यानो धेहि भेषज ँ स्वाहा ॥ इदमग्नये ॥ ये ते शतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो मन्त्रलिंगोक्ता देवता । प्रायश्चित्तहोमे विनियोगः । ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तस्तेभिर्नो अद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः।
उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्त-
होमे विनियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमँ
श्रथाय। अथाव्वयमादित्यव्रतेतवानागसोअदितये स्याम स्वाहा॥
इदं वरुणायादितये ॥ एताः प्रायश्चित्तसंज्ञकाः ॥ ततो ब्रह्मणा-
न्वारब्ध एव ब्रह्मचारिणं स्वस्योत्तरतोऽग्नेः पश्चादुपवेश्य कर्म्मा-
ङ्गाहुतीर्जुहुयात् ॐ अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय ॥ ॐ
वायवे स्वाहा, इदं वायवे ॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥
ॐ छन्दोभ्यः स्वाहा, इदं छंदोभ्यः ॥ इति यजुषि ॥ ॐ पृथिव्यै
स्वाहा, इदं पृथिव्यै ॥ ॐ अग्नये स्वाहा, इदमग्नये ॥ ॐ ब्रह्मणे
स्वाहा, इदं ब्रह्मणे ॥ ॐ छंदोभ्यः स्वाहा, इदं छंदोभ्यः ॥ इति
ऋग्वेदे ॥ ॐ दिवे स्वाहा, इदं दिवे ॥ ॐ सूर्य्याय स्वाहा, इदं
सूर्य्याय ॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा,
इदं छन्दोभ्यः ॥ इति साम्नि ॥ॐ दिग्भ्यः स्वाहा, इदं दिग्भ्यः॥
ॐ चन्द्रमसे स्वाहा, इदं चन्द्रमसे॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे॥
ॐ छंदोभ्यः स्वाहा, इदं छंदोभ्यः ॥ इत्यथर्वणे ॥ ॐ प्रजापतये
स्वाहा,इदं प्रजापतये॥ ॐ देवेभ्यः स्वाहा, इदं देवेभ्यः ॥ ॐ
ऋषिभ्यः स्वाहा,इदं ऋषिभ्यः ॥ॐ श्रद्धायै स्वाहा, इदं श्रद्धायै॥
ॐ मेधायै स्वाहा, इदं मेधायै ॥ ॐ सदसस्पतये स्वाहा, इदं
सदसस्पतये ॥ ॐ अनुमतये स्वाहा, इदमनुमतये ॥ ॐ प्रजापतये
स्वाहा, इदं प्रजापतये ॥ ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये
स्विष्टकृते ॥ संश्रवं प्राश्याचम्य पूर्णपात्रं सम्पूज्य ॥ अद्येत्यादि॰
ममैतद्वेदारम्भाङ्गहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्मणः
सांगफलावाप्तये प्रतिष्ठार्थमिदं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतम-
मुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ॐ

स्वस्तीति प्रतिवचनम् । सुमित्रियान इति दध्यङ्ङाथर्वण ऋषि-
रापो देवताः शिरःप्रोक्षणमार्जने विनियोगः॥ॐसुमित्रियान आप
ओषधयः सन्त्विति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य
दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यं च वयं द्विष्मः । इत्यै-
शान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ॥ देवागात्विति अत्रिर्ऋषि-
रुष्णिकछन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः ॥ ॐ
देवागातुविदोगातुं वित्वा गातुमितमनसस्पत इमं देवयज्ञ ँ
स्वाहा वातेधाः ॥ इति बर्हिर्होमः ॥ ततो गणेशं विष्णुं शिवं
सूर्य्यं सरस्वतीं लक्ष्मीं स्वविद्यां सूत्रकारं शाखां वेदं प्रवरादिकं
गोत्रं च सम्पूज्य प्रणम्य वेदारम्भकारं गुरुं वृणुयात् ॥ वरणद्रव्यं
पाद्यादिभिःसम्पूज्य ब्राह्मणं च सम्पूज्य । अद्येत्यादि० मम ब्रह्मगा-
यत्रीमन्त्रदृढीकरणार्थं पञ्चयज्ञतत्त्वज्ञानकामनया शरीरशुद्धिद्वारा
ऐहिकामुष्मिकफलसम्पादकवेदारम्भकर्म्मणि एतेन वासोऽङ्गुलीय-
कासनमूल्योपकल्पितेनामुकद्रव्येणामुकदैवतेनामुकगोत्रं शर्म्माणं
ब्राह्मणं वेदारम्भगुरुत्वेन त्वामहं वृणे इति वृत्वा। वृतोऽस्मीति गुरुः॥
ततः प्राङ्मुखोपविष्टाय माणवकाय गुरुर्वेदारम्भं कारयेत् ॥ ब्रह्म-
चारी पवित्रपाणिराचम्य प्राणायामं विधाय॥ ॐ अज्ञानतिमिरा-
न्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे
नमः ॥ इति गुरुं प्रणम्य, वेदारम्भं गुरुद्वारा सप्रणवं कारयेत् ॥
हरिःॐ इषेत्वोर्जेत्वावायवस्थदेवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय
कर्म्मण आप्यायद्ध्वमघ्न्याइन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा
मावस्तेन ईशतमाघशꣳसोध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यज-
मानस्य पशून् पाहि॥ इति पठित्वा अद्येत्यादि० अमुकोऽहं मया
कृतस्य वेदारम्भकर्म्मणःसाङ्गफलावाप्तये इदं द्रव्यममुकदैवतममुक-
गोत्रायामुकशर्म्मणे ब्राह्मणाय गुरवे तुभ्यमहं सम्प्रददे ॥ त्र्यायुष-

मिति नारायण ऋषिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरणे विनियोगः ॥ॐ त्र्यायुषं जमदग्नेरिति ललाटे॥ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषमिति दक्षिणांसे ॥तन्नो अस्तु त्र्यायुषमिति हृदि ॥ काशीगमनम् ॥

समावर्तनम् ।

सामग्रीं सम्पाद्य ॐ विष्णुर्विष्णुर्हरिर्हरिः २ अद्येत्यादि० अमुकगोत्रोमुकोहं ममास्य पुत्रस्य श्रौतस्मार्त्तकर्माधिकारसम्पादकब्रह्मचर्य्यसमापनपूर्वकस्मृतिसूत्रोदितविधिस्वीकाराभ्यन्तर्गतगृहस्थाश्रमसिद्धये स्वशाखीयपद्धत्युक्तप्रकारेण समावर्त्तनसंस्कारं करिष्ये इति संकल्प्य, तदङ्गतया त्रीन् ब्राह्मणान्भोजयिष्ये तेभ्यो दक्षिणां चाहं दास्ये॥ततो ब्रह्मचारी वदति भो गुरो ! अहं स्नास्ये। ततो गुरुर्वदति स्नाहीति ॥ गुर्वाज्ञां शिरसा धारयन् स्नात्वा मंडप आगत्य वेद्यां कुशैर्हस्तमात्रमितां भूमिं परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य, स्फ्येन स्रुवमूलेन प्रागग्रास्तिस्रो रेखा विलिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रोपनीतमग्निं तत्र तूष्णीं स्थापयेत्॥समावर्त्तनकर्म्मणाहं यक्ष्ये॥तत्र प्रजापतिमिन्द्रमग्निं सोममन्तरिक्षं वायुं ब्रह्माणं छंदांसि; दिग्भ्यश्चन्द्रमसं ब्रह्माणं छंदांसि; प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां सदसस्पतिमनुमतिमग्निं वायुं सूर्यं वरुणमग्निं सवितारं विष्णुं विश्वान् मरुतः स्वर्कान् वरुणमदितिं प्रजापतिमग्निं स्विष्टकृतं चाज्येनाहं यक्ष्ये॥ततो ब्रह्मवरणम् ॥ पाद्यादिभिर्वरणद्रव्यं सम्पूज्य ब्राह्मणं च, अद्येत्यादि० कर्त्तव्यसमावर्त्तनांगीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्त्तुमनेन वरणद्रव्येणामुकदैवतेनामुकगोत्रममुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वां वृणे इति वृत्वा वृतोस्मीति प्रतिवचनम्॥यथाविहितं कर्म कुरु इत्याचार्य्यः

करवाणीति ब्रह्मा ॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीयअस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्याचार्य्यः । भवानीति ब्राह्मणः ॥ ततः कल्पितासने ब्रह्माणमुदङ्मुखमुपवेशयेत ॥ ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्॥ततः परिस्तरणम्॥वर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यान्तम्॥ अग्नितः प्रणीतापर्य्यन्तं परिस्तीर्य्याग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशद्वयं, प्रोक्षणीपात्रम्, आज्यस्थाली, सम्मार्जनकुशाः पञ्च, वेणीरूपोपयमनकुशाः सप्त, पलाशसमधस्तिस्रः, स्रुवः, आज्यं पूर्णपात्रम् एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ॥ ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रदक्षिणकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय व्यस्तं द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा प्रोक्षणीजलस्य त्रिरुत्पवनं कुर्य्यात् ॥ प्रोक्षणीपात्रं वामहस्ते निधाय दक्षिणानामिकांगुष्ठाभ्यामुत्तराग्रं पवित्रं गृहीत्वा तेन प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तुसेचनंकृत्वाअग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रं निदध्यात्॥ततआज्यस्थाल्यामाज्यंनिरूप्याधिश्रित्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत्॥स्रुवमधोमुखं प्रतप्य सम्मार्ज्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात् ॥ तत आज्यमग्नेरवतार्य्याग्रतः संस्थाप्य प्रोक्षणीवत्त्रिरुत्पूय चावेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षण्युत्पवनं कुर्य्यात् ॥ उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिध-

स्तिस्रो जुहुयात् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् ॥ तत्राद्यारभ्य द्वादशाहुतिपर्य्यन्तंप्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्त्तव्यः॥ अग्निदक्षभागे प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतीन्द्राग्निसोमा देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा, इदं प्रजापतये ॥ततोऽग्निमध्ये ॐ इन्द्राय स्वाहा, इदमिन्द्राय ॥ ततोऽग्निपूर्वार्धे ॐ अग्नय स्वाहा, इदमग्नये ॥ ॐ सोमाय स्वाहा, इदं सोमाय ॥ ततो वरुणस्योत्तम्भनमिति कलशप्रतिष्ठापूजने कृत्वा व्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः॥ॐ भूः स्वाहा, इदमग्नये ॥ ॐ भुवः स्वाहा, इदं वायवे॥ॐ स्वः स्वाहा, इदं सूर्य्याय॥ एता महाव्याहृतयः ॥ ततो राजपुत्रकनामाग्निं सम्पूज्य, इन्धनं, समिधः, स्नानार्थं वारि—जलं, हरित्कुशाः, कलशाः, वस्त्राणि, दधि, तिलाः, नापितः,औदुम्बरं दन्तधावनम्, उद्वर्त्तनं चन्दनम्, उष्णोदकम्,अहते वाससी, यज्ञोपवीतं, पुष्पमाला, शिरोवेष्टनम्, उत्तरीयं, रांकवम्, अङ्गरक्षकः,अधराम्बरम्, कुण्डले, अञ्जनं, दर्प्पणं, छत्रम्, उपानहौ, वैणवो दण्डः, सहस्रधारा, कौपीनम्, वेदपुस्तकम्, इत्यानीयाङ्गहोमं कुर्य्यात् घृतेन ॥ ॐ अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय॥ ॐवायवे स्वाहा, इदं वायवे ॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः ॥ ॐ पृथिव्यै स्वाहा, इदं पृथिव्यै ॥ ॐ अग्नये स्वाहा, इदमग्नये॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः ॥ ॐ दिवे स्वाहा, इदं दिवे ॥ ॐ सूर्य्याय स्वाहा,

इदं सूर्य्याय ॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः ॥ ॐ दिग्भ्यः स्वाहा, इदं दिग्भ्यः ॥ ॐ चन्द्रमसे स्वाहा, इदं चन्द्रमसे ॥ ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे ॥ ॐ छन्दोभ्यः स्वाहा, इदं छन्दोभ्यः ॥ ॐ प्रजापतये स्वाहा, इदं प्रजापतये ॥ ॐ देवेभ्यः स्वाहा, इदं देवेभ्यः ॥ ॐ ऋषिभ्यः स्वाहा, इदं ऋषिभ्यः ॥ ॐ श्रद्धायै स्वाहा, इदं श्रद्धायै ॥ ॐ मेधायै स्वाहा, इदं मेधायै ॥ ॐ सदसस्पतये स्वाहा, इदं सदसस्पतये ॥ ॐ अनुमतये स्वाहा, इदमनुमतये ॥ त्वं न्नो अग्ने सत्वन्नो अग्ने इति द्वयोर्वामदेव ऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः।यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ᳪसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नो अग्ने वमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्व नो वरुण ᳪरराणो वीहि मृडीकᳪसुहवो न एधि स्वाहा, इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्न इति विराडृषिस्त्रिष्टुप्छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमया असि। अयानो यज्ञं वहास्ययानो धेहि भेषज ᳪ स्वाहा इदमग्नये ॥ ये ते शतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दोलिङ्गोक्ता देवताः प्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तस्तेभिर्न्नो अद्य सवितोतविष्णुर्विश्वेमुञ्चन्तु मरुतःस्वर्काःस्वाहा,इदं सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमᳪश्रथाय।अथाव्वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा, इदं वरुणायादितये॥ॐ

प्रजापतये स्वाहा, इदं प्रजापतये इति मनसा॥ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ॥ संस्रवं प्राश्याचम्य पूर्णपात्रं सम्पूज्य॥अद्येत्यादि अमुकस्य मम समावर्तनाङ्गहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः साङ्गत्वसिद्धये प्रतिष्ठार्थमिदं पूर्णपात्रं सदक्षिणं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणेब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ स्वस्तीति प्रतिवचनम् ॥ सुमित्रिया न इति दध्यङ्गाथर्वणऋषिरापो देवताः शिरःप्रोक्षणमार्जने विनियोगः ॥ ॐ सुमित्रिया न आप ओषधयः सन्तु इति पवित्राभ्यां प्रणीताजलेन शिरः सम्मृज्य दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टि यं च वयंद्विष्मः। इत्यैशान्यां प्रणीतापापात्रं न्युब्जीकुर्य्यात्॥देवागात्विति अत्रिऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता शेषबर्हिर्होमे विनियोगः ॥ ॐ देवागातु विदो गातुं वित्वागातुमितमनसस्पत इमं देवयज्ञं स्वाहा वातेधाःइति बर्हिर्होमः ॥ अथ सुश्रवा होमः ॥ ब्रह्मचारी दक्षिणहस्तेनेन्धनमादाय अग्ने सुश्रवःइत्यादीनां पञ्चानां मन्त्राणां ब्रह्मा ऋषिर्यजूंषि छन्दांसि अग्निर्देवता अग्निसमिन्धने विनियोगः ॥ ब्रह्मचारी अग्नेः पश्चादुपविश्य, ॐ अग्ने सुश्रवः सुश्रवसं मां कुरु स्वाहा ॥ यथा त्वमग्ने सुश्रवः सुश्रवा असि स्वाहा ॥ एवं माँ सुश्रवः सौश्रवसं कुरु स्वाहा ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि स्वाहा॥एवमहं मनुष्याणां देवस्य निधीपो भूयासँ स्वाहा ॥ब्रह्मचारी दक्षिणहस्तेन जलमादाय ईशानादारभ्येशानपर्य्यन्तं भ्रामयेत् ॥ ततोऽग्निं जलेन प्रदक्षिणं पर्युक्ष्य उत्थाय घृताक्तां प्रादेशमात्रामेकां पलाशसमिधमादाय जुहुयात ॥ तत्र मन्त्रः ॥ अग्नय इति प्रजापतिर्ऋषिः प्रकृतिश्छन्दः समिद्देवता समिदाधाने विनियोगः ॥ ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधासमिध्यस एवमहमायुषा मेधया वर्चसा

प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवत्पुत्रो ममाचार्य्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्व्यन्नादो भूयासꣳस्वाहा इत्येकां द्वितीयां तृतीयां च ॥ एषा त इति प्रजापतिर्ऋषिरनुष्टुप्छन्दः समिद्देवता समिदाधाने विनियोगः॥ ॐ एषा ते अग्ने समित्तया वर्द्धस्व चाचप्यायस्व वर्धिषीमहि च वयमाचप्याशिषीमहि स्वाहा ॥ समुच्चयो वा ॥ पूर्ववत्पुनः सुश्रवाहोमं विधाय प्रदक्षिणेनाग्निं जलेन पर्य्युक्ष्य तूष्णीं पाणिं प्रतप्य । तनूपा अग्न इत्यादीनां प्रजापतिर्ऋषिर्बृहतीछन्दो बृहद्यजूंषि छन्दांसि अग्निर्देवता अग्न्युपस्थाने विनियोगः॥ ॐ तनूपा अग्नेसि तन्वं मे पाहि ॥ १ ॥ आयुर्दाऽग्नेस्यायुर्मे देहि ॥ २ ॥ वर्चोदाऽग्नेसि वर्चो मे देहि ॥ ३ ॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ ४ ॥ मेधां मे देवः सविता आदधातु ॥ ५ ॥ मेधां मे देवी सरस्वती आदधातु ॥ ६ ॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ७ ॥ इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं प्रोञ्छति॥ अत्र केचन पदार्थाः समाचारपरम्पराप्राप्ततया लिख्यन्ते॥ अप्रतप्ताभ्यां पाणिभ्यां शिरःप्रभृतीनि पादपर्यन्तानि सर्वाङ्गाण्यालभते आचार्य्यः॥ ततो दक्षिणहस्तेन-अङ्गानि च म आप्ययन्तामिति सर्वाङ्गस्पर्शः ॥ वाक् च आप्यायतामिति मुखे । प्राणश्च म आप्यायतामिति नासिकायाम् । चक्षुश्च म आप्यायतामिति चक्षुषि ॥ श्रोत्रं च म आप्यायतामिति कर्णद्वये । यशोबलं च म आप्यायतामिति द्वयोर्बाह्वोः ॥ उत्थाय पूर्णाहुतिः कार्य्या ॥ पूर्णादर्वीति पूर्णनाभऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो स्वाहा ॥ इति जुहुयात्सफलघृतम् ॥ उपविश्य ॥ त्र्यायुषमिति नारायणऋ-

षिरुष्णिकछन्दः शिवो देवता त्र्यायुषकरणे विनियोगः। ॐ त्र्यायुषं जमदग्नेरिति ललाटे। कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले। तन्नो अस्तु त्र्यायुषमिति हृदि बिन्दुरूपं भस्मनानामिकाग्रहीतेन। ततो व्यस्तपाणिभ्यां पृथिवीं स्पृशन् वैश्वानरं संबोध्याभिवादयेत् ॥ अमुकगोत्रोऽमुकप्रवरोऽमुकशाख्यमुकवेदाध्याय्यमुकशर्म्माऽहं भो वैश्वानर त्वामभिवादये ॥ इति वारत्रयम् ॥ भो सूर्य्य त्वामभिवादये ॥ भो गुरो त्वामभिवादये। आचार्यो ब्रूते आयुष्मान् भव सौम्येति। ततः परिश्रितस्याग्नेरुत्तरतो दक्षिणोत्तरस्थितान् प्रागग्रान् हरितान् कुशान् समास्तीर्य्य तेषु कुशेषु वरुणमन्त्रैः सुप्रतिष्ठितान् सुपूजितान् जलपूरितानष्टौ कलशान् स्थापयेत् स्वयं प्राङ्मुखो भूत्वा प्रथमकलशाज्जलमादत्ते। येप्स्वन्तर इति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता जलग्रहणे विनियोगः ॥ ॐ येप्स्वन्तरग्नयः प्रविष्टागोह्यउपगोह्योमयूखो मनोहास्खलोविरुजस्तनूपादूषुरिन्द्रियहातान् विजहामिथो रोचनस्तमिह गृह्णामि॥ इति जलं सहस्रधारे ताम्रपात्रे संस्थाप्य दक्षिणहस्तचुलुकेनात्मानमभिषिञ्चति ॥ तेनेति प्रजापतिर्ऋषिर्यजुश्छन्द आपोदेवता अभिषेचने विनियोगः ॐ तेनैनमभिषिञ्चामि श्रियै यशसे ब्रह्मणे वर्चसे ॥ सहस्रधाराताम्रपात्रमार्गेण शिरसि जलं प्रक्षिपेत् ॥ ततो द्वितीयकलशाज्जलमादत्ते ॥ येप्स्वन्तरिति मन्त्रेणैव कलशाष्टकाज्जलग्रहणं विधेयम् ॥ अभिषेकमन्त्रास्तु पृथक् पृथक् सन्ति ॥ येनश्रियमिति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता अभिषेचने विनियोगः ॥ ॐ येन श्रियमकृणुतां येनामभृषता ँ सुरान् येनाक्षावभिषिञ्चतां यद्वांतदश्विनायशस्तेन मामभिषिञ्चताम् ॥ ततस्तृतीयात् आपोहिष्ठेति सिन्धुद्वीपऋषिर्गायत्री छन्द आपो

देवता अभिषेचने विनियोगः ॥ ॐ आपो हिष्ठामयोभुवस्तान ऊर्ज्जे दधातन । महेरणाय चक्षसे॥ ततश्चतुर्थात् योव इति सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता अभिषेचने विनियोगः ॥ ॐयोवः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः॥ पञ्चमकलशात् तस्मा अरंग इति सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता अभिषेचने विनियोगः ॥ ॐ तस्माअरंगमामवोयस्यक्षयाय जिन्वथ। आपोजनयथाचनः ॥ षष्ठसप्तमाष्टमकलशेभ्यो युगपज्जलमादाय तूष्णीमभिषेचयेत॥ततोवशिष्टकलशजलैः सहस्रधारया स्नायात् ॥ ॐ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि । ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वतः ॥ इत्यभिषेकः॥ ततो मेखलां शिरोमार्गेण स्वयं मन्त्रं पठन् निस्सारयेत् ॥ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलोन्मोके विनियोगः ॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमविमध्यमँश्रथाय।अथावयमादित्यव्रते तवानागसोअदितयेस्याम ॥ इति मेखलां मुक्त्वा दण्डमजिनं च भूमौ निधाय तूष्णीम् उपकल्पित वासस्तूष्णीं परिधायाचम्य सूर्य्यमुपतिष्ठते ॥ उद्यन्निति प्रजापतिर्ऋषिः शक्करी छन्द आदित्यो देवता सूर्य्योपस्थाने विनियोगः॥ॐ उद्यन्भ्राजिष्णुरिन्द्रोमरुद्भिरस्थाःप्रातर्यावद्भिरस्थादशसनिरसिदशसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजिष्णुरिन्द्रोमरुद्भिरस्थादिवायावभिरस्थाच्छतशनिरसिशतशनिंमाकुर्वाविदन्मागमत्रोद्यन्भ्राजिष्णुर्मरुद्भिरस्थाःसायंयावभिरस्थात्सहस्रशनिरसिसहस्रशनिंमाकुर्वाविदन्मागमयेति ॥ सूर्य्योपस्थानम् ॥ ऊर्ध्वाक्षिप्तबाहुः सन् कुर्य्यात् ॥ तत उपकल्पितं सदधितिलान्नं हस्तमध्यगतसोमतीर्थेन संप्राश्याचम्य नापितद्वारा जटालोमनखान् शातयित्वा वपननिमित्तं शीतोदकेन स्नात्वाचम्य कनिष्ठाग्रस्थूलेनौदुंबरेण द्वादशाङ्गुलेन दन्तधावनेन दन्तान् धावयेत् ॥ अन्नाद्यायेति

आथर्वणऋषिरनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः ॥ ॐ अन्नाद्यायव्यूहध्व ँ सोमो राजायमागमत्।समेमुखंप्रमाक्ष्यतेयशसाचभगेन च ॥ इति दन्तधावनम् ॥ दशाङ्गुलं क्षत्रियस्य ॥ अष्टाङ्गुलं वैश्यस्य॥ततः सुगन्धिद्रव्येण शरीरोद्वर्त्तनं कृत्वा तत्तजलेन स्नात्वाचम्य चन्दनोपग्रहणम्॥प्राणापानाभ्यामिति प्रजापतिर्ऋषिर्यजुश्छन्दः प्राणापानौ देवते चन्दनोपग्रहे विनियोगः ॥ ॐ प्राणापानौमेतर्प्पय चक्षुर्मे तर्प्पय श्रोत्रंमेतर्प्पयनासिकांमेतर्प्पय ॥ इतिमस्तके चन्दनम्॥ हस्तौ पादौ प्रक्षाल्यापसव्यं कृत्वा तदवनेजनं दक्षिणामुखः पितृतीर्थेन भूमौ निषिंचेत् ॥ पितर इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयो यजुश्छन्दः पितरो देवताः सौत्रामण्यां विनियोगः ॥ ॐ पितरः शुन्धध्वम् ॥ इत्यवनेजनम् ॥ सव्यं कृत्वाचम्य ॥ सुचक्षाहमिति प्रजापतिर्ऋषिर्यजुश्छन्दो लिङ्गोक्ता देवता जपे विनियोगः ॥ ॐ सुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेन सुश्रुत्कर्णाभ्यां भूयासम् ॥ इति जप्त्वाधोवासः परिधत्ते ॥ परिधास्याइत्याथर्वणऋषिः पङ्क्तिश्छन्दो वासो देवताऽधोवासःपरिधाने विनियोगः॥ॐपरिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि ॥ शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये॥ ततो यज्ञोपवीतम् ॥ यज्ञोपवीतमिति परमेष्ठीऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवतोपवीतपरिधाने विनियोगः ॥ ॐ यज्ञोपवीतं परमं पवित्रंप्रजापतेर्यत्सहजंपुरस्तात्। आयुष्यमग्र्यंप्रतिमुचशुभ्रंयज्ञोपवीतं बलमस्तु तेजः ॥ इति यज्ञोपवीतम् ॥ ततोङ्गरक्षकं देशाचारात् परिधत्ते ॥ अथोत्तरीयम् ॥ यशसामित्याथर्वणऋषिः पङ्क्तिश्छन्दो लिङ्गोक्ता देवता उत्तरीयपरिधाने विनियोगः॥ॐयशसामाद्यावापृथिवीयशसेन्द्रा बृहस्पती॥ यशोभगश्चमा विदद्यशोमाप्रतिपद्यताम्। इति परिधानादिकम् ॥ ततो द्विराचमनम्॥ ततः पुष्पाणि गृह्णाति।

या आहरदिति भारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवताः पुष्पग्रहणे विनियोगः ॥ ॐ याअहरज्जमदग्निः श्रद्धायै कामायेंद्रियाय ता अहं प्रतिगृह्णामि यशसाचभगेनच ॥ इति पुष्पग्रहणम् ॥ अथ मालां बध्नीते ॥ यद्यशोऽप्सरसामिति भारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता मालाबन्धने विनियोगः ॥ॐ यद्यशोऽप्सरसामिन्द्रश्चकारविपुलं पृथु॥तेन संग्रथिताः सुमनस आबध्नामि यशो मयि ॥ इति मालाम् ॥ तत उष्णीषं शिरसि वेष्टयति ॥युवेति विश्वामित्रऋषिर्यजुश्छन्दः शिरो देवता शिरोवेष्टने विनियोगः ॥ युवासुवासाः परिवीतआगात्सउश्रेयान् भवतिजायमानः॥ तन्धीरासः कवयउन्नयन्तिस्वाध्योमनसादेवयन्तः ॥ इत्युष्णीषम् ॥ अलङ्करणादीनि कुण्डले वा ॥ अलङ्करणमिति प्रजापतिर्ऋषिरनुष्टुप्छन्दः श्रीर्देवताऽलङ्करणपरिधाने विनियोगः ॥ ॐ अलङ्करणमसिभूयोलंकरणंभूयात् ॥इति कुण्डले ॥ ततोऽञ्जनम् ॥ वृत्रस्येति प्रजापतिर्ऋषिर्यजुश्छन्दोञ्जनंदेवता नेत्राञ्जने विनियोगः ॥ ॐवृत्रस्यासिकनीनिकश्चक्षुर्दाअसिचक्षुर्मेदेहि ॥इत्यञ्जनं नेत्रद्वये॥ ततो दर्प्पणम् ॥ रोचिष्णुरिति प्रजापतिर्ऋषिर्यजुश्छन्द आदर्शो देवता दर्प्पणोदीक्षणे विनियोगः ॥ ॐ रोचिष्णुरसि ॥ इति दर्प्पणं दृष्ट्वा छत्रं गृह्णाति ॥ बृहस्पते इति गौतमऋषिर्बृहतीछन्द आकाशो देवता छत्रग्रहणे विनियोगः ॥ ॐ बृहस्पतेछदिरसिपाप्मनोमामन्तर्धेहितेजोयशसोमामन्तर्धेहि ॥ इतिच्छत्रम् ॥ प्रतिष्ठेति प्रजापतिर्ऋषिर्विराट् छन्द उपानहौ देवते उपानद्ग्रहणे विनियोगः ॥ ॐ प्रतिष्ठेस्थोविश्वतोमापातम् ॥ इति पादुकारोहणम् ॥ ततो वैणवं दण्डं गृह्णाति ॥ विश्वाभ्य इति याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो दण्डो देवता दण्डग्रहणेविनियोगः॥ॐविश्वाभ्यो मानाष्ट्राभ्यस्परिपाहिसर्वतः॥इति दण्डं धृत्वा ब्रह्मचारी स्वस्थः सन् आचार्य्यमुखोद्गतस्नातकोपयुक्तनियमान् शृणुयात् तत्राचार्य्यो वदेत्॥ गानवादि-

न्नृत्यानि क्रियमाणानि चापरैः॥न पश्येन्न स्वयं कुर्य्याच्छ्रुतिराह सनातनी॥१॥षड्जादिस्वरैर्ध्रुवादिरूपकविशेषैश्च निबद्धं गानम्॥ तन्त्र्यादिस्वरैश्चतुर्विधं वादित्रम्॥ लास्यादिभेदभिन्नं नृत्यम्॥ नक्तं ग्रामान्तरे यानं तथा धावनमेव च॥ कूपावलोकनं वृक्षारोहणं फलकृन्तनम्॥ २ ॥ नग्नस्नानं शैलगर्त्तलंघनं सन्धिसर्प्पणम्॥ असत्यभाषणं त्याज्यं श्रुतिराह सनातनी॥ ३॥ उदितास्तमयं सूर्यं न पश्येत्स्वमुखं जले॥ स्नानं विना भैक्ष्यवृत्तिं स्वीकुर्य्याच्छ्रुतिराह च॥ ४॥ "आप ह वै स्नात्वा भिक्षां जयति" इति श्रुतेः॥ न कुत्रचिद्भ्रमं कुर्य्याद्देवे वर्षति सर्वदा॥ आवश्यकेऽयं मे वज्रः पाप्मानमपहनत्पठेत्॥ ५॥ स्त्रियं नोपहसेत्केशरहितां गुर्विणीं तथा॥ परस्त्रियं च विजने न ब्रूयान्न रमेत्कचि-॥६॥ क्लीबं जनं नोपहसेत्सदात्र स्याद्दृढव्रतः॥ स्वकीयकैः परैः सार्धं कुर्य्यात्सख्यं सदैव हि॥ ७॥ वत्सं धयन्तीं परगां चरन्तीं क्षेत्रमध्यतः॥ न ब्रूयात्स्वामिने तस्याः श्रुतिराह सनातनी॥८॥ तृणानन्तर्हितायां च सस्यवत्यां तथा भुवि॥ तथोत्सर्प्पन्समुत्तिष्ठन्न मूत्रं न मलं त्यजेत्॥ ९॥ प्रशीर्णेनापि काष्ठेन प्रमृजीत गुदं सदा॥ मञ्जिष्ठारंजितं वासो विकृतं नैव धारयेत्॥ १०॥ अथ त्रिरात्रनियमाः॥ न मृन्मये पिबेत्तोयं नाद्यान्मांसं च कर्हिचित्॥ स्त्रीशूद्रकृष्णशकुनिशुनां दर्शनकं त्यजेत्॥ ११॥ तत्सम्पर्कान्नपानीयं तैः सार्धं भाषणं तथा॥ आतपे ष्ठीवनं मूत्रं पुरीषं नैव संत्यजेत्॥१२॥ नान्तर्दधीत स्वात्मानं सूर्य्यात्तप्तोदकेन च॥ अर्थाद्दृते न च स्नायादित्याह परमा श्रुतिः॥ १३॥ नकुलञ्च भगालं च कपालं च मणेर्धनुः॥ न पश्येदन्त्यरात्रौ च नाश्नीयादन्नमेव च॥१४॥ क्रमेणार्थः॥ नकुलं, भगलम्पटं, मनुष्यादिशिरः,इन्द्रधनुः॥ सत्या वाणी प्रवक्त-

व्या विधेयं गुरुनन्दनम् ॥ पञ्चयज्ञाः प्रकर्त्तव्या इत्याह परमा श्रुतिः ॥१६॥ ततो रक्षाबन्धनाज्यावलोकननवग्रहपूजनदक्षिणादानाभिषेकतिलकमन्त्रपाठब्राह्मणभोजनान्तानि विदध्यात् ॥ अद्येत्यादि० मम चूडोपनयनवेदारम्भसमावर्त्तनकर्म्मसु पूर्वाङ्गत्वेन पूजिता इमाः स्वर्णादिप्रतिमा अग्न्यादिदेवताः नवग्रहादिप्रीतये अमुकामुकगोत्रेभ्योऽमुकशर्म्मभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे तासां प्रतिष्ठार्थं दक्षिणां दास्ये ॥ अद्येत्यादि० ममोपनयनवेदारम्भसमावर्त्तनकर्म्मसु कारितस्य ब्राह्मणद्वारा सकलाचार्य्यपुस्तकाचार्य्यवास्तुकाचार्यसदस्याचार्यऋत्विग्जपपाठद्वारपालादिकर्म्मणां साङ्गफलावाप्तये इमां स्वर्णरजतताम्रादिखण्डकल्पितां दक्षिणाममुकामुकगोत्रेभ्योऽमुकशर्म्मभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ ततो भूयसीं दत्त्वा वैदिकपुराणोक्तमन्त्रैः स्नातको ब्राह्मणद्वाराऽभिषेकतिलकमन्त्रपाठादीनि गृह्णीयात् ॥ आचारात्काश्यां गमनं च विधेयम् ॥ गायत्रीमन्त्रदृढस्मरणावधि मांसतैलकोद्रवमाषान्नादीनि गर्ह्याण्यन्यानि च भोज्यवस्तूनि संत्यजेत् । गोदानम् ॥ प्राङ्नामकरणाद्बालः प्रागन्नप्राशनाच्छिशुः।प्राङ्मौञ्ज्याः स्यात्कुमारस्तु नववर्षाणि माणवः॥मौंजी दार्भी ब्राह्मणस्य धनुस्तार्णी च वाल्कली । क्षत्रियस्य शणोद्भूता सदौनी वैश्यकस्य हि ॥

वाग्दानविधिः ।

कृतसंविधःकन्यापिता जामातृपितरमाहूय गणेशवरुणौ सम्पूज्येन्द्राणीं पूजयेत् ॥ अदित्यैरास्नासीति दध्यङ्ङाथर्वणऋषिर्यजुश्छन्द इन्द्राणी देवतेन्द्राण्यावाहने विनियोगः । ध्यानम् ॥ वामे करे प्रकर्तव्या सौम्या सन्तानमंजरी ॥ वरदा मण्डिताभूषैर्द्विभुजा सर्वदा शची ॥ ऋक्-ॐ अदित्यैरास्नासीन्द्राण्या उष्णीषः

पूषासि घर्मायदीष्व ॥ ॐ भूर्भुवः स्वः इन्द्राणीहागच्छेह तिष्ठ ॥ आवाहनम् ॥ देवेन्द्राणि महाभागे सर्वसौख्यपरायणे। आगच्छ मम कल्याणं साधयस्व शिवप्रदे ॥ पाद्यम् ॥ शुद्धपात्र-स्थितं दिव्यं जलं मार्गश्रमापहम् । पाद्यमेतत्सुखस्पर्शं गृहाणेन्द्र-प्रिये सदा ॥ अर्घ्यम्॥गङ्गादितीर्थसम्भूतं मुद्रात्रयविनिर्म्मितम् । कलात्रयेण सम्बद्धमर्घ्यं गृह्ण शचीश्वरि ॥ पञ्चामृतम् । सिता-मध्वाज्यसंयुक्तं दधि दुग्धं मयार्पितम् । पञ्चामृतं गृहाण त्वं देवेन्द्राणि वरप्रदे ॥ स्नानीयम् ॥ गङ्गाद्यनेकतीर्थेभ्यो मया प्रार्थनयाहृतम् । जलं सुगन्धसंमिश्रं गृहाणेन्द्रप्रिये जलम् । चन्दनम् ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्॥ विलेपनं सुरश्रेष्ठे गृहाण सुरपप्रिये॥ अक्षताः ॥ शुद्धमुक्ताफला-भैस्तैरक्षतैः शशिसन्निभैः । द्योतयामि महाभागे पुलोमतनुजे शुभे ॥ पुष्पाणि ॥ स्थलारविन्दपुष्पाणि प्रचुराणि मयानघे । आनीतानि गृहाण त्वं शचीदेवि नमोस्तु ते ॥ धूपः ॥ वनस्पति-रसोत्पन्नो गन्धाढ्यो धूप उत्तमः । गृह्यतामिन्द्रकान्ते मे नीतोयं सुखदे त्वया॥दीपः।साज्यतूलजवर्त्तीभिर्ज्वलन्तीभिः समन्ततः । सज्जीकरोमि त्वां देवि पश्याजस्रं पुलोमजे ॥ नैवेद्यम् ॥ शर्करा-खण्डखाद्यानि स्वाद्वन्नानि निवेदये। गृहाण परमप्रीत्या घृताक्तानि वृषप्रिये ॥ पानीयम् ॥ शचीदेवि महत्पुण्यं गृहाणोपजलं शिवे । करानानाङ्घ्रिशुद्ध्यर्थं नानागन्धसमन्वितम् ॥ उपायनम् ॥ हिरण्यगर्भगर्भस्थं हैमं बीजं विभावसोः । अनन्तपुण्यफलदं गृह्ण देवेन्द्रभामिनि ॥ फलम् ॥ इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ पुष्पांजलिः ॥ देवे-न्द्राणि मयानीतं पुष्पाञ्जलिमनुत्तमम् ॥गृहाण परमप्रीत्या सर्वसौ-भाग्यसुन्दरि ॥ प्रार्थना ॥ इन्द्राणीन्द्रपदस्थे त्वं ज्ञानतोऽज्ञानतो

मया॥यत्पूजितासि वरदे क्षमस्व प्रणतिप्रिये ॥ वारत्रयं गोत्रोच्चारणं कृत्वा लग्नसामयिकग्रहनिमित्तदानानि च कृत्वा स्थालीस्थयज्ञोपवीतफलस्वर्णाङ्गुलीयवस्त्रतण्डुलहस्तःकन्यापितोत्थाय॥ ॐ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया । कन्यावलोनविधौ निश्चितस्त्वं सुखी भव॥अष्टवर्षादिका कन्या पुत्रवत्पालिता मया । त्वपुत्त्राय प्रदास्यामि स्नेहेन परिपाल्यताम् ॥ व्यंगः क्लीबः पङ्क्तिहीनो निर्विद्यो व्यसनी ऋणी ।तावत्तव सुतो न स्यात्कन्यां दास्यामि निश्चयात् ॥ इति वरपित्रे स्थालीस्थं द्रव्यं दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ ततो वरगृहागतसौभाग्यद्रव्यं कन्यायै सुवासिनीद्वारा मङ्गलवाद्यवेदध्वनिपुरस्सरं परिधापयेत् ॥ भूयसीदक्षिणादानम् ॥ तिलकमन्त्रपाठः ॥

धूल्यर्घः ।

अद्येत्यादि० ममास्याः कन्याया बीजगर्भसमुद्भवैनोनिबर्हणपूर्वकं भविष्यद्भर्त्रा सह दाम्पत्यैश्वर्य्यसिद्धिसम्पादकसत्पुत्रोत्पादनादिगार्हस्थ्यसुखावाप्तये आचार्य्यपूजनपूर्वकं गृहागतवरार्चनं करिष्ये ॥ उत्तराभिमुखः स्वयं पूर्वाभिमुखं वरं काष्ठपीठे साधुभवानास्तामर्चयिष्यामो भवन्तमिति दाता कथयित्वा उपस्थापयेत् ॥ अर्चयेति वरो ब्रूयात् ॥ पञ्चाशता कुशैर्ब्रह्मा तदर्धेन तु विष्टरः ॥ विष्टरमादाय विष्टरो विष्टरो विष्टरः ॥ विष्टरः प्रतिगृह्यतामिति दाता वदेत् ॥ विष्टरं प्रतिगृह्णामीति वरो वदेत् । विष्टरं वरस्य दक्षिणचरणस्याधः स्थापयेत् । तत्र मन्त्रः॥ वर्ष्मोस्मीति अथर्वण ऋषिरनुष्टुप्छन्दो विष्टरो देवतोपवेशने विनियोगः ॥ ॐ वर्ष्मोस्मि समानामुद्यतामिवसूर्य्यः ॥ इमंतमभितिष्ठामियोमांकश्चाभिदासति ॥ तत्रोदकमादाय पाद्यंपाद्यंपाद्यमिति दाता वदेत् ॥ पाद्यं प्रतिगृह्णामीति वरो वदेत् ॥ विराजो दोहो

सीति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता दक्षिणपादप्रक्षालने विनियोगः ॥ ॐ विराजोदोहोसिविराजो दोहमशीय मयिपाद्यायै विराजो दोहः ॥ इति दाता वरस्य दक्षिणचरणं प्रक्षालयेत् ॥ पुनः विष्टरमादाय विष्टरो विष्टरो विष्टरः ॥ विष्टरः प्रतिगृह्यतामिति दाता वदेत् ॥ विष्टरं प्रतिगृह्णामीति वरो वदेत् ॥ ततो विष्टर वरस्य वामचरणस्याधः स्थापयेत् ॥ वर्ष्मोस्मीति अथर्वणऋषिरनुष्टु-प्छन्दो विष्टरो देवतोपवेशने विनियोगः ॥ ॐ वर्ष्मोऽस्मि समा-नामुद्यतामिव सूर्य्यः ॥ इमंतमभितिष्ठामियोमांकश्चाभिदासति ॥ पुनः दाता तत्तं पाद्यमञ्जलावादाय पाद्यं पाद्यं पाद्यम् ॥ पाद्यं प्रतिगृह्यतामिति दाता वदेत् ॥ पाद्यं प्रतिगृह्णामीति वरो वदेत् ॥ विराजो दोहोसीति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता वामपादप्रक्षालने विनियोगः ॥ ॐ विराजो दोहोसि विराजो दोहमशीयमयि पाद्यायै विराजो दोहः ॥ इति दाता वरस्य वामचरणं प्रक्षालयेत् ॥ ततोऽर्घ्यकरणम् ॥ जलं दधि घृतं क्षीरं बदरी तण्डुलास्तिलाः । सिद्धार्थकास्तथा दर्भा अर्घ्योऽष्टाङ्गः प्रकीर्तितः ॥ इमं दर्भान्वितमष्टाङ्गमर्घ्यं हस्ते धृत्वा दाता वरस्य० । नाभौ हस्ते प्रदातव्यः स्कन्धे शिरसि वक्त्रके ॥ जानुनोश्चोदरे दात्राष्टाङ्गाऽर्घ्यो वरपूजने ॥ अर्घ्योर्घ्योर्घ्यः ॥ अर्घ्यः प्रतिगृह्यतामिति दाता वदेत्॥ अर्घ्यं प्रतिगृह्णामीति वरो ब्रूयात् ॥ दाता—ॐ आगतोऽसि वरश्रेष्ठ सर्वकामार्थसिद्धये । प्रतिग्रहसमर्थोऽसि गृहाणार्घ्यं नमोऽस्तु ते ॥ ततो वरः ॥ आपः स्थ इति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता अर्घ्यग्रहणे विनियोगः ॥ ॐ आपःस्थयुष्माभिःसर्वान्कामानवाप्नवानीति ॥ दातृहस्तादर्घ्यं स्ववामहस्ते निधायाभिमन्त्रयते ॥ समुद्रं व इति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवताअर्घ्याभिमन्त्रणेविनियोगः॥

ॐ समुद्रंवः प्रहिणोमिस्वांयोनिमभिगच्छत अरिष्टास्माकंवीरामापरासेचिमत्पयः ॥ इति वरोर्घ्यस्थ जलमैशान्यां दिशि त्यजेत् ॥ ततो दातृशिरसि किंचिदक्षतादिकं दद्यात् ॥ ततो दाताऽऽचमनीयमादाय आचमनीयमाचमनीयमाचमनीयम् ॥ आचमनीयं प्रतिगृह्यतामिति दाता वदेत् ॥ आचमनीयं प्रतिगृह्णामीति वरो वदेत् ॥ ततो वरो दातृहस्तादाचमनीयमादाय । आमागन्निति परमेष्ठी ऋषिर्बृहतीछन्द आपो देवता आचमनीये विनियोगः ॥ ॐ आमागन्यशसास९ँसृजवर्चसा ॥ तं माकुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिंतनूनाम् ॥ इति वरः । सकृदाचम्य स्मार्त्ताचमनं च कृत्वा वारद्वयं तूष्णीमाचामेत् ॐ असौयस्ताम्रोअरुणउतबभ्रुःसुमङ्गलः ॥ ये चैन९ँरुद्रा अभितोदिक्षुश्रिताःसहस्रशोवैषा९ँहेडईमहे ॥ असौ योव्वसर्प्पति नीलग्रीवो विलोहितः। उतैनंगोपा अहशन्नहशन्नुदहार्य्यः सदृष्टो-मृडयाति नः ॥ इति पठेत् ॥ ततः कांस्यपात्रे दधिमधुघृतानि कांस्यपात्रपिहितानि दाताऽऽदाय ॥ ॐ मधुपर्को मधुपर्को मधुपर्कः ॥ मधुपर्कः प्रतिगृह्यतामिति दाता वदेत् ॥ ॥ मधुपर्कं प्रतिगृह्णामीति वरो वदेत्॥ मित्रस्य त्वेति बृहस्पतिर्ऋषिर्यजुश्छन्दो मधुपर्को देवता दातृकरस्थमधुपर्कावेक्षणे विनियोगः ॥ ॐ मित्रस्यत्वाचक्षुषाप्रतीक्ष्य सर्वाणिभूतानि समीक्षन्तां मित्रस्यचक्षुषासमीक्षामहे । इति दातृकरस्थं मधुपर्कं निरीक्ष्य वरः । देवस्य त्वेति बृहस्पतिर्ऋषिर्यजुश्छन्दः सविता देवता मधुपर्कग्रहणे विनियोगः ॥ ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् ॥ वरो दातृहस्तान्मधुपर्कपात्रं गृहीत्वा वामहस्ते निधाय ॥ नमः स्यावास्येति प्रजापतिर्ऋषिर्यजुश्छन्दः सविता देवता स्वहस्तगतमधुपर्कावेक्षणे विनियोगः ॥ ॐ नमः स्यावा-

स्या यान्नशने यत्त आविद्धं तत्तेनिष्कृन्तामि॥इत्यनामिकाङ्गुष्ठाभ्यां त्रिः प्रदक्षिणमालोड्य किंचिदनामिकाङ्गुष्ठाभ्यां भूमौ मधुपर्कं क्षिपेत् ॥ यन्मधुन इति कुत्सऋषिर्जगती छन्दो मधुपर्को देवता मधुपर्कप्राशने विनियोगः ॥ ॐ यन्मधुनो मधव्यं परमꣳरूपमन्नाद्यं तेनाहं मधुनो मधव्ये परमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसानि ॥ इत्यनामिकया त्रिर्मधुपर्कं वरः प्राश्नीयात् ॥ प्रतिप्राशनं यन्मधुन इति पठेत् ॥ ततो मधुपर्कशेषमसंचरे देशे धारयेत् ॥ ततो द्विराचमनम्॥ततो यजमानो वरस्य द्वाभ्यां हस्ताभ्यां सर्वाङ्गान्यालभेत् ॥ वरपठनीयो मन्त्रः ॥ ॐ वाङ्मआस्येऽस्तु नसोर्मेप्राणोस्तु अक्ष्णोर्मे चक्षुरस्तु कर्णयोर्मे श्रोत्रमस्तुबाह्वोर्मे बलमस्तुऊर्व्वोर्मे ओजोस्तुअरिष्टानि मेङ्गानितनूस्तन्वामेसह सन्तु इति सर्वाङ्गानिसमालभ्य यजमानोर्च्यायाचान्तोदकाय वराय गौर्गौर्गौः गांयच्छेत् स च वरो गृहीत्वा, मातेति ब्रह्मा ऋषिस्त्रिष्टुप्छन्दो गौर्देवता गोरभिमन्त्रणे विनियोगः ॥ ॐ मातारुद्राणांदुहिता वसूनाꣳस्वसादित्यानाममृतस्यनाभिः॥ प्रनुवोचंचिकितुषेजनायमागामनागामदितिं वधिष्ट ॥ इति मम चामुष्ययजमानस्य पाप्मा हत ॐ इत्युक्तोत्सृजत तृणान्यत्तु ॥ उच्चैरुक्तादातृशिरसि द्वाभ्यां हस्ताभ्यां पुष्पं दत्त्वा गोदानं कुर्य्यात् ॥ तदभावे तिलसुवर्णदानं कुर्यात्॥वरः पाद्यादीनि समर्प्पयामि सरजतसुवर्णतिलान्नायनमः॥ब्राह्मणायनमः॥सम्पूज्य। अद्येत्यादि॰ अमुकोहं मयाकृतस्य प्राचीनरीत्यनुकरणिकगवालम्भनध्वनिकवाग्जनितगोवधरूपोपपातकक्षयपूर्वकं प्रयश्चित्ताङ्गतयाऽऽत्मनोऽमुष्य यजमानस्य विशुद्ध्यर्थं सर्वारिष्टखण्डनार्थं गोरभाव इदं सरजतसुवर्णतिलान्नसम्प्रतिष्ठं चन्द्राग्निविष्णुदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यं सम्प्रददे॥इति दत्त्वा प्रार्थयेत् ॥ ॐ तिलाः स्वर्णसमायुक्ताः

सर्वपापहराः स्मृताः ॥ तस्मादेषां प्रदानेन नश्यन्त्वेनांसि सर्वतः॥ इति सम्प्रार्थ्य ॥ वरं वृणुयात् ॥ तत्र वरणद्रव्यम् ॥ स्वर्णांगुलीयवासांसि फलं भाजनमासनम्॥यज्ञोपवीतं माला च द्रव्यं वरसमर्हणे॥ पाद्यादीनि समर्प्पयामि ॥ स्वर्णाङ्गुलीयसहितवासोभ्यो नमः ॥ ब्राह्मणाय नमः ॥ सम्पूज्य। अद्येत्यादि० अमुकोऽहं ममास्याःकन्याया बीजगर्भसमुद्भवैनोनिबर्हणपूर्वकदाम्पत्यैश्वर्य्यफलाभिवृद्धये करिष्यमाणविवाहसंस्कारकर्म्मणि एभिः स्वर्णाङ्गुलीयवासोभिरग्निबृहस्पतिदैवतैरमुकगोत्रममुकप्रवरममुकशाखिनममुकवेदाध्यायिनममुकशर्म्माणं ब्राह्मणं विष्णुरूपिणं कन्यादानप्रतिग्राहकत्वेन त्वां वृणे ॥ इति वरणद्रव्यं वराय प्रयच्छेत्॥ततो वरः वृतोस्मीति प्रतिवचनानन्तरं पठेत्॥कोदात् कस्मा अदात्कामोदात्कामायादात्कामोदाताकामः प्रतिग्रहीताकामैतत्ते॥ इति पठित्वा ततो वस्त्राणि मन्त्रपठनपूर्वकं परस्परं कन्यावरौ परिदधाते ॥ जराङ्गच्छेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वासो देवता वासः परिधाने विनियोगः ॥ ॐ जराङ्गच्छपरिधत्स्ववासो भवाकृष्टीनामभिशस्तिपावा॥शतंचजीवशरदःसुवर्चारयिंचपुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्ववासः ॥ इति वासः परिधाय ॥ याअकृतंन्निति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वासो देवतोत्तरीयपरिधाने विनियोगः ॥ ॐया अकृतंन्नवयंयाअतन्वत ॥ याश्चदेवीस्तंतूनभितोततन्थतास्त्वादेवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥ इत्युत्तरीयं परिधाय। परिधास्यै इत्यथर्वणऋषिः पङ्क्तिश्छन्दो वासो देवताऽधोवासःपरिधाने विनियोगः ॥ ॐ परिधास्यैयशोधास्यैदीर्घायुत्त्वायजरदष्टिरस्मि॥शतं च जीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये॥ इत्यधोवासः परिधाय ॥यशसामिति अथर्वणऋषिः पङ्क्तिश्छन्दो वासो देवता कञ्चुकादिपरिधाने विनियोगः ॥ ॐ

यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती ॥ यशो भगश्च माविदद्यशो मा प्रतिपद्यताम् ॥ इति कञ्चुकं परिधापयेत् ॥ युवा सुवासा इति विश्वामित्र ऋषिस्त्रिष्टुप्छन्दो यूपो देवतोष्णीषपरिधाने विनियोगः ॥ ॐ युवासुवासाःपरिवीत आगात्सउश्रेयान्भवति जायमानस्तंधीरासः कवय उन्नयंतिसाध्योमनसादेवयंतः ॥ इत्युष्णीषं वरः परिदध्यात् ॥ ततो वरायालङ्करणानि दद्यात् ॥ हिरण्यगर्भसम्भूतं पवित्रं चाङ्गुलीयकम् । भद्रपदं प्रदास्यामि प्रीणातु कमलापतिः ॥ क्षीराब्धिमथने पूर्वं चोद्धृतं कुण्डलद्वयम् । श्रिया सह समुद्भूतं ददे श्री प्रीयतामिति ॥ अशून्यं शयनं नित्यमशून्यासुन्नतिं श्रियम् । सौभाग्यं देहि मे नित्यं शय्यादानेन केशव ॥ हंसतूलीसमायुक्तां मृद्वीं खट्वामलङ्कृताम् । सर्वोपस्करणोपेतां शिवशय्यां निवेदये ॥ परापवादपैशुन्यादभक्षस्य च भक्षणात् । उत्पन्नपापं दानेन ताम्रपात्रस्य नश्यतु ॥ यानि पापानि काङ्क्ष्याणि कालोत्थानि कृतानि वा । कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ वस्त्राणां छादनं यस्मादतः स्थावरजङ्गमम् । तस्मादेतत्प्रदानेन मम सन्तु मनोरथाः ॥ ततो धूल्यर्घांदतक्षिणां दद्यात् ॥ ततो हस्तमात्रभूमिं कुशैः परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य जलेनाभ्युक्ष्य स्रुवमूलेन प्रागग्रास्तिस्रो रेखा विलिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य पुनर्जलेनाभ्युक्ष्य तूष्णीं कांस्यपात्रोपनीतमग्निं स्वाभिमुखं वेद्यां स्थापयेत् ॥ॐ भूर्भुवः स्वः अग्न इहागच्छेह तिष्ठ ॥ ॐ प्रसीद वह्ने सप्तार्चे कृशानो हव्यवाहन ॥ अग्ने पावक शुक्राय नामाष्टक नमोस्तु ते ॥ इत्यग्निं संप्रार्थ्य ॥ वेदीशानभागे दीपं प्रज्वालयेत् ॥

कन्यादानविधिः ।

देशाचाराद्वाद्यघोषवेदध्वनिपुरस्सरो वरः कौतुकागारं गच्छन् दातृद्वारा कन्यावरान्तरे वस्त्रं दद्यात् ॥ समञ्जन्त्विति भार्गवऋषिरनुष्टुप्छन्दो सूर्य्योदेवताऽन्तरपटकरणे विनियोगः ॥ ॐ समञ्जन्तु विश्वेदेवाः समापोहृदयानिनौ ।संमातरिश्वासंधातासमुदेष्ट्रीदधातनौ ॥ इति वरः पठेत् ॥ ततो वरकन्ययोर्हस्तेन गणेशादिपञ्चाङ्गदेवतानां पूजनं कारयितव्यम् ॥ ततोगोत्रोच्चारणं वरस्य पूर्वं पश्चात्कन्यायाश्च विधेयम् ॥ कन्यापक्षीयो ब्राह्मणो मङ्गलाचरणोच्चारणपूर्वकं वरपक्षीयं ब्राह्मणं पृच्छेत् ॥ ॐ जामातः कम्पसे किं गलभुजगभयाज्जृम्भसे किं सनिद्रः किं प्रस्वेदोग्निदाहात्पुलकिततनुता मूर्ध्नि मे शीतनाथः ॥ बाहोस्ते कङ्कणोयं त्रुटति शिव कथं नास्ति प्रत्युत्तरं मे पृष्टो गौरीसखीभिः परिणयसमये लज्जितः पातु शंभुः ॥ किं गोत्रस्य किं प्रवरस्य किं शाखिनः किं वेदाध्यायिनः कस्य शर्म्मणः प्रपौत्राय पौत्राय पुत्राय ॥ ततो वरपक्षीयः ॥ कन्ये किं हृदयेऽतिकम्पनमिदं भीत्या जनानां मम किं नेत्रेऽरुणतां गतेऽतिविषमान्निद्राविभङ्गात्तथा ॥ किं सीमन्तपदं सुकान्तिरहितं शीर्षस्य कण्डूयनादित्थं शैवगणान् वदंत्यपिमुहुर्गौरीसलज्जाऽवतु॥अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्मणः प्रपौत्राय पौत्राय पुत्राय किं गोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्म्मणः प्रपौत्रीं पौत्रीं पुत्रीम् ॥ ततः कन्यापक्षीयः ॥ किं गोत्रं चात्रिसंज्ञं प्रवरमपि च किं काण्वमौद्गाभ्रभाव्यं का शाखा काण्वसंज्ञा निगममपि च ।किं याजुषं सुप्रसिद्धम्॥ कस्तातो जन्मदा का प्रभुरवनिरपि भ्रातृसंज्ञश्च को नो पृष्टो गौरीसखीभिःपरिणयसमये लज्जितः पातु शंभुः ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदा-

ध्यायिनोऽमुकशर्म्मणःप्रपौत्रीं, पौत्रीं, पुत्रीं किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्मणः प्रपौत्राय पौत्राय पुत्राय ॥ ततो वरपक्षीयः किं गोत्रं कश्यपाख्यं प्रवरमपि हि किं दाक्ष्यवत्सारधौम्यं का शाखा पैंगिराख्या निगममपि च किं सामसंज्ञं वद त्वम् ॥ कस्तातः शैलराजः सुमुखि च जननी कास्ति ते मेनकाख्या पृष्टा शैवैर्गणैः सा प्रतिवदितुमनाः पार्वती पातु नित्यम् ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्म्मणः प्रपौत्राय, पौत्राय, पुत्राय किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्म्मणः प्रपौत्रीं पौत्रीम्, पुत्रीम् ।ततःकन्यापक्षीयः ॥ कस्त्वं शूली मृगय भिषजं नीलकंठः प्रियेहं केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ॥ स्थाणुर्मुग्धे न हि वदति तरुर्जीवितेशःशिवाया गच्छाटव्यां प्रतिहतवचाः पातु नित्यं महेशः॥अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्रीं, पौत्रीं,पुत्रीं, किंगोत्रस्य किं प्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्मणःप्रपौत्राय पौत्राय, पुत्राय ॥ ततो वरपक्षीयः ॥ अंगुल्या का कपाटं प्रहरति कुटिला पार्वती मन्दवाणी नो गौरी मन्दवर्णा किमु भवति शिवारण्यके किं गता नो ॥ अद्य,हं किन्तु काली न हि शिवगृहिणी द्वारदेशे स्थिता किं दंपत्योः संविवादोद्गतशिवफलदा वाक्परा पातु नित्यम् ॥ अमुकगोत्रस्यामुकवरस्यामुकशाखिनोऽमुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्राय, पौत्राय, पुत्राय, किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्मणः प्रपौत्रीं, पौत्रीं, पुत्रीम् ॥ ततः कन्यापक्षीयः ॥ कोयं द्वाराग्रवासी वदति पशुपतिः किं वृषो नार्धनारी किं षण्डो नैव शूली किमपि हि सरुजो न प्रिये नीलकण्ठः ॥

ब्रूहि त्वं किं मयूरो न हि भवति शिवः किं पुराणः शृगालो देव्या केलिप्रयुक्तिप्रतिहतवचनः पातु वश्चन्द्रचूडः ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोमुकवेदाध्यायिनोमुकशर्मणः प्रपौत्रीं, पौत्रीं, पुत्रीं, किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्मणः प्रपौत्राय, पौत्राय, पुत्राय किंनाम्ने वराय॥ततोवरपक्षीयः॥ यत्कंठे गरलं विराजतितरां शीर्षे च मन्दाकिनी क्रोडे चैव शिवामुखं कटितटे शार्दूलचर्माम्बरम् ॥ माया यस्य रुणद्धि विश्वमखिलं पायात्स पञ्चाननो जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोमुकवेदाध्यायिनोमुकशर्म्मणः प्रपौत्राय, पौत्राय, पुत्रायामुकनाम्ने विष्णुस्वरूपिणे वराय, किंगोत्रस्य किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः कस्य शर्म्मणः प्रपौत्रीं, पौत्रीं, पुत्रीं, किंनाम्नीं कन्याम् ॥ ततः कन्यापक्षीयः ॥ यो द्रोणाचलमादधौ करतले योऽतीतरत्सागरं यश्चोद्दाततितवांस्तरून्नुदवहत्पुच्छेन दावानलम् ॥ यो रक्षांसि रणेऽरुणत्कपिवरः पायाद्धनूमांस्ततो जंबूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत्। अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनोमुकवेदाध्यायिनोमुकशर्मणः प्रपौत्रीं, पौत्रीं, पुत्रीममुकनाम्नीं श्रीस्वरूपिणीं कन्याम् ॥ इति वरकन्याभ्यां मन्त्रपाठो देयः ॥ ततो गोत्रोच्चारणदक्षिणां दद्यात्। ततो लग्ने समायाते ग्रहदानानि कुर्य्यात्। स्वयमुत्तराभिमुखः पश्चिमाभिमुखीं कन्यां पूर्वाभिमुखाय वराय विधिना दद्यात् ॥ दीर्घकाष्ठे शिलापृष्ठे नौकायां शकटे तटे। विवाहे बहुसंपर्के स्पर्शदोपो न विद्यते ॥ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम् ॥ वरोसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः॥ इति वरं सम्प्रार्थ्य कन्यां सम्पूज्य सुवर्णजलतिलकुशतुलसीदलदुग्धचन्दनाक्षतदूर्वापूरितं शंखपात्रं स्वहस्ते निधाय तदुपरि

कन्यादक्षिणांगुष्ठं च निधाय श्रीमद्भगवतोऽनन्तवीर्य्यस्यादि-
नारायणस्यापरिमिताचिन्त्यशक्त्या ध्रियमाणस्यमहाजलौघमध्ये
परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तस्य महदहं-
कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेस्मिन्महति ब्रह्माण्डख-
ण्डमध्ये आधारशक्तिश्रीमदादिवराहकूर्म्मानन्ताष्टदिग्गजोपरि
प्रतिष्ठितस्यैकैकस्यातलवितलसुतलभूतलतलातलमहातलपाताल-
सप्तपाताललोकस्योपरितले भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजन-
लोकतपोलोकसत्यलोकषट्कस्याधोभागे यमुनाद्यस्य चक्रवाल-
शैलमहामलयनगमध्ये वर्त्तिनो महाकालशेषधराधरस्य फणिशत-
सहस्रफणामण्डलमण्डिते ऐरावतपुण्डरीकवामनकुमुदांजनपुष्प-
दन्तसार्वभौमसुप्रतीकाख्याष्टदिग्गजशुण्डादण्डस्तम्भिते अमराव-
तीनयनवतीसिद्धवतीयववतीगन्धर्ववतीकांतिवतीलंकावतीनामपु-
रीप्रतिष्ठितस्य पूर्वाग्नियमनैर्ऋत्यवरुणवायव्यकुबेरेशानादिदिक्प्र-
तिष्ठिते लोकालोकाचलविगलितेलवणेक्षुसुरासर्प्पिर्दुग्धदधिजला-
दिसप्तार्णवैः परिवृते जम्बूप्लक्षशाल्मल्यंकुशपुष्करशाकादिसप्तद्वी-
पेष्विन्द्रद्वीपकांस्यसौरताम्रगभस्तिसौम्यचारणगन्धर्वभरतेतिनव-
खण्डानां मध्ये माल्यवन्तकिष्किन्धासहितसकलजगत्स्रष्टुर्हिरण्य-
शृंगादिपंचमहानगस्रतिते हिमशैलकूटहेमकूटत्रिकूटाचलश्वेताचल-
हिमाचलवह्निकूटाचलनिषधाचलादिगन्धमादनविपुलाचलसुपा-
र्श्वाचमन्दराचलमाल्यवदचलत्रिकूटाचलतपतिगिरिशिखिवासवै-
डूर्य्याचलश्रीशैलस्य शिखरकूटाचलहंसाचलसह्याचलविन्ध्याच-
ललोहाचलशृंगवदारण्ये महाशैलस्य मध्येऽधिष्ठिते इन्द्रखण्ड-
शैलखण्डताम्रखण्डनागरखण्डगभस्तिखण्डचारणखण्डनवखण्डा-
त्मके महामानससरोवराकारपंचाशत्कोटियोजनभूमण्डलविस्तृते
भूमण्डले हिरण्यवर्षयोर्दक्षिणे कूर्म्मभुवि मलयाचलादुत्तरे

प्रत्येकं नवयोजनभूमण्डलविस्तृते भारतकिम्पुरुषहरीलावर्त्त-
कृतभद्रभास्करमनुहिरण्मये नववर्षाणां मध्ये चन्द्रप्रस्थयमप्रस्थ-
सुप्रवर्त्तकमिहरणकल्पाहरणपांचजन्यसप्तलंकेतिनवखण्डे प्रजाप-
तिक्षेत्र दण्डकारण्यचम्पकारण्यबदरिकारण्यकामिकारण्यपुष्पका-
रण्यवृन्दारण्यदक्षारण्यनैमिषारण्यनहुषारण्यद्वैपारण्यगुहारण्यदेव-
दारुकारण्यादिद्वादशारण्ययुते सौम्यवतीकुरुक्षेत्रहस्तिनापुरकावेरी
गङ्गयोर्मध्येमायापुरीताम्रतपोवनगङ्गाद्वारकुब्जाप्रयागताम्रप्रयाग-
भरतलक्ष्मणशत्रुघ्नरघुनाथाधिष्ठितनानाक्षेत्रशोभितेगणेशप्रयागस-
त्यश्वरदेवप्रयागवह्नितीर्थब्रह्मतीर्थरोहिणीतीर्थवसिष्ठतीर्थशिवतीर्थ-
वेतालकुण्डसूर्य्यकुण्डवराहतीर्थपौष्पमाल्यतीर्थदेवतीर्थचन्द्रकूटप-
र्वतकोलासुरनदीतीर्थमंजुघोषशिवक्षेत्रभिल्लेश्वररामपादुकाश्रमढुंढि-
प्रयागधर्म्मकुण्डगरुडतीर्थदीप्ताज्वालेश्वरीराकेश्वरीखाण्डवनदीच-
ण्डमुण्डासुरक्षेत्रोस्फालकेश्वरकरिभैरवमेनकानदीलास्यतीर्थेन्द्राणी-
नदीगौरीप्रयागविनायकेश्वरश्रीचक्रमञ्जुवतीशिवप्रयागसूर्य्यकुण्ड
नारदकुंडाश्वतीर्थदेवलाश्रमराजराजेश्वरीभैरवीकालिकापीठाष्टावक्र-
केदारनाथकमलेश्वरकंसमर्दिनीचपलाकिलकिलेश्वरनागेश्वरकटु-
केश्वरकोटीश्वरगौरीसत्यनाथमहिषमर्दिनीप्रसिद्धदेवतावृतेरुद्रस्कं-
दकर्णनन्दिविष्णुकेशवप्रयागनानानदीसंगमजनितमहाप्रयागोप-
प्रयागशोभिते अलकनन्दाभागीरथीकालिन्दीसरस्वतीमन्दाकि-
नीभोगवतीक्षीरगंगामधुगंगास्वर्गारोहिणीवासुकीभिल्लांगनापिण्ड-
रनन्दाकिनीमन्दाकिनीगरुडगंगाकांचनगंगापातालगंगाविष्णुगं-
गाऋषिगंगाधवलागंगादितीर्थशोभिते सुरनदीदशधाराकेदार-
नाथतुंगभद्ररुद्रकल्पकमलनाथादिशिवलिंगालंकृते वसुदेवदेवकी-
वसुधाराकालीतीर्थतप्तकुण्डनारदकुण्डगौरीकुण्डनारदशिलाकूर्म्म-
शिलाशोभिते गङ्गोत्तरीयमुनोत्तरीपूर्वोत्तरत्रिशूलवाराणसीविश्वना-
थप्रवालतीर्थाद्यन्यतमनागेश्वरपर्वताकाशमातृकाचलनानागंगाद्वा-

रोर्द्ध्वभागीयदण्डधाराकूर्म्मधारानारसिंहगारुडशिलानारदकोडके-
दारगंगामार्कण्डेयवह्नितीर्थकुबेरदुर्गागणेशघण्टाकर्णोद्भवनरनारा-
यणनगब्रह्मकपालप्रह्लादप्रभृतिपुण्योदयश्रीवदरीनाथपुरीमध्यवर्ति-
नि अयोध्यामथुरामायाकाशीकांच्यवन्तिकाद्वारावतीप्रभृतिपुण्य-
प्रदपुरीषु सगरनगरवत्सगुल्मनगरस्वामिनगरमहामानससरो-
वराकारविस्तीर्णे श्रीशैलस्य पश्चिमदिग्भागे कृष्णाकावेरीगंग-
योर्मध्ये श्रीमज्जलनिधिसन्निविष्टभुजंगभोगशयनस्य देवतीर्थादि-
सकलजगत्स्रष्टुः समानेपरार्धद्वयजीविन आदिब्रह्मणः प्रथमधर्म्मस्य
पञ्चाशदधिकतमे वर्षे प्रजापतिक्षेत्रे अपरिमितमहिम्नो नारायणस्य
ब्रह्ममूर्त्तेः प्राप्ततत्त्वदूरीकृतभेदभावनस्य सकलानिगमशास्त्रविदि-
तोंकाररूपस्य प्रथमदिवसे द्वितीययामे तृतीयमुहूर्त्तेप्रथमप्राणकाले
पार्थिवकल्पकूर्म्मकल्पानन्तकल्पब्रह्मकल्पानां मध्ये श्वेतवराहकल्पे
प्रलयकल्प इति सप्तानां कल्पानां मध्ये सप्तमे सितकल्पे
स्वायम्भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषवैवस्वतसावर्णिसूर्य्य-
सावर्णिरुद्रसावर्णिब्रह्मसावार्णिधर्म्मसावार्णिदेवसावर्णीन्द्रसावर्णिरो-
चिषादिचतुर्दशमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरेऽष्टावि-
शतिमे कृतत्रेताद्वापरान्ते कलियुगे दशावतारेषु मत्स्यकूर्म्मवराह-
नृसिंहवामनपरशुरामरामचन्द्रबलभद्रकृष्णबौद्धकल्किनां मध्येनव-
मेबौद्धावतारेयुधिष्ठिरविक्रमशालिवाहनविजयाभिनन्दननागार्जु-
नकल्किप्रभृतिशककारकनृपतीनां मध्ये वर्त्तमाने विक्रमादित्यव-
त्सरेप्रभवादिषष्टिसँव्वत्सराणांमध्येऽमुकवत्सरेऽमुकायनेऽमुकमा-
सेऽमुकपक्षेऽमुकनक्षत्रेऽमुकयोगेऽमुकोपयोगेऽमुककरणेऽमुकवासरेऽ
मुकराशिस्थिते सूर्य्ये चन्द्रे भौमे बुधे बृहस्पतौ शुक्रे शनौ राहौ
दिवा नक्तं वा समुल्लिखितगुणविशिष्टायामसुकतिथावमुकगोत्रो-
ऽमुकराशिःसहपत्नीपुत्रपरिग्रहोमुकशर्म्माहम् मम-ब्राह्मणस्य रुजः

कृत्या घ्रातिरघ्रेयमद्ययोः। जैह्म्य मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥ खरोष्ट्राश्वमृगेभाजाविकमीनाहिसैरिभान् ॥ यो हन्ति तं संकरीकरणं स्पृशति किल्बिषम् ॥ निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ॥ असत्यभाषणं ज्ञेयमपात्रीकरणं बुधैः ॥ कृमिकीटवयोहत्यामद्यानुगतभोजनम् ॥ फलैधःकुसुमस्तेयमधैर्य्यं च मलावहम् ॥ पारुष्यमनृतं चैव पैशुन्यं सर्वतस्तथा ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ॥ असम्बद्धप्रलापश्च वाङ्मयं च चतुर्विधम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ अस्यास्तनुतनुलतायाः शारीरिकसम्बन्धनिष्टत्वग्रोमावलिकलितकालावच्छिन्नशोकविशोकवैकुण्ठलोकौकसः प्रार्थ्यमानपितृपरिवारजनसम्प्रार्थ्यमानसबहुमानात्मधनमनःप्राप्तिकामनयातद्वासिजनसन्ध्यमानतथ्यातथ्यजेगीयमानयशोवितानानीयमानमालाभासितपालितरोदसीविवरवरविश्रान्तविक्रांतचतुर्दशलोकाधारसारत्वसप्ततन्तुषट्कर्म्मसहलीलसुशीलसप्तमुनिसदोमध्याध्यासितमुनिमनोमनत्वस्वत्वत्रिदशपतिवशवर्त्तिकोटिगन्धर्वमध्यनिरवद्याप्सरोजनसन्तानकालजेगीयमानसप्तस्वरविसृत्वरनिद्राविद्रावितप्राकृतसुखपरमाह्लादप्राप्तये सदैव वरवध्वोश्च दानमानपुरस्सरनिःसीमप्रेमवल्लीपल्लवकुसुमाविकलफलप्राप्तये दातृप्रतिग्रहीत्रोश्च विपुलकुलकुवलयनिरुत्त्पत्यरुचिविवृद्धये आध्यात्मिकाधिभौतिकाधिदैविकतापत्रयनिराकरणाय ज्ञाताज्ञातमनोवाक्कायकर्म्मजनिताखिलपापापनोदनाय च अस्यां कन्यायां वरादस्मात्समुत्पादयिष्यमाणसन्तत्या आत्मनो मातृपितृवंशजान् द्वादशपूर्वान्द्वादशपरान् पितॄन्पवित्रीकर्त्तुमात्मनः पवित्रीकरणार्थं सपिण्डपितृगणनिरतिशयसानन्दब्रह्मलोकावाप्तये अमुकगोत्रस्या

मुकप्रवरस्यामुकवेदोपवेदाध्यायिनोऽमुकशाखिनोऽमुकसूत्रिणोऽ-
मुकशिखापादिनोऽमुकदेवोपासकस्यामुकशर्म्मणः प्रपौत्रीं पौत्रीं
पुत्रीममुकनाम्नीं सालंकारां सयौतुकां प्रजापतिदेवतां श्रीस्वरूपि-
णीमिमांकन्याम् अमुकगोत्रस्यामुकप्रवरस्यामुकवेदोपवेदाध्यायि-
नोऽमुकशाखिनोऽमुकसूत्रिणोऽमुकशिखापादिनोऽमुकदेवोपास-
कस्यामुकशर्म्मणः प्रपौत्राय,पौत्राय,पुत्रायामुकशर्म्मणे विष्णुस्व-
रूपिणे वराय तुभ्यं देवाग्निब्राह्मणसाक्षिकतया पत्नीत्वेन सम्प्रददे
इति शंखान्वितं कन्यादक्षिणांगुष्ठं वरदक्षिणहस्ते दद्यात् स च
कन्यांगुष्ठमंचलग्रन्थिबन्धनपर्यन्तं न मुञ्चेत् । स्वस्तीति
प्रतिवचनम् । प्रार्थना । कन्यां कनकसम्पन्नामनेकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वम्भरा
सर्वहिता साक्षिणः सर्वदेवताः ॥ इमां कन्यां प्रदास्यामि
पितॄणां तारणाय च ॥ कन्या लक्ष्मीः समाख्याता वरो नारायणः
स्मृतः ॥ तस्मादस्याः प्रदानेन विष्णुर्मे प्रीयतामिति ॥ गौरीं
कन्यामिमां विप्र यथाशक्तिविभूषिताम् ॥ गोत्राय शर्म्मणे तुभ्यं
दत्तां त्वं समुपाश्रय ॥ कन्ये ममाऽग्रतो भूयाः कन्ये मे देवि
पार्श्वतः ॥ कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ वरश्च
देवस्यत्वेति० । दाता—ममान्वये समुद्भूता पालिता वत्सरा-
ष्टकम् ॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी ॥ धर्म्मे
चार्थे च कामे च नातिचरितव्या त्वयेयम्॥ नातिचरामीति वरः।
सुवर्णम् । अद्य कृतैतत्कन्यादानकर्म्मणः सांगफलावाप्तये प्रतिष्ठा-
र्थमिदं सुवर्णमग्निदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्य-
महं सम्प्रददे । दत्त्वा परस्परं युवा सुवासा इति वरकन्ययोः
कटिदेशे संलग्नमंचलग्रन्थिं बध्नीयात् । देशाचाराच्छोलिका-

दानम् । जीवत्पतिपुत्रवतीस्त्रीद्वारा कांस्यपात्रस्थद्रव्यं कन्याहस्तेन कदलीफलाम्रफलमातुलुंगफलद्राक्षाफलदाडिमीफलपूगफलजातीफलजम्बीरफलनारिंगफलनारिकेलफलबीजपूरफलपनसफलाक्षोटकफलानि सदिक्षुदण्डोत्तराणि सुवर्णरौप्यकांस्यादिपात्रस्थितानि जीवत्पतिपुत्रवतीस्त्रीहस्तेन ब्राह्मणाय दद्यात् । याःफलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुंचन्त्व ँ हसः ॥ द्वितीयम् ॥ कर्प्पूरलवङ्गवासितखण्डमरीचशर्कराघृतसंस्कृतानिमोदकघृतपूरकुण्डलिनीमल्लपूपामृतशष्कुलीफेणिकादीनि सर्वरसान्वितानि विविधपक्वान्नानि सुवर्णरौप्यकांस्यादिपात्रस्थितानि जातमात्रजीवत्पुत्रवतीस्त्रीहस्तेन ब्राह्मणाय दद्यात् ॥ ॐ अन्नपतेन्नस्य नोदेह्यनमीवस्य शुष्मिणः । प्रप्रदातारं तारिष ऊर्ज्जं नोधेहि द्विपदे शं चतुष्पदे ॥ तृतीयम् ॥ माणिक्यमहानीलपद्मरागरत्नमुक्ताखचितहाटकमुकुटहंसहंसावलिकेयूरहस्तांगुलीयपादकटकपादाङ्गुलीयग्रैवेयकशिरोरत्नकाञ्चीवल्लानासिकेयमालादिविविधाभरणानि सुवर्णरौप्यकांस्यादिपात्रस्थितानि जातमात्रजीवत्पुत्रवतीस्त्रीहस्तेन सुवासिन्यै दद्यात् ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधारपृथ्वीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ॐ रूपेण वो रूपमभ्यागांतुथो वो विश्वेवेदा विभजेतु ऋतस्य पन्थाः प्रेत चन्द्रदक्षिणा विश्वः पशव्यंतरिक्षं यतस्वसदस्यैः ॥ चतुर्थम् ॥ हरितश्वेतपीतरक्तनीलमाञ्जिष्ठक्षौमकार्प्पासोर्णांबरसहितानिनानादिग्देशजातानि बहुक्रयक्रीतानि सर्वदृष्टिमनोहराणि स्यूतांबराणि सुवर्णजलसिंचनशोभितानि सुवर्णरौप्यकांस्यादिपात्रस्थितानि जातमात्रजीवत्पुत्रवतीस्त्रीहस्तेन कन्यायै दद्यात् ॥ ॐ यदश्वायवास उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै संदानमर्वंतं पड्वीशंप्रियोदेवेष्वायामयंति ॐ स्वर्णघर्म्मः स्वाहा ॥ ॐस्वर्णार्कः स्वाहा । ॐस्वर्णज्योतिःस्वाहा ।

ॐ स्वर्णशुक्रः स्वाहा ॥ केचित्पंचवारं सप्तवारं वा कुर्वन्ति ॥ इति छोलिकाभरणदानम् ॥ ततः कौतुकागाराद्वरः श्वशुरदत्तां कन्यां वहिर्निष्क्रामयेत् ॥ ॐ यदैषीति अथर्वणऋषिरनुष्टुप्छन्दो दिग्देवता निष्क्रामणे विनियोगः ॥ ॐ यदैषिमनसादूरंदिशोनुपमानोवाहिरण्यपर्णोवैकर्णः । सत्वामन्मनसां करोतु श्री अमुकीदेवीति पठन् वरस्तां निष्क्रामति ॥ ततो वरकन्ययोः परस्परनिरीक्षणम् ॥ अघोरचक्षुरित्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुबनुष्टुप्छन्दसी कुमारी देवता परस्परनिरीक्षणे विनियोगः ॥ ॐ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामास्योनाशन्नोभवद्विपदे शंचतुष्पदे ॥ ॐ सोमः प्रथमोविविदेगंधर्वोविविदउत्तरः । तृतीयोऽग्निष्टपतिस्तुरीयस्तेमनुष्यजः ॥ ॐ सोमोददद्गन्धर्वायगन्धर्वो ददद्ग्नये । रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमाम् ॥ सानः पूषाशिवतमामेरयसानऊरूउशतीविहर । यस्यामुशंतः प्रहरामशेफंयस्यामुकामावहवोनिविष्टचै ॥ वरः पठन् परस्परं निरीक्षणं कुर्य्यात् । ततो बहिः षोडशस्तंभान् प्रदक्षिणीकृत्य चतुर्हस्तां चतुरस्रां वेदिकां शुद्धोदकेनोपालिप्य तत्र कटं निधायाग्नेः पश्चाद्वधूं स्वदक्षिणतः समुपवेश्य वामतः स्वयमुपविश्य वरः सामग्रीं सम्पाद्य पूर्वमुखः संकल्पयेत् ॥ अद्येत्यादि० अमुकोहं श्वशुरदत्तामेनां कन्यां ब्रह्मविधिना संस्कारयिष्ये ॥ इति संकल्पः ॥ वेदिकादक्षिणदिशि स्कंधस्थकलशं कंचिद्ब्राह्मणमभिषेककरणार्थं वृत्वा स्थापयेत् ॥ ततो ब्रह्मवरणम् ॥ पाद्यादीनि समर्पयामि वासोङ्गुलीयकासनमूल्योपकल्पितवरणद्रव्याय नमः संपूज्य ब्राह्मणाय नमः ब्राह्मणं च सम्पूज्य अद्येत्यादि० अमुकोहं ममास्या वध्वाः करिष्यमाणविवाहाङ्गीभूतद्विसप्ततिसख्यकघृताहुतिकर्म्मणि कृताकृतावेक्षणरूपब्रह्मक-

र्म्मकर्त्तुमेतेनवरणद्रव्येणामुकदैवतेनामुकगोत्रामुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणेइति वृत्वा॥वृतोस्मीति ब्राह्मणप्रतिवचनम् ॥ यथाचतुर्मुखो ब्रह्मा वेदशास्त्रविशारदः । तथा त्वं मम यज्ञेऽस्मिन् भव ब्रह्मा द्विजोत्त॥इति संप्रार्थ्य ॥ यथाविहितं कर्म कुरु इति वरः करवाणीतिब्राह्मणः॥ततोग्नेर्दक्षिणतःशुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीयास्मिन्म-र्मणि त्वं मे ब्रह्मा भवेत्यभिधाय कल्पितासने ब्रह्माणमुदङ्मुखमु-पवेशयेत्॥तत आचार्यं वृत्वा प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ ततः परिस्तरणम्॥कुशचतुर्थभागमादायाग्नेयादीशा-नान्तं ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतम् अग्नितःप्रणीतापर्य्यंतं परिस्तीर्य्य अग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं कुशद्वयं प्रोक्षणीपात्रमाज्यस्थाली-सम्मार्जनीरूपकुशाः पंच, वेणीरूपोपयमनकुशाः सप्त, स्रुवः आज्यं पलाशसमिधस्तिस्रः तंडुलपूर्णपात्रम् एतानि पवित्रच्छेद-नकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ॥ तस्यामेव दिशि शमीपलाशमिश्रालाजाः पालाशपत्रद्वयं पेषणिकोपले कुमारी-भ्राता शूर्पः दृढपुरुषः दधिमाषतंडुलाः कार्प्पासवर्तिकाः दधिमो-दकाः कटुतैलं दर्प्पणः चूडिका दंतपत्रिका सिंदूरं कज्जलं बिंदिका असाधारणमपि सौभाग्यद्रव्यम् । ततः पवित्रच्छेदन-कुशैः प्रादेशमितं पवित्रद्वयं छित्त्वा सपवित्रदक्षिणकरेण प्रणीतो-दकं त्रिः प्रोक्षणीपात्रे निधाय दक्षिणानामिकाङ्गुष्ठाभ्यामुत्तराग्र-पवित्रद्वयं गृहीत्वा तेन प्रोक्षणीजलं त्रिरुत्पूय प्रणीतोदकेन प्रोक्षणं विधाय प्रोक्षणीजलेनासादिवस्तुसेचनं कृत्वाग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात्॥आज्यस्थाल्यामाज्यं निरूपप्याधिश्रित्य

ज्वलत्तृणेन प्रदक्षिणक्रमेण हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥
स्रुवमधोमुखं प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः
संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि
निदध्यात् ॥ आज्यमग्नेरवतार्य्य प्रोक्षणीवदुत्पवनं कृत्वाऽवेक्ष्य
सत्यपद्रव्ये तन्निरस्य पुनरुत्पवनं कृत्वा उपयमनकुशान् वामहस्ते
धृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्ति-
स्रो जुहुयात् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमे-
णाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रं निधाय पातितदक्षिणजानुः
कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्दद्यात् ॥
तत्राघारादारभ्य द्वादशाहुतिपर्य्यंतं स्रुवावस्थितहुतशेषघृतस्य
प्रोक्षणीपात्रे प्रक्षेपः प्रजापत्यादिचतुर्णां मंत्राणां प्रजापतिर्ऋषिस्त्रि-
ष्टुप्छन्दो मंत्रोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये
स्वाहा, इदं प्रजापतये ॥ इति मनसा ॥ इंद्राय स्वाहा; इदमिंद्राय
इत्याघारौ॥ॐ अग्नये स्वाहा, इदमग्नये। ॐसोमाय स्वाहा, इदं
सोमाय॥व्याहृतित्रयस्यप्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि
अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः॥ॐ भूः स्वाहा,
इदं भूः ॥ ॐ भुवः स्वाहा, इदं भुवः ॥ ॐ स्वः स्वाहा, इदं
स्वः ॥ पाद्यादीनि समर्पयामि ॥ योजकनामाग्नये नमः । इति
संपूज्य ॥ अग्निं प्रज्वलितं वंदे हुताशं जातवेदसम् ॥ सुवर्ण-
वर्णममलं समिद्धं सर्वतोमुखम् ॥ इति संप्रार्थ्य ॥ अथ प्रायश्चि-
त्तहोमः ॥ त्वन्नो सत्वन्नो इति मंत्रद्वयस्य वामदेवऋषिस्त्रिष्टुप्छ-
न्दोग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने
वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नि-
तमः शोशुचानोविश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नी-
वरुणाभ्याम् ॥ ॐ सत्वन्नो अग्नेवमोभवोतीनेदिष्ठोअस्याउषसो

व्युष्टौ । अवयक्ष्वनोवरुण ॅ रराणोव्वीहिमृडीक ॅ सुहवोनएधि स्वाहा । इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्नइति विराड्ऋषिर्गायत्रीछन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि । अयानोयज्ञंवहास्ययानोधेहि भेषजꣳस्वाहा ॥ इदमग्नये ॥ येतेशतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवताःप्रायश्चित्तहोमे विनियोगः॥ॐयेतेशतंवरुण येसहस्रंयज्ञियाःपाशावितता महांतस्तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुञ्चंतुमरुतःस्वर्काःस्वाहा॥इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमंविमध्यम ꣳश्रथाय। अथोवयमादित्यव्रतेतवानागसो अदितये स्यामस्वाहा ॥ इदंवरुणायादितये ॥ एताः प्रायश्चित्तसंज्ञकाः ॥ ततः प्रणीतोदकस्पर्शः ॥ ऋताषाडिति मंत्राणां प्रजापतिर्ऋषिर्यजुश्छन्दो मंत्रलिंगोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ ऋताषाड्ऋतधामाग्निर्गंधर्वःसनइदंब्रह्मक्षत्रंपातु तस्मैस्वाहा वाट् ॥ इदमृतासाहेऋतधामाग्नयेगंधर्वाय ॥ ॐ ऋताषाड्ऋतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसोमुदोनाम ताभ्यः स्वाहा ॥ इदमोषधीभ्योप्सरोभ्यो मुद्भ्यः ॥ ॐ स ꣳ हितो विश्वसामासूर्य्योगंधर्वःसनइदंब्रह्मक्षत्रंपातु तस्मै स्वाहा वाट् ॥ इदꣳसꣳहितायविश्वसाम्नेसूर्य्यायगंधर्वाय। ॐसꣳहितोविश्वसामासूर्य्योगंधर्वस्तस्यमरीचयोप्सरसआयुवोनामताभ्यःस्वाहा॥ इदंमरीचिभ्योप्सरोभ्यआयुभ्र्यः ॥ ॐ सुषुम्णः सूर्यरश्मिश्चंद्रमागंधर्वः। सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंसुषुम्णे सूर्याय रश्मये चन्द्रमसे गंधर्वाय ॥ ॐ सुषुम्णःसूर्य्यरश्मिश्चन्द्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरोनामताभ्यः स्वाहा ॥ इदं सुषुम्णे सूर्य्याय

रश्मये चंद्रमसे गन्धर्वाय नक्षत्रेभ्योऽप्सरोभ्योभेकुरेभ्यः ॥ॐ इषिरो
विश्वव्यचावातोगंधर्वः सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट् ॥ इदमि-
षिराय विश्वव्यचसेवाताय गंधर्वाय ॥ ॐ इषिरो विश्वव्यचावातोगंध-
र्वस्तस्यापोऽप्सरसऊर्ज्जोनामताभ्यः स्वाहा॥इदमप्सरोभ्यऊर्ग्भ्यः ॥
ॐ भुज्युः सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाप्सरसस्तावानामताभ्यः
स्वाहा ॥ इदं भुज्यवेसुपर्णाय यज्ञाय गंधर्वाय ॥ ॐ भुज्युः सुपर्णो
यज्ञोगंधर्वः सनइदंब्रह्मक्षत्रं पातुतस्मैस्वाहावाट् ॥ इदं गंधर्वाय ॥
प्रजापतिर्विश्वकर्मामनोगंधर्वः सनइदंब्रह्मक्षत्रंपातु तस्मै स्वाहावाट्॥
इदं प्रजापतये विश्वकर्मणे मनसे। ॐप्रजापतिर्विश्वकर्मामनोगंधर्व-
स्तस्य ऋक्सामान्यप्सरस एष्टयोनामताभ्यः स्वाहा ॥ इदमृ-
क्सामभ्योऽप्सरोभ्यः एष्टिभ्यः ॥ इति राष्ट्रभृद्धोमः ॥ आपःशिवाः
शिवतमास्तास्तेकृण्वंतुभेषजम् ॥ शांतिरस्तु शिवं चास्तूभयोः
कन्याकुमारयोः॥ इतिप्रणीतोदकेनाचार्य्यो वधूवरयोर्मूर्द्धानमभि-
षिंचेत् ॥ चित्तं चेत्यादीनां त्रयोदशमंत्राणां परमेष्ठी ऋषिर्मंत्रोक्ता
देवता आज्यहोमे विनियोगः ॥ॐ चित्तं च स्वाहा, इदं चित्ताय॥
चित्तिश्च स्वाहा, इदं चित्त्यै ॥ आकूतं च स्वाहा, इदमाकूताय॥
आकूतिश्च स्वाहा, इदमाकूत्यै ॥ शक्वरी च स्वाहा, इदं शक्वर्य्यै॥
दर्शं च स्वाहा, इदं दर्शाय ॥पौर्णमासं च स्वाहा, इदं पौर्णमासाय॥
बृहच्च स्वाहा, इदं बृहते॥रथंतरं च स्वाहा, इदं रथंतराय॥विज्ञातं
च स्वाहा, इदं विज्ञाताय॥विज्ञातिश्च स्वाहा, इदं विज्ञात्यै॥मनश्च
स्वाहा,इदंमनसे॥प्रजापतिरित्यस्यप्रजापतिर्ऋषिर्यजुश्छन्दःप्रजा-
पतिर्जयेंद्रा देवता आज्यहोमे विनियोगः॥ ॐप्रजापतिर्जयानिंद्राय
वृष्णेप्रायच्छदुग्रःपृतनाजयेषु तस्मैविशः समनमंतःसर्वाःसउग्रःस-
इहव्योबभूवस्वाहा ॥ इदं प्रजापतये जयायेंद्राय॥ इति जयाहोमः॥
आपः शिवाः शिवतमाः शांताःशांततमास्ते कृण्वंतु भेषजम् ॥

शांतिरस्तु शिवंचास्तूभयोः कन्याकुमारयोः ॥ इति प्रणीतोदक-
स्पर्शः ॥ अग्निर्भूतानामित्याद्यष्टादशमन्त्राणां प्रजापतिर्ऋषिस्त्रि-
ष्टुप्छन्दो मंत्रोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ अग्निर्भूता-
नामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरो
धायामस्मिन्कर्म्मण्यस्यांदेवहूत्याᳬस्वाहा॥इदमग्नये भूतानामधि-
पतये॥ॐइन्द्रोज्येष्ठानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रे
स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याᳬस्वाहा ।इद-
मिन्द्राय ज्येष्ठानामधिपतये ॥ॐ यमः पृथिव्याअधिपतिः समा०॥
इदं यमाय पृथिव्या अधिपतये ॥ अत्रप्रणीतोदकस्पर्शः ॥ ॐ
वायुरंतरिक्षस्याधिपतिः समा० ॥ इदं वायवेऽन्तरिक्षस्याधिप-
तये ॥ ॐ सूर्य्योदिवोधिपतिः समा०॥ इदंसूर्य्याय दिवोधिपतये॥
ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समा० ॥ इदंबृहस्पतये ब्रह्मणोधिप-
तये ॥ ॐ चन्द्रमानक्षत्राणामधिपतिः समा० ॥ इदंचन्द्रमसे
नक्षत्राणामधिपतये ॥ ॐ मित्रः सत्यानामधिपतिः समा० ॥
इदं मित्राय सत्यानामधिपतये ॥ ॐ वरुणोपामधिपतिः
समा० ॥ इदं वरुणायापामधिपतये ॥ ॐ समुद्रःस्रोत्यानाम-
धिपतिः समा० ॥ इदं समुद्रायस्रोत्यानामधिपतये ॥ ॐ अन्नᳬ
साम्राज्यानामधिपति तन्मा० ॥ इदमन्नाय साम्राज्यानामधिप-
तिने ॥ ॐ सोमओषधीनामधिपतिः समा० ॥ इदं सोमायौ-
षधीनामधिपतये ॥ ॐ सविताप्रसवानामधिपतिः समा० ॥
इदं सवित्रे प्रसवानामधिपतये ॥ ॐ रुद्र पशूनामधिपतिः
समा० ॥ इदंरुद्राय पशूनामधिपतये ॥ ॐ त्वष्टारूपाणामधि-
पतिःसमा०॥इदंत्वष्ट्रेरूपाणामधिपतये ॥ ॐ विष्णुःपर्वतानाम-
धिपतिः समा०॥ इदं विष्णवेपर्वतानामधिपतये ॥ ॐ मरुतोग-
णानामधिपतयस्तेमावंतवस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां-

रोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या॰ स्वाहा ॥ इदं मरुद्भ्यो ग-
णानामधिपतिभ्यः ॥ ॐ पितरः पितामहाः परेवरेततास्ततामहाः
समावंत्वस्मिन्० ॥ इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्तते-
भ्यस्ततामहेभ्यः ॥ अत्रप्रणीतोदकस्पर्शः ॥ अग्निरेत्वित्यादीनां
पंचानां मन्त्राणां प्रजापतिर्ऋषिर्यजुश्छंदोऽग्निर्देवताऽऽज्यहोमे
विनियोगः ॥ ॐ अग्निरेतुप्रथमोदेवताना॰ सोस्यैप्रजांमुंचतुमृत्यु-
पाशात् । तदय॰राजावरुणोनुमन्यतांयथेय॰ स्त्रीपौत्रमघंनरोदा-
त्स्वाहा ॥ इदमग्नये ॥ इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतु
दीर्घमायुः । अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिवि-
बुद्ध्यतामिय॰स्वाहा ॥ इदमग्नये ॥ ॐ स्वस्तिनो अग्नेदिवा
पृथिव्याविश्वानिधेह्ययथायजत्र । यदस्यांमहि दिविजातंप्रश-
स्तंतदस्मासुद्रविणंधेहिचित्र॰ स्वाहा ॥ इदमग्नये ॥ ॐ सुगन्नुपं-
थांप्रदिशंन एहि ज्योतिष्मध्येह्यजरन्नआयुः ॥ अपैतुमृत्युरमृतं
नआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा ॥ इदमग्नये वैवस्वताय ॥
वधूवरयोरंतरे पटं दत्त्वा ॥ ॐ परंमृत्योअनुपरेहिपंथांयस्तेअन्य
इतरोदेवयानात् ॥ चक्षुष्मते शृण्वतेते ब्रवीमि मानःप्रजा॰ रीरि-
षोमोतवीरान्त्स्वाहा ॥ इदं मृत्यवे ॥ अत्र प्रणीतोदकस्पर्शः ॥
अथ लाजाहोमः ॥ तत्र कुमारीभ्राता शमीपलाशमिश्रलाजान्
वारत्रयं कुमार्य्यञ्जलौ शूर्पे धृत्वा ततस्तान् हस्तेन वारत्रयं
वरो जुहोति ॥ अर्य्यमादीनां त्रयाणां मन्त्राणामाथर्वणऋषिरनु-
ष्टुप्छन्दो मन्त्रोक्ता देवता लाजाहोमे विनियोगः ॥ ॐ अर्य्यम्णं
देवंकन्याअग्निमयक्षत । सनो अर्य्यमादेवःप्रेतोमुञ्चतुमापतेः
स्वाहा ॥ इदमर्य्यम्णे ॥ इति तृतीयांशहोमः ॥ ॐ इयंनार्य्युप-
ब्रूतेलाजानावपंतिका । आयुष्मानस्तुमेपतिरेधंतांज्ञातयोमम
स्वाहा ॥ इदमग्नये ॥ इत्यर्धांशहोमः ॥ ॐ इमाँल्लाजानावपा-

म्यग्नौसमृद्धिकरणं तव । ममतुभ्यंचसंवननंतदग्निरनुमन्यतामियᳬ स्वाहा ॥ इदमग्नये ॥ इति सर्वांशहोमः ॥ अथास्या दक्षिणहस्तं सांगुष्ठं वरो गृह्णाति । गृभ्णामीति चतुर्णां मन्त्राणां याज्ञवल्क्य-भरद्वाजाथर्वणप्रजापतयो ऋषयस्त्रिष्टुबुष्णिगनुष्टुप्छन्दांसिभगा-र्य्यमसवितृपुरंध्र्यो देवता अंगुष्ठग्रहणे विनियोगः॥ॐ गृभ्णामिते सौभगत्वायहस्तं मयापत्याजरदष्टिर्यथासः। भगोअर्य्यमासविता-पुरंध्रिर्मह्यंत्वादुर्गार्हपत्यायदेवाः ॥ १ ॥ अमोहमस्मिसात्वᳬ सात्वमस्यमो अहम् । सामाहमस्मि ऋक्त्वंद्यौरहं पृथिवीत्वं तावेहि विवहावहै सहरेतो दधावहै ॥ २ ॥ प्रजांप्रजनयावहै पुत्रान् विंद्यावहै बहून् । तेसंतुजरदष्टयः संप्रियौरोचिष्णूसु-मनस्यमानौ ॥ ३ ॥ पश्येमशरदः शतंजीवेमशरदःशतᳬ शृणुयाम शरदःशतम् ॥ ४ ॥ अथैनामश्मानमारोहतीति सूत्रम् ॥ तद्यथा,अग्नेरुत्तरतः स्थापितेऽश्मनि वरो वध्वा दक्षिणपदं स्वदक्षिणहस्तेन स्पृशन् वामहस्तेन तस्या वामस्कंधं च स्पृशन् पठति ॥ आरोहेति प्रजापतिर्ऋषिरनुष्टुप्छन्दः सरस्वती देवता अश्मारोहणे विनियोगः ॥ ॐ आरोहेममश्मानमश्मेवत्वᳬ स्थिरा भव । अभितिष्ठप्रतन्यतोवबाधस्वपृतनायकाः ॥ इत्यश्मारोहणम् ॥ ततोस्याः शिरसि वरो हस्तं धृत्वाश्मन्येवगा-थांगायति ॥ सरस्वतीति विश्वावसुर्ऋषिरनुष्टुप्छंदः सरस्वती देवता गाथागाने विनियोगः ॥ ॐ सरस्वतिप्रेद ममसुभगेवाजिनी-वती।यां त्वा विश्वस्यभूतस्यप्रजायामस्याग्रतःयस्यांभूतᳬ समभव-द्यस्यांविश्वमिदंजगत्। तामद्यगाथांगास्यामियास्त्रीणामुत्तमंयशः॥ इति गाथागानम् ॥ ततोग्रे वधूः पश्चाद्वरः परिक्रामति ॥ तुभ्य-मिति अथर्वणऋषिरनुष्टुप्छंदोग्निर्देवतापरिक्रमणे विनियोगः ॥ ॐ तुभ्यमग्रे पर्य्यवहन्सूर्य्यांवहतुना सह । पुनः पतिभ्यो जायांदाग्ने

प्रजया सह ॥ इति परिक्रमणम् ॥ ततोर्य्यम्णमिति मंत्रादारभ्य तुभ्यमग्रेति मंत्रांत पठन् पूर्ववत् द्वितीयं तृतीयं परिक्रमणं कुर्य्यात् पुनः कुमारीभ्राता शमीपलाशमिश्रलाजान् शूर्प्पस्थान् कन्याञ्जलौ ददाति । सा च स्वांजलिस्थेन शूर्प्पकोणेन । भगायेति प्रजापतिर्ऋषिर्यजुश्छदो भगो देवता लाजहोमे विनियोगः ॥ ॐ भगाय स्वाहा इदंभगाय॥ सर्वान् लाजान् जुहोति ततस्तूष्णीं चतुर्थपरिक्रमणंकृत्वा वधूर्वरश्चोपविश्य॥प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छंदः प्रजापतिर्देवतोत्तराज्यहोमे विनियोगः ॥ॐप्रजापतये स्वाहा इदं प्रजापतये॥इति मनसा॥ततस्तूष्णीं पंचमं षष्ठ च परिक्रमणं कृत्वा उत्तरतः स्थापिते दृषदि दध्याक्ततंडुलमाषनिर्मितसप्तपुंजेषु सप्त ज्वलद्वार्त्तिकाः संस्थाप्य प्रत्येकपुञ्जेसिलं विस्तारयन् तदुपरि वधूदक्षिणपदं निधाय तत्र स्वदक्षिणहस्तं वरो निधाय वामहस्तेन तस्या वामस्कन्धं स्पृशन् प्रत्येकं पुञ्जं पेषयन् प्रत्येकान् मंत्रान् पठेत् । इयमेव सप्तपदी । तत्र प्रथमपदे मंत्रः।एकमिषे विष्णुस्त्वा नयतु ॥ मिष्टान्नं व्यञ्जनाद्यं च धनं धान्यं च यद्गृहे । मदधीन प्रकर्त्तव्यं प्रथमे कन्यका वदेत् । द्वितीये द्वे ऊर्जे विष्णुस्त्वानयतु ॥ कुटुम्बोत्पत्तिमिच्छामि त्वयाहं मंजुभाषिणि । सुखे दुःखे च संतुष्टा द्वे ऊर्ज्जेतां वदेद्वरः ॥ तृतीये त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु ॥ ऋतुकाले शुचिः स्नाता क्रीडयामि त्वया सह । नाहं परं गमिष्यामि तृतीये कन्यका वदेत्॥चतुर्थे चत्वारि मायोभवाय विष्णुस्त्वा नयतु॥ लालयामि सखे शांते गंधमाल्यानुलेपनैः । कांचनैर्भूषणैर्देवि चतुर्थेतांवदेद्वरः ॥ पंचमे पंच पशुभ्यो विष्णुस्त्वानयतु ॥ सखे पतिव्रता नित्यं गौर्य्याराधनतत्परा । त्वयि भक्ता भविष्यामि पंचमे कन्यका वदेत् ॥ षष्ठे षड्ऋतुभ्यो विष्णुस्त्वा नयतु ॥ होमयज्ञादिदानेषु वामांगे भव

भामिनि ॥ यत्राहं तत्र तिष्ठ त्वं पदे षष्ठे वदेद्वरः ॥ सप्तमे सखे सप्तपदा भव सामामनुव्रता भव विष्णुस्त्वा नयतु ॥ इह वह्निश्च नो साक्षी मम त्वं भर्तृतां व्रज। ब्रह्मणा कृतपूर्वेण विधानेन कुलोत्तम ॥ उद्याने मदपाने च नित्यहासं पिशाचताम् । आज्ञाभंगं परगृहे गमनं परिवर्जयेत् ॥ ततःसप्तमं पुञ्जं घृतपूरितदीपे निधाय परिक्रमणं कृत्वाग्नेः पश्चादुपविश्य पुरुषस्कंधस्थितकुंभाद्राम्रपल्लवमादाय वरो वधूमूर्ध्नि कुंभस्थजलेनाभिषिञ्चति ॥ आपः शिवाः शिवतमाःशान्ताः शान्ततमास्तास्ते कृण्वंतु भेषजम् । आपोहिष्ठा इत्यादित्रयाणां मंत्राणां सिंधुद्वीपऋषिर्गायत्रीछंद आपो देवता अभिषेचने विनियोगः ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणायचक्षसे ॥१॥ योवः शिवतमोरसस्तस्यभाजयतेहनः।उश तीरिवमातरः ॥२॥ तस्माअरंगमामवो, इति शिरसि। यस्यक्षयाय जिन्वथ, इति भूमौ। आपोजनयथा चनः इति पुनः शिरसि ॥ ततो यज्ञांतदक्षिणादानम्॥पाद्यादीनि समर्पयामि दक्षिणाद्रव्याय नमः॥ ब्राह्मणाय नमः॥ संपूज्य अद्येत्यादि० अमुकोहम् अस्या वध्वा ब्राह्मविधिना विवाहाख्यसंस्कारकर्म्मणि कृतस्य द्व्यधिकसप्ततितमसंख्यकघृताहुतिकर्मणः सांगतासिद्ध्यर्थं गार्हस्थ्यसौख्यावाप्तये योजकाग्निप्रीतये दक्षिणार्थमिदं द्रव्यमग्न्यादिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥ ततो वरो वधूं सूर्य्यमुदीक्षस्वेति वदेत् ॥ तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिरुष्णिक्छन्दः सूर्य्यो देवता सूर्य्यदर्शने विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्पश्येमशरदःशतं जीवेम शरदः शत ँ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति वरो वधूं वदेत् ॥ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्यो मयि मह्यं

त्वादात् । बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतम्॥ ततो दक्षिणां दद्यात् ॥ अथ वरो वध्वा हृदयमालभते ॥ ममेति प्रजापतिर्ऋषिरनुष्टुप्छन्दः कुमारी देवता हृदयालंभने विनियोगः॥ ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व प्रजापतिष्ट्वानियुनक्तु मह्यम् ॥ ततो वधू-शिरसि हस्तं धृत्वा वरोऽभिमंत्रयते ॥ सुमंगलीरिति प्रजापतिर्ऋ-षिरनुष्टुप्छन्दो मन्त्रोक्ता देवताभिमंत्रणे विनियोगः॥ ॐ सुमंगली-रियं वधूरिमाᳬ समेत पश्यत । सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतनः ॥ इति वधूवरौ परस्परं तैलाभ्यंगकेशसंमार्जनसिंदूर-तिलकचूडिकादर्शकज्जलधारणदधिप्राशनांतकर्म्माणि कुरुतः ॥ ततोवरोवधूं स्ववामभागेसमुपवेशयति॥इहेति प्रजापतिर्ऋषिरनुष्टु-प्छन्दो लिंगोक्ता देवताऽभिनिवेशने विनियोगः ॥ ॐ इह गावो निषीदंत्विहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणे यज्ञ इह पूषा निषीदतु ॥ परिकरमाकृष्योपविश्य ॥ प्रजापत्यादिमंत्रद्वयस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापत्यग्नीदेवते स्विष्टकृद्धोमे विनि-योगः ॥ ॐ प्रजापतये स्वाहा; इदं प्रजापतये ॥ ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते ॥ संश्रवं प्राश्य पूर्णपात्रं ब्रह्मणे दद्यात ॥ पाद्यादीनि समर्प्पयामि । सदक्षिणतंडुलपूर्णपा-त्राय नमः सम्पूज्य॥ अद्येत्यादि० अमुकोहं कृतैतद्विवाहांगभूत-हवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः सांगतासिद्धये इदं सदक्षिणं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ स्वस्तीति ब्रह्मा वदेत् ॥ ततः पूर्णाहुतिः ॥ वध्वा सह वर उत्थाय स्रुवस्थघृताक्तफलं दक्षिणहस्ते निधाय । मूर्धानमिति भरद्वाजऋषिस्त्रिष्टुप्छन्दो यज्ञपुरुषोग्निर्देवता पूर्णाहु-तिहोमे विनियोगः॥ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत

आजातमाग्निंकवि॑ᳬसम्राजमतिथिं जनानामासन्नापात्रंजनयंत देवाः स्वाहा॥इति स्रुवस्थफलं जुहुयात्॥ततः उपविश्य सुमित्रियान इति दध्यङ्ङाथर्वणऋषिरापोदेवताः शिरःप्रोक्षणमार्जने विनियोगः॥ ॐ सुमित्रियान आप ओषधयः संत्विति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य। दुर्मित्रियास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्य्यात्॥ ततः परिस्तरक्रमेणाज्याभिघारितं बर्हिर्गृहीत्वा देवा गात्विति अत्रिर्ऋषिरुष्णिकूछन्दो मनसस्पतिर्देवता शेषबार्हिर्होमे विनियोगः॥ ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पत इमंदेवयज्ञ॑ᳬ स्वाह वातेधाः॥ इति बार्हिर्होमः॥ ततस्त्र्यायुषकरणम्॥ त्र्यायुषमिति नारायणऋषिरुष्णिक्छंदःशिवो देवता त्र्यायुषकरणेविनियोगः॥ॐ त्र्यायुषंजमदग्नेरिति ललाटे कश्यपस्यत्र्यायुषमिति ग्रीवायाम्॥यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले॥तन्नो अस्तुत्र्यायुषमिति हृदि॥ ततोभूयसीदानम्॥ स्कंधकलशाय दक्षिणादानमञ्चलमोक्षणम्। चतुर्थ्यन्तेतु॥ कङ्कणं मोचयाम्यद्य रक्षांसि न कदाचन। मयि रक्षां स्थिरां दत्त्वा स्वस्थानं गच्छ कङ्कण॥ इति गोदानं विधाय गणपत्यादिदेवताविसृज्य ब्राह्मणद्वाराऽभिषेकमंत्रपाठतिलकादीनि वधूवरौ गृह्णीतः मण्डपोद्वासनं कृत्वा आचारात् श्वश्र्वादिवन्दनम्॥

चतुर्थीकर्म्म।

विवाहदिनाच्चतुर्थदिने रात्रौ मंडपस्थदेवतापूजनपूर्वकं चतुर्थीकर्म्म कुर्य्यात्॥ अरुणोदयात्प्राक् युगकीलके उद्वर्त्तनपूर्वकं वधूवरौ स्नात्वा महार्हवस्त्राणि वसित्वा उभौ गणेशवरुणौ सम्पूज्य॥ अमुकोहं ममास्या वध्वाः सोमाद्युपभुक्तिपरिहारार्थं विवाहव्रतसमाप्तिविहितं चतुर्थीकर्म्म करिष्ये॥ कुशैर्हस्तमात्रमितां भूमिं परिसमुह्यतान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्यस्रुवम्-

लेन यथोत्तरं तिस्रो रेखा विलिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रोपनीतमग्निं तत्र तूष्णींस्वाभिमुखं स्थापयेत् ॥ ततो ब्रह्मवरणम् ॥ अद्येत्यादि० अमुकोहं कर्त्तव्यचतुर्थीकर्माङ्गहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्त्तुमेतैर्वासोंगुलीयासनफलैर्बृहस्पतिदैवतैरमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे । वृतोस्मीतिप्रतिवचनम् ॥ यथाविहितं कर्म कुरु । करवाणि इति प्रतिवचनम् ॥ अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणं कारयित्वा उपकल्पितासने ब्रह्माणमुदङ्मुखमुपवेशयेत् अस्मिन्कर्मणि त्वं मे ब्रह्मा भव । भवानीति प्रतिवचनम् ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ॥ बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्मणोग्निपर्य्यंतं नैर्ऋत्याद्वायव्यान्तम्॥अग्नितः प्रणीतापर्य्यंतं परिस्तीर्य्य अग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशपत्रत्रय पवित्रकरणार्थं साग्रमनंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रम् ॥ आज्यस्थाली चरुस्थाली सम्मार्जनकुशाः पंच वर्णीरूपकुशाः सप्त पलाशसमिधस्तिस्रः स्रुवः आज्यं तण्डुलपूर्णपात्रम् । एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ॥ अमीषामुत्तरतो साधारणान्युपकल्पनीयानि॥पवित्रच्छेदनकुशैः पवित्रे छित्त्वा प्रोक्षणीपात्रे त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीप्रोक्षणं विधाय प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ॥ आज्यस्थाल्यामाज्यं निरूप्य ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ स्रुवमधोमुखं प्रतप्य सम्मार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि

निदध्यात् ॥ तत आज्यमग्नेरवतार्य्यावेक्ष्य सत्यपद्रव्ये तन्निरस्य प्रोक्षणीवत् त्रिरुत्पूय उपयमनकुशान् वामहस्ते कृत्वा उत्तिष्ठन्प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रो जुहुयात् ॥ अग्निं पर्य्युक्ष्योपविश्य । प्रजापत्यादिचतुर्णां मंत्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मन्त्रोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा, इदं प्रजापतये ॥ इति मनसा॥ ॐ इंद्राय स्वाहा, इदमिंद्राय ॥ इत्याघारौ ॥ सोमाय स्वाहा, इदं सोमाय॥ इत्याज्यभागौ ॥ ॐ अग्नये स्वाहा, इदमग्नये ॥ व्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्या देवता व्याहृतिहोमे विनियोगः॥ॐ भूः स्वाहा, इदं भूः ॥ॐ भुवः स्वाहा, इदं भुवः ॥ ॐस्वः स्वाहा इदं स्वः ॥ पाद्यादीनि समर्प्पयामि । शिखिनामाग्नये नमः ॥ सम्पूज्य प्रार्थयेत् ॥ अग्निं प्रज्वलितं वन्दे हुताशंजातवेदसम् ॥ सुवर्णवर्णमनलं समिद्धं सर्वतोमुखम् ॥ इतिसम्प्रार्थ्य ॥ त्वन्नो सत्वन्नो इति वामदेव ऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ँ सिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ । अवयक्ष्वनो वरुण ँ रराणो व्वीहिमृडीक ँ सुहवोनएधि स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ अयाश्चाग्न इति विराड्ऋषिर्गायत्रीछन्दोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्त्वमया असि । अयानोयज्ञंवहास्ययानोधेहिभेषज ँ स्वाहा ॥ इदमग्नये ॥ येतेशतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दोवरुणो देवता प्रायश्चित्तहोमे विनियोगः। ॐ येतेशतंवरुणये सहस्रंयज्ञियाःपाशावितत्तामहान्तस्तेभिर्नोअ-

द्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा ॥ इदंवरुणाय सवित्रे विष्णवेविश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ उदुत्तम-मिति शुनःशेपऋषिस्त्रिष्टुप्छन्दोग्निर्देवता प्रायश्चित्तहोमे विनि-योगः ॥ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमᳪश्रथाय ।अथा-व्वयमादित्यव्रतेतवानागसो अदितयेस्यामस्वाहा ॥ इदं वरुणा-यादितये । ततः स्थालीपाकहोमः । अग्ने प्रायश्चित्त इति पंचानां मन्त्राणां प्रजापतिर्ऋषिर्गायत्रीछन्दो ।लिंगोक्ता देवताः स्थालीपाक-होमे विनियोगः ॥ॐअग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि-ब्राह्मणस्त्वानाथकामउपधावामियास्यैपतिघ्नीतनूस्तामस्यै नाशय स्वाहा ॥ इदमग्नये ॥ ॐवायो प्रायश्चित्तेत्वंदेवानां प्रायश्चित्तिर-सिब्राह्मणस्त्वानाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाश यस्वा० ॥इदंवायवे॥ॐसूर्य्यप्रायश्चित्तेत्वं देवानांप्रायश्चित्तिरसिब्रा-ह्मणस्त्वानाथकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वा-हा ॥ इदं सूर्य्याय ॥ ॐचन्द्रप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्रा-ह्मणस्त्वा नाथकामउपधावामियास्यैगृहघ्नीतनूस्तामस्यैनाशयस्वा-हा ॥ इदं चन्द्राय ॥ ॐगन्धर्वप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिर सिब्राह्मणस्त्वानाथकामउपधावामियास्यैयशोघ्नीतनूस्तामस्यैनाश यस्वाहा ॥ इदं गन्धर्वाय॥ ततोग्रे वधूः पश्चाद्वरस्तूष्णीं प्रदक्षिणा-चतुष्टयं होमवेद्याः परितः कुर्य्यात् ॥ प्रजापतय अग्नय इति मन्त्रयोःप्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापत्यग्नी दैवते उत्तरांगहोमे विनियोगः ॥ ॐप्रजापतये स्वाहा, इदं प्रजापतये ॥ ॐ अग्नये स्वाहा इदमग्नये अयमेव स्विष्टकृद्धोमः। संश्रवं प्राश्य पाद्यादीनि समर्प्पयामि सदक्षिणतण्डुलपूर्णपात्राय नमः ॥ सम्पूज्य ब्राह्म-णाय नमः सम्पूज्य ॥ अद्येत्यादि० अमुकोहं ममास्या वध्वाः सहचारसोमाद्युपभुक्तिपरिहारार्थं चतुर्थीकर्मांगहोमकर्म्मणि कृता-

कृतावेक्षणरूपब्रह्मकर्म्मणः सांगतासिद्धये इदं सदक्षिणं तण्डुलपूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ स्वस्तीति ब्रह्मा वदेत् ॥ वध्वा सह वर उत्थाय स्रुवस्थघृताक्तफलं दक्षिणहस्ते निधाय पूर्णा दर्वीति पूर्णनाभ ऋषिरनुष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐपूर्णादर्विपरापतसुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूज ँ शतक्रतो स्वाहा॥ इति स्रुवस्थं पूगफलं जुहुयात् ॥ इति पूर्णाहुतिः ॥ ततः उपविश्य॥ सुमित्रियान इति दध्यङ्ङाथर्वणऋषिरापो देवताः शिरःप्रोक्षणमार्जने विनियोगः ॥ ॐसुमित्रियानआपओषधयः सन्त्विति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टियं च वयं द्विष्मः ॥ इत्यैशान्यां प्रणीताविमोकः कार्य्यः ततःपरिस्तरणक्रमेणाज्याभिघारितं बर्हिर्गृहीत्वा देवागात्विति अत्रिर्ऋषिरुष्णिक्छन्दो मनसस्पतिर्देवता बर्हिर्होमे विनियोगः ॥ ॐ देवागातुविदोगातुं वित्वागातुमितमनसस्पत इमंदेवयज्ञ ँ स्वाहा वातेधाः ॥ ततस्त्र्यायुषकरणम् ॥ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्दः शिवो देवता त्र्यायुषकरणे विनियोगः ॥ॐ त्र्यायुषं जमदग्नेरिति ललाटे। कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले। तत्ते अस्तु त्र्यायुषमिति हृदि। कलशोदकेन वधूमभिषिञ्चति वरः। यातेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः शिवो देवताभिषेके विनियोगः ॥ ॐ याते पतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीतनूर्जारघ्नीततएनांकरोमिसाजीर्य्यत्वंमयासहश्रीमत्यमुकीदेवि ॥ ततो वरः स्थालीपाकं वधूं प्राशयति ॥ प्राणैरित्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिर्यजुश्छन्दो वधूर्देवता स्थालीपाकप्राशने विनियोगः ॥ ॐप्राणैस्तेप्राणान्सन्दधामि अस्थिभिस्ते अस्थीनि

संदधामि मांसैस्ते मांसानि सन्दधामि त्वचा ते त्वचं सन्द-धामि ॥ आचारात् ग्रासपंचकं तूष्णीमपि हृदयालम्भः । यत्त इति प्रजातिर्ऋषिर्यजुश्छन्दो हृदयं देवता दयालम्भने विनि-योगः ॥ ॐ यत्ते सुशीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येमशरदः शत ँ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ दक्षिणाभूयसीतिलकमन्त्रपाठाः ॥

गोदानविधिः ।

सामग्रीं सम्पाद्य दीपगणेशौ पूजयित्वा संकल्पं कुर्यात् ॥ अद्येत्यादि० अमुकगोत्रोऽमुकशर्म्माहं ममास्याः कन्यायाः पाणिग्रहणकर्मणःस्वीकृतदम्पतिकपरस्परनिस्सीमप्रीतिद्वारा सन्तत्यादियथाभिलषितसिद्धिप्रादुर्भूतये पित्रक्षय्यतृप्तिप्राप्तये तत्सांगत्वसिद्धये सवत्सगोदानं करिष्य ॥ ततो गोपूजनं यथा—ॐ आगावो अममन्नुतसीदन्तुगोष्ठेरणयत्वस्मैप्रजावतीःपुरुत्राइह-स्युरिन्द्रायपूर्वीरुषसोदुधानः ॥ ॐ आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः पितरंचप्रयन्त्स्वः ॥ ॐ इरावतीधेनुमतीहिभूत ँ सूयवासिनीमनवेदशस्या ॥ व्यस्कम्नारोदसीविष्णवेतेदाधर्थ पृथिवीमभितोमयूखैः ॥ आवाहयाम्यहं देवीं गां त्वां त्रैलोक्यमातरम् ॥ यस्याः स्मरणमात्रेण सर्वपापप्रणाशनम् ॥ सर्वदेवमये मातः सर्वदेवनमस्कृते । पाद्यमेतत्सुखस्पर्शं गौस्त्वं गृह्ण नमोस्तु ते ॥ कर्पूरवासितं वारि ताम्रपात्रस्थमुत्तमम् ॥ अर्घ्यबुद्ध्या गृहाण त्वं धेनो तुभ्यं नमोनमः ॥ मंदाकिनीपयोष्णीभ्यां समानीतं शुभं जलम् । आचम्यतां जगन्मातर्गौस्त्वं सर्वाघहारिणि ॥ तोयमेतत्सुखस्पर्शं स्नानाथ गृह्ण धेनुके ॥ आच्छादनं सदा शुद्धं सम्यक् शुभ्रांशुनिर्मलम् । सुरभे वस्त्रदानेन प्रीता

भव सदा मम ॥ स्वर्णशृंगद्वयं रौप्यखुराणां च चतुष्टयम् । ताम्रपृष्ठं सुक्तपुच्छं कांस्यपात्रं गृहाण मे ॥ यत्ते मयार्पितं शुद्धं घण्टाचामरमंडितम् । ग्रैवेयकं गृहाण त्वं धेनो तुभ्यं नमोनमः ॥ सर्वदेवप्रियं देवि चन्दनं चन्द्रसन्निभम् । कस्तूरीकुंकुमाक्तं च धेनो गृह्ण नमोस्तु ते ॥ अक्षतान् तिलजान् देवि शुभ्रचन्दन-मिश्रितान् ॥ गृहाण परमप्रीत्या गौस्त्वं त्रिदिवपूजिते ॥ पुष्पमालां तथा जातिपाटलाचंपकानि च । पुष्पाणि गृह्ण धेनो त्वं सर्वविघ्नप्रणाशिनि ॥ तिलैर्गोरङ्गानि पूजयेत् ॥ यस्याः शृंगाग्रयोरिन्द्र उरसि स्कन्ध एव च । तत्रास्ते शिरसि ब्रह्मा ललाटे वृषभध्वजः ॥ कर्णयोरश्विनौ देवौ चक्षुषोः शशि-भास्करौ । दंतेषु मरुतो देवा जिह्वायां च सरस्वती ॥ अपाने सर्वतीर्थानि लांगूले सर्वमङ्गला । ऋषयो रोमकू-पेषु पृष्ठे वैवस्वतो यमः ॥ वरुणो धनदश्चैव दक्षिणां कुक्षिमा-श्रितः । वामपार्श्वे महायज्ञो महौजास्तु महाबलः ॥ खुरमध्ये तु गन्धर्वाः खुराग्रे पन्नगास्तथा। खुराणां पश्चिमे पार्श्वे गणा अप्सर-सामपि ॥ गोमये वसते लक्ष्मीर्गोमूत्रे जाह्नवीजलम् । हुंकारे निखिला वेदा रम्भाशब्दे प्रजापतिः ॥ चत्वारः सागराः पूर्णा धेनूनां स्तनमंडले ॥ अमृतं स्रवते नित्यं पिबंति सुरमानवाः ॥ न धेनुतुल्यं धनमस्ति किंचिद्धरत्यघं गुह्यबहिर्भवं च । तृणानि भुक्त्वाप्यमृतं स्रवंती विप्राय दत्ता पितृमोक्षदा सा ॥ एककालं द्विकालं वा यो ददाति गवाह्निकम् ॥ पंचचामरपूर्णांगविमानमधि-रोहति ॥ उभे संध्ये च यो नित्यं गोसावित्रीं सदा पठेत् । गोसह-स्रफलं सोऽपि लभते वांछितं फलम् ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ वन-स्पतिरसोत्पन्नो गंधाढयः सुमनोहरः । आघ्रेयः सर्वतो धेनो धूपोयं

प्रतिगृह्यताम् ॥ आनंददः सुराणां च लोकानां सर्वदा प्रियः । गौस्त्वं पाहि जगन्नाथे दीपोयं प्रतिगृह्यताम्॥ सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता। ग्रासं गृह्णातु सा धेनुर्यास्ति त्रैलोक्यवासिनी ॥ त्वं देवो त्वं जगन्माता त्वमेवासि वसुंधरा। गायत्री त्वं च सावित्री तुभ्यमस्तु नमोनमः॥ गोपुच्छतर्प्पणविधिः। यवदर्भजलैः पूर्वमुखः करगपुच्छतः। देवतीर्थेन देवांश्च प्राजापत्येन मानुषान्। पितॄन्पैत्र्येण च तिलैः सांबुभिस्तर्प्पयेत्सुधीः ॥ पुच्छस्याधः प्रवेशे तु स्थापयेज्जलभाजनम् ॥ सव्यं भूत्वा पूर्वमुखो यवांबुकुशान्वितं गोपुच्छं दक्षकरे निधाय दाता। या नंदिन्यः सुशीलाद्याः कामदा याश्च धेनवः। ताः सर्वाः पुच्छतोयेन तर्प्पितास्तर्प्पयंतु माम्॥ गणेशः कार्तिको ब्रह्मा केशवश्च महेश्वरः। देवाः समस्ताः सगणाः सवाहनपरिच्छदाः॥ वसवोष्टौ द्वादशार्का रुद्रा एकादशैव तु। विश्वेदेवाः ससाध्याश्च मरुतो मातरस्तथा ॥ ऋषयश्च सपत्नीकाः सिद्धाश्च सगणास्तथा । ऋक्षाणि राशयो योगा वर्षमासर्त्तुवासराः ॥ अयने च युगाः कल्पास्तथा मन्वंतराणि च। भुवनानि दिशश्चैव तथा सर्वेन्द्रियाणि च ॥ नवग्रहा मानवाश्च सानुगा यमदेवताः। विद्याधरा जलधरा आचार्य्या गुरवस्तथा ॥ वैश्वानरो जलं वायुरंतरिक्षं दिवौकसः। ॐकारश्चैव गायत्री सावित्री च सरस्वती ॥ श्रीर्लक्ष्मीः पार्वती दुर्गा पूतना ललिता द्रुमा। स्वधा स्वाहा महाविद्या पुष्टिः श्रद्धा च कालिका॥ मेधा कीर्त्तिस्तथा तुष्टिर्माया चैव सुरूपिणी। सरितः सागरा नद्यो वनपर्वतभूरुहाः॥ दिव्या ओषधयो ग्राम्यास्तथा सर्वे सुरद्रुमाः। गंधर्वाः किन्नरा गुह्याः पिशाचा यक्षराक्षसाः ॥ दैत्यपन्नगवेतालाप्सरःपक्षिगणास्तथा। छन्दांसि वेदाश्चत्वारो मन्त्रगह्वरसाध्यकाः॥ पुराणानि सुराचार्य्या ऋषयो नारदादयः। दिक्पाला लोकपालाश्च तारकास्त्रिदिवांगनाः॥ डाकिन्यः क्षेत्रपालाश्च भैरवा अष्टसंख्यकाः।

स्थावरा जंगमाश्चैव भूतग्रामाश्चतुर्विधाः ॥ इंद्रो वह्निर्यमश्चैव निर्ऋतिः पाशभृत्तथा । वायुर्धनाधिपश्चंद्रशेखरश्चतुराननः॥ कश्यपोत्रिर्वसिष्ठश्च भरद्वाजश्च गौतमः । विश्वामित्रो भृगुश्चैव जमदग्निः पुलस्त्यकः । अन्ये भवंतुमुनयस्तृप्ता गोपुच्छतर्पणैः ॥ मालाकारयज्ञोपवीत्युत्तरमुखस्तंडुलजलैः । सनकश्च सनंदनस्तृतीयश्च सनातनः ॥ कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। ते सर्वेतृप्तिमायांतु गोपुच्छोदकतर्पणैः॥ ततो दक्षिणमुखोपसव्यस्तिलजलैः । ॐकव्यवाडनलः सोमो यमश्चैवार्यमा तथा । अग्निष्वात्तास्तथा सौम्या हविष्मन्तस्तथोष्मपाः ॥ सोकालिनो बर्हिषद आज्यपाः पितरस्तथा । यमश्च धर्मराजश्च मृत्युश्चैवांतकस्तथा ॥ वैवस्वतोथ कालश्च सर्वभूतक्षयस्तथा । औदुंबरश्च दध्नश्च नीलश्च परमेष्ठिकः ॥ वृकोदरश्च चित्रश्च चित्रगुप्तस्तथैव च । ते सर्वे तृप्तिमायांतु गोपुच्छोदकतर्पणैः ॥ पिता पितामहश्चैव तथैव प्रपितामहः । माता पितामही चैव तथैव प्रपितामही । मातामहः प्रमातामहः प्रमातामहोपरः । मातामही प्रमातामही प्रमातामही परा ॥ तृप्तिमायांतु सकला गोपुच्छोदकतर्पणैः । पितृवंशे मृता ये च मातृवंशेऽपि ये मृताः ॥ ये मे कुले लुप्तपिण्डाः क्रियालोपगतास्तथा । आब्रह्मस्तंबपर्य्यंतं देवर्षिपितृमानवाः॥ तृप्यंतु सर्वदा सर्वे गोपुच्छोदकतर्पणैः ॥उदङ्मुखस्तु विप्रः स्यात्पात्रलक्षणलक्षितः । आज्यपात्रं करे कृत्वा सुवर्णेन समन्वितम् ॥ निक्षिप्य पुच्छं तस्मिंस्तु घृतदिग्धं प्रगृह्य च । सतिलं विप्रवर्य्याय धेनुं दद्यात्पयस्विनीम् ॥ ब्राह्मणं पूजयेत् ॥ ॐ नमोस्त्वनंताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥ आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः ॥ अपारसंसारसमुद्रसेतवःपुनंतु मां ब्राह्मणपादपांसवः ॥ ॐ अ ँ शुनाते अ ँ शुः पृच्यतां परुषापरुः । गंधस्ते

सोममवतुमदायरसोच्युतः ॥ ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मइषाण सर्वलोकं मइषाण ॥ ॐभूमिदेवाग्रजन्मासि विप्र त्वं पुरुषोत्तमः॥ प्रत्यक्षो यज्ञपुरुषः पूजा मे प्रतिगृह्यताम् ॥ अद्येत्यादि० अमुकोहं ममामुष्मिन्कर्मणि श्रुतिस्मृतिपुराणेतिहासोक्तफलावाप्तये ज्ञाताऽज्ञातानेकजन्मार्जितमनोवाक्कायकर्मजन्यपापापनुत्तये निखिलदुःखदौर्भाग्यदुःस्वप्नदुर्निमित्तदुष्टग्रहबाधाशांतिपूर्वकं धनधान्यायुरारोग्यद्विपदचतुष्पदसंततिचतुर्वर्गादिनिखिलवांछितसिद्धये गोरोमसंख्यकदिव्यवत्सरावच्छिन्नस्वर्गलोकस्थितिकामश्च पितॄणां निरतिशयसानंदब्रह्मलोकावाप्तये च श्रीपरमेश्वरप्रीतये इमां सुपूजितां सालंकारां सवत्सां गां रुद्रदैवतामसुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दत्त्वा प्रार्थयेत् ॥ यज्ञसाधनभूता या विश्वपापौघनाशिनी ॥ विश्वरूपधरो देव प्रीयतामनया गवा ॥ ततो ब्राह्मणः स्वस्तीति देवस्यत्वेति वा वदेत् ॥ अद्यकृतैतद्गोदानकर्म्मणः सांगतासिद्धये इदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ कोदादिति ब्राह्मणप्रतिवचनम् ॥ ततो ब्राह्मणगवोः प्रदक्षिणाचतुष्टयं कुर्य्यात् ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ यानि कानि च पापानि जन्मांतरकृतानि च । तानि नाशय धेनो त्वं प्रदक्षिणपदे पदे ॥ मया जन्मसहस्रेषु ह्यर्जितं पापसंचयम् । तत्सर्वं नाशय क्षिप्रं प्रदक्षिणपदे पदे ॥ पापानि सर्वाणि पदे पदे या हरत्यहो तत्क्षणमेव नॄणाम् । प्रदक्षिणांतां परभक्तिभावात्समाचरे धेनुवरे प्रसीद॥ इति चतुःसंख्यकपरिक्रमणं विधाय ॥ ॐ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ या लक्ष्मीर्लोकपालानां या च धेनुः सरस्वती ।

धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।चन्द्रार्कशक्रशक्तिर्या सास्तु मे वरदा सदा॥चतुर्मुखस्य या लक्ष्मीर्यालक्ष्मीर्धनदस्य च। शेषस्यैव च या लक्ष्मीः सा धेनुर्वरदास्तु मे ॥गावः सुरभयो नित्यं गावो गुग्गुलुगंधिकाः ॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्। अन्नमेव परं गावो देवानां हविरुत्तमम् ॥ पावनं सर्वभूतानां स्रवंति च वहंति च ॥ हविषा मंत्रपूतेन तर्प्पयंत्यमरानपि। ऋषीणामपि होतॄणां गावो होमे प्रतिष्ठिताः। सर्वेषामेव भूतानां गावः शरणमुत्तमम् ॥ गावः पवित्रं परमं गावो मंगलमुत्तमम् गावः स्वर्गस्य सोपानं गावो धन्याः सवाहनाः। सर्वे देवास्तनौ यस्याः सा धेनुर्वरदास्तु मे ॥ ब्राह्मणो गोपुच्छान्वितजलेन यजमानशिरसि निषिच्य तिलकमंत्रपाठादीनि दद्यात् ॥ व्यतीपाते च संक्रांतौ ग्रहणे ग्रहदोषचके ॥ असूत्क्रमे विवाहे च रात्रौ गोदानमिष्यते ॥ च्यवनः ॥

धटपद्धतिः।

युधिष्ठिर उवाच॥ भगवञ् श्रोतुमिच्छामि तुलापुरुषसंज्ञकम्॥ को होमः कस्य पूजा च संकल्पः को यथाविधि ॥ श्रीकृष्ण उवाच ॥ ग्रस्ते सूर्य्ये तथा चन्द्रे देवयात्रासरित्तटे ॥ लक्षहोमे विशेषेणात्मानं सन्तोलयेन्नृप ॥भूमिकम्पे तथोल्कायां निर्घातोत्पातदर्शने। दुर्ग्रहग्रहपीडायामात्मानं तोलयेत्तथा ॥ आत्मानं तोलयेद्यस्तु तृणैर्वापि कथंचन। त्रैलोक्यं तोलितं तेन सर्वकामार्थसिद्धये ॥ पलाशखदिराश्वत्थदेवदारुशमीमयम् । स्तम्भमेकं प्रकुर्वीत यजमानप्रमाणतः ॥ मानहीनाधिकं कृत्वा कृतमप्यकृतं भवेत्। तस्मात्सर्वप्रयत्नेन प्रमाणं कारयेद्बुधः॥यत्र वेदविदो विप्रा धर्म्माचाररतास्तथा। रविसंक्रमकालेपि स्वां तनुं परितोलयेत् ॥ वेश्ममानेन कर्त्तव्यं मण्डलं चतुरस्रकम् । यमवामे पश्चिमायां

शालिपिष्टेन वाक्षतैः ॥ रोपयेन्मण्डलस्याग्रेतस्योपरि तुलां न्यसेत्।
पीतवस्त्रेण संछाद्य चन्दनेनानुलेपयेत् ॥ ब्राह्मणं सत्यसम्पन्नं वेद-
वेदांगपारगम् । धर्माचाररतं शान्तं वृणुयात्फलचन्दनैः ॥ तत्रादौ
तु गणेशं च मातृकामण्डलं तथा । पूजयेद्गन्धपुष्पैश्च धूपैर्दीपैस्त
थोत्तमैः ॥ पूजितोसि मया देव यज्ञादौ त्वं गणेश्वर । त्वत्प्रसा-
दान्महासिद्धिर्विघ्नराज नमोस्तु ते ॥ मातृके त्वं महादेवि नानातं-
कसमाकुलम् । सर्वतो रक्ष भीतिभ्यो नमस्ते जगदम्बिके ॥
ब्राह्मणैर्वाचयेच्छान्तिं पंच वाद्यानि वादयेत् । वेदोक्तेन विधानेन
तुलादानं तु कारयेत् । अथ संकल्पः । अद्येत्यादि० अमुकगोत्रो-
मुकराशिरमुकशर्म्माहंममजन्मकालिकवर्षकालिकगोचरिकसमस्त-
सूर्य्यादिग्रहाणां यत्र कुत्रचिज्ज्योतिःशास्त्रान्तरोक्तजातकताजकसं-
हिताहोरागणितादिफलनिर्दिष्टलग्नवशात् स्थितानां येन केनचित्स-
हचतुर्विधसम्बन्धवशाद्यद्वावेशयुतदृष्टयथोचितशुभफलाभिवृद्ध-
येतत्तत्समयानुगतनानाविधानिष्टारिष्टनिवृत्तयेकायिकवाचिकमा-
नसिकसांसर्गिकतापत्रयोत्थदिव्यभौमान्तरिक्षस्थितभूतभविष्य-
द्वर्त्तमानकालिकदृष्टश्रुतानुमानादिदुःशकुनदुःस्वप्नदुर्विचिंतितप्रति-
प्रसवाप्रसविकविविधवैकृत्यादिग्रहनक्षत्रताराविद्युदुल्काशनिपरिवे-
षसन्ध्यास्तनितप्रवर्षणमारुतप्रचारातिशयरजोधूमादिज्ञाताज्ञात-
नानाप्रत्यूहव्यूहशान्तिपूर्वकदीर्घायुष्यनैरुज्यबलपुष्टिसुखावाप्तये
यथासम्भववस्तुभिरात्मतोलनं करिष्ये।तदंगतयास्तम्भतुलायमब्र
ह्मविष्णुमहेश्वरयमादिचतुर्दशनामदेवता दशनामदेवतास्वर्णरजत
ताम्रकार्प्पासमयसूत्रचतुष्टयपूजनं च करिष्ये॥ॐविश्वानिदेवसवि
तर्दुरितानिपरासुवयद्भद्रंतन्नआसुव॥तुलावाहनम् ॥ आवाहयाम्य
देवि तुले त्वां सत्यसंस्थिताम् । मम तोलय चात्मानं सर्वोपद्रवन
शिनि ॥ आपोदेवीति मन्त्रेण तुलादानं तु कारयेत्॥आपोदेवी
प्रजापतिर्ऋषिर्गायत्रीछन्दस्तुला देवता तुलावाहने विनियोगः

ॐ आपोदेवीबृहस्पतिर्विश्वसम्भवेद्यावापृथिवीउरोरन्तरिक्षंबृहस्पतये हविषाविधेम ॥ इत्यक्षतान् क्षिप्त्वा कुशोदकेनाभिषिंचेत् ॥ देवस्यत्वेति तिसृभिरभिषिंचेत्ततस्तुलाम् ॥ देवस्यत्वेति त्रयाणां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दस्तुलादेवता तुलाभिषेचने विनियोगः ॥ ॐ देवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ अश्विनोर्भैषज्येनब्रह्मवर्चसेतेजसेब्रह्मवर्चसायाभिषिंचामि ॥ सरस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायतुर्य्यंत्रेणाग्नेभिषिंचामि । इन्द्रस्येन्द्रियेण बलायश्रियैयशसेभिषिंचामि ॥ इत्यभिषिच्य प्रतिष्ठासम्भवैर्मन्त्रैस्तुलां देवीं प्रतिष्ठापयेत् ॥ एतन्त इति प्रतिष्ठाप्य ॥ ॐभूर्भुवः स्वः भोस्तुले इहागच्छेह तिष्ठ पाद्यादीनि समर्प्पयामि स्तम्भसहिततुलादेव्यै नमः ॥ अर्चितासि मया देवि ग्रहदोषोपशान्तये । आयुरारोग्यमैश्वर्य्यं तुले देहि नमोस्तु ते ॥ स्थापयेत षोडशप्रस्थं धान्यानां च तुलातले । तिलतण्डुलमाषैश्च यमस्य प्रतिमाऽसिता ॥ दक्षशीर्षा सौम्यपादा कर्त्तव्या खड्गदण्डिनी । अनड्वानिति मन्त्रेण वस्त्रं च परिधापयेत् ॥ अनड्वानिति उशना ऋषिः पङ्क्तिश्छन्द इष्टका देवता वस्त्रपरिधाने विनियोगः ॥ ॐ अनड्वान्वयः पंक्तिश्छन्दोधेनुर्व्वयोजगतीछन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयोविराट्छन्दः पंचाविर्वयोगायत्रीछन्दस्त्रिवत्सोवयउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दो लोकन्तामिन्द्रम् ॥ कलशं स्थापयेत्तत्र हिरण्याम्बरसंयुतम् । पंचनद्येति मन्त्रेण वरुणस्येति वा तथा ॥ हिरण्यहस्त इति वा प्रतिष्ठां चैव कारयेत् ॥ ॐ पंचनद्यः सरस्वतीमपियन्तिसस्रोतसः । सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥ ॐ वरुणस्योत्तम्भनमिति ॥ ॐ हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववांयात्वर्वाङ्अपसेधन्रक्षसोयातुधानानस्थाद्देवः प्रतिदोषंगृणानः ॥ इति वरुणं सम्पूज्य यमादिदशनामदेवताःपूजयेत्॥प्रथमस्तु यमः

प्रोक्तो द्वितीयः पाशवर्द्धकः। तृतीयः कालपुरुषश्चतुर्थो यमकिं-
करः॥ पञ्चमो मृत्युनामा च षष्ठो दारुणसंज्ञकः। सप्तमस्तु महारौ-
द्रोऽष्टमोभयकरस्तथा॥नवमस्तु महाकान्तो दशमस्तु बलाकृतिः॥
एतानि दशनामानि यमपार्श्वे प्रपूजयेत् ॥ ॐ भूर्भुवः स्वः भो
यमादिदशनामदेवता इहागच्छतेहतिष्ठत।यमादिदशनामदेवताभ्यो
नमः ॥ सम्पूज्य॥ यमायत्वेति मन्त्रेभ्यो यममावाहयेत्ततः॥
ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा धर्माय धर्मः पित्रे॥ ॐ
यमायत्वामखायत्वासूर्य्यस्यत्वातपसेदेवस्त्वा सवितामध्वानक्तुः
पृथिव्याः स ँ स्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोसि॥ ॐ
यमश्रिताससरस्वतीहविषेन्द्रमवर्धयत्। सबिभेदवक्षमवन्नमुचानासु-
रेसचास्वाहा। इति वैदिकमन्त्रैरावाह्य वक्ष्यमाणमन्त्रेण यमं पूज-
येत्॥समुद्रोसीति मन्त्रेण यमस्य प्रतिमां यजेत्॥ समुद्रोसीति
मधुच्छन्द ऋषिर्गायत्रीच्छन्दोयमो देवता यमप्रतिमापूजने विनि-
योगः॥ ध्यानम्॥ एह्येहि दण्डायुध धर्म्मराज कालाञ्जनाभास
विशालनेत्र॥ विशालवक्षःस्थलरुद्ररूप गृहाण पूजां भगवन्नमस्ते॥
ॐ समुद्रोसि विश्वव्यचा अजोस्येकपादहिरण्यसिबुध्न्योवागस्यै-
न्द्रमसिसदोस्पृतस्यद्वारौमामासंताप्तमध्वनामध्वपते प्रमातिरस्व-
स्तिमेस्मिन्पथिदेवयानेभूयात्॥ ॐ भूर्भुवः स्वः यमेहागच्छेह
तिष्ठ पाद्यादीनि समर्प्पयामि यमाय नमः॥ सम्पूज्य॥ अर्चि-
तोसि मया देव धर्मराज महाबल।आयुरारोग्यमैश्वर्य्यं सौभाग्यं
नाथ देहि मे॥अघोरं रौरवाकारं दुस्तरं यमपंथिभिः।त्वत्प्रसा-
दाद्धर्मराज दुस्तरं संतराम्यहम्॥ तत्त्वायामीति मंत्रेण नमस्कारं
निवेदयेत्॥ इति संप्रार्थ्य॥ब्रह्मविष्णुशिवान् भक्त्या गोमयप्रति-
मासु च॥ अर्चयेद्विधिना राजन् सर्गस्थित्यंतकारिणः॥ आ-
ब्रह्मन्निति मंत्रेण ब्रह्माणं प्रथमं यजेत्॥ आब्रह्मन्निति प्रजापतिर्ऋ-
षिर्यजुश्छन्दो ब्रह्मादेवता ब्रह्मावाहने विनियोगः॥ एह्येहि विप्रेन्द्र

पितामहेश हंसाधिरूढ त्रिदशैकवंद्य।श्वेतोत्पलाभास कुशांबुहस्त गृहाण पूजां भगवन्नमस्ते॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरइषव्योतिव्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योपाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतांनिकामेनिकामेनः पर्ज्यन्योअभिवर्षतुफलवत्योनओषधयः पच्यंतांयोगक्षेमोनः कल्पताम् ॥ ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छेह तिष्ठ पाद्यादीनि समर्पयामि ब्रह्मणे नमः॥ संपूज्य ॥ विष्णोरराटमंत्रेण विष्णुं संपूजयेत्ततः॥ विष्णोरराटेति दीर्घतमा ऋषिर्गायत्रीछन्दोविष्णुर्देवता विष्णवावाहनेविनियोगः॥ एह्येहि विष्णो गरुडासनस्थ लक्ष्मीसमावंदितपादपद्म । शुभाशुभानंदशुचामधीश गृहाण पूजां भगवन्नमस्ते । ॐविष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि॥ वैष्णवमसि विष्णवेत्वा॥ॐभूर्भुवः स्वःविष्णो इहागच्छेह तिष्ठ पाद्यादीनि समर्प्पयामि विष्णवे नमः ॥ संपूज्य॥नमस्ते रुद्रमंत्रेण शिवं संपूजयेत्ततः॥नमस्तइति परमेष्ठी ऋषिर्गायत्रीछन्दः शिवो देवता शिवावाहने विनियोगः। एह्येहि गौरीश पिनाकपाणे शशांकमौले वृषभाधिरूढ । देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते॥ ॐ नमस्तेरुद्रमन्यवउतोतइषवेनमः। बाहुभ्यामुततेनमः॥ॐभूर्भुवः स्वः शिवेहागच्छेह तिष्ठ पाद्यादीनि समर्प्पयामि शिवाय नमः ॥ संपूज्य ॥ ब्रह्मविष्णुशिवा यूयं पूजिताभक्तिभावतः । रक्षध्वं सर्वमनिशं यज्ञं मम शुभार्थदम् ॥ एहि धर्मभृतां श्रेष्ठ धर्माधर्मविचारक।धर्मेण धारयँल्लोकान्धर्मराज नमोस्तुते ॥ नैवेद्यं विविधाकारं गृहाण भगवन्मम ।पाहि सर्वमिमं यज्ञमतः शांतिं प्रयच्छ मे ॥ अथ यमचतुर्दशनामपूजा ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च ॥औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥

ॐभूर्भुवः स्वः यमादिचतुर्दशनामदेवता इहागच्छतेह तिष्ठत पाद्या-
दीनिसमर्प्पयामि ॥ यमादिचतुर्दशनामदेवताभ्यो नमः॥संपूज्य॥
यद्बाल्ये यच्च कौमारे योवने वार्धकेपि वा ॥ सर्वं हरसि मे पापं
धर्मराज नमोस्तु ते ॥ अथ बलिदानं यमाय ॥ पात्रे दधिमाष-
भक्तबलिं संस्थाप्य दीपं प्रज्वाल्य ॥ ॐ नमो भगवते यमाय
प्रेताधिपतये रौद्राय दंडपाणये महिषवाहनसमधिरूढाय घन-
गर्जितघोरगंभीरनादाय दक्षिणदिक्संस्थिताय एह्येहि सपरिवार
प्रभो धर्मराज बलिं गृह्ण गृह्ण यजमानं मां पाहि पाहि यज्ञरक्षां कुरु
कुरु स्वाहेति जलम् ॥ ॐ यमायत्वामखायत्वासूर्य्यस्यत्वातपसे
देवस्त्वा सवितामध्वानक्तुः पृथिव्याःसꣳस्पृशस्पाहि अर्चिरसिशो-
चिरसितपोसि ॥इत्यक्षतान् यमाय सांगाय एष सदीपदधिमाष-
भक्तबलिर्नमः ॥ बलये नमः संपूज्य ॥ भो यम दिशं रक्ष । अमुं
सदीपं दधिमाषभक्तबलिं भक्ष मम शरीरे आयुःकर्त्ता क्षेमकर्त्ता
शान्तिकर्ता पुष्टिदस्तुष्टिदो भव॥ मंडले संप्रवक्ष्यामि मया भक्त्या
निवेदितम् । इदमर्घ्यमिदं पाद्यं दीपोऽयं प्रतिगृह्यताम् ॥ अथ
बलिदानं ब्रह्मणे ॥ पात्रे दधिमाषभक्तबलिं संस्थाप्य दीपं प्रज्वा-
ल्य ॥ ॐ नमो भगवते ब्रह्मणे चतुर्मुखाय चतुर्भुजाय कमण्डलु-
हस्ताय हंसवाहनसमधिरूढाय एह्येहि सपरिवार प्रभो भगवन्
ब्रह्मन् बलिं गृह्ण गृह्ण यजमानं मां पाहि पाहि यज्ञरक्षां कुरु कुरु
स्वाहेति जलम् ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवे-
नआवः॥सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥इत्य-
क्षतान् ॥ ब्रह्मणे सांगाय एष सदीपदधिमाषभक्तबलिर्नमः ॥
बलये नमः ॥ सम्पूज्य ॥ भो ब्रह्मन् दिशं रक्षामुं सदीपं दधिमा-
षभक्तबलिं भक्ष । मम शरीरे आयुःकर्ता क्षेमकर्ता शांतिकर्ता
पुष्टिदस्तुष्टिदो भव ॥ मण्डले संप्रवक्ष्यामि मया भक्त्या
निवेदितम् । इदमर्घ्यमिदं पाद्यं दीपोयं प्रतिगृह्यताम् ॥ अथ

बलिदानं विष्णवे । पात्रे दधिमाषभक्तबलिं संस्थाप्य दीपं प्रज्वाल्य ॥ ॐ नमो भगवते विष्णवे त्रिभुवनेश्वराय श्यामवर्णाय पीतांबरधराय वनमालाविभूषिताय त्रयस्त्रिंशत्कोट्युपशोभिताय चतुर्भुजाय गरुडवाहनसमधिरूढाय एह्येहि सपरिवार प्रभो भगवन् विष्णो बलिं गृह्ण गृह्ण यजमानं मां पाहि पाहि यज्ञरक्षां कुरु कुरु स्वाहेति जलम् ॥ ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसि विष्णोर्ध्रुवोसि ॥ वैष्णवमसि विष्णवे त्वा । इत्यक्षतान् ॥ विष्णवेसांगाय एष सदीपदधिमाषभक्तबलिर्नमः बलये नमः । संपूज्य ॥ भो विष्णो दिशं रक्षासु सदीपं दधिमाषभक्त-बलिं भक्ष मम शरीरे आयुःकर्त्ता क्षेमकर्त्ता शान्तिकर्ता पुष्टिदस्तुष्टिदोभव ॥ मंडले संप्रवक्ष्यामि मया भक्त्या निवेदितम् ॥ इदमर्घ्यमिदं पाद्यं दीपोयं प्रतिगृह्यताम् ॥ अथ बलिदानं शिवाय ॥ पात्रेदधिमाषभक्तबलिं संस्थाप्य दीपं प्रज्वाल्य ॥ ॐ नमो भगवते रुद्रायार्धचंद्रविभूषिताय त्रिनेत्राय त्रिशूलहस्ताय वृषभवाहनसमधिरूढाय एह्येहि सपरिवार प्रभो भगवन् शंभो बलिं गृह्ण गृह्ण यजमानं मां पाहि पाहि यज्ञरक्षां कुरु कुरु स्वाहेति जलम् ॥ ॐनमः शंभवाय च मयोभवाय च । नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च । इत्यक्षतान् ॥ शिवाय सांगाय एष सदीपदधिमाषभक्तबलिर्नमः ॥ बलये नमः । संपूज्य ॥ भो शिव दिशं रक्षासु सदीपं दधिमाष-भक्तबलिं भक्ष । मम शरीरे आयुःकर्त्ता क्षेमकर्त्ता शांतिकर्त्ता पुष्टिदस्तुष्टिदो भव ॥ मंडले संप्रवक्ष्यामि मया भक्त्या निवेदि-तम् । इदमर्घ्यमिदं पाद्यं दीपोयं प्रतिगृह्यताम् ॥ अथोपहारनिवे-शनम् ॥ दक्षिणे विन्यसेद्द्रव्यमात्मानं चोत्तरे न्यसेत् ॥ व्रीहयश्च मे मंत्रेण सप्तधान्यानि योजयेत् ॥ ॐव्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियंगवश्च मेऽ-

णवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पंताम् ॥ यवगोधूमधान्यानि तिलाः कंगुस्तथैव च । नीवाराः श्यामकाश्चैव सप्तधान्यमिदं स्मृतम् ॥ अश्माचमेति मंत्रेण धातूनष्टौ नियोजयेत् ॥ ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पंताम् ॥ हिरण्यं रजतं ताम्रमारकूटं च सीसकम् । लोहं रंगं च खर्जूरमित्यष्टौ धातवः स्मृताः ॥ अथ तुलाप्रार्थना ॥ सत्यं तुलाप्रमाणेनासत्यं नैवाभिजायते॥मम पापविनाशाय तुले देवि नामोस्तु ते । ब्रह्मविष्णुमहेशाद्यैः पूजितासि तुले सदा ॥ ममापि पूजिता भक्त्या सदा शांतिं प्रयच्छ मे ।अथ तुलासूत्रपूजा ॥ ॐ रूपेण वोरूपमभ्यागांतुथोवो विश्वेदेवा विभजतु ऋतस्य पंथाः प्रेतदक्षिणाविश्वःपशव्यंतरिक्षंयतस्वसदस्यै ॥ ॐहिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः परिरेक आसीत् । सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ॐ यदश्वायवास उपस्तृणत्यधीवासंयाहिरण्यान्यस्मैसंदानमर्वन्तं पड्वीशं प्रियो देवेष्वायाममायन्ति ॥ ॐ स्वर्णधर्म्मः स्वाहा । स्वर्णार्कः स्वाहा। स्वर्णशुक्रः स्वाहा । स्वर्णज्योतिः स्वाहा । स्वर्णसूर्य्यः स्वाहा ॥ ॐ भूर्भुवः स्वः स्वर्णरजतताम्रकार्प्पाससूत्रगता विष्णुविरिञ्चिशिवयमा देवता इहागच्छतेह तिष्ठत ॥ पाद्यादीनि समर्प्पयामि स्वर्णसूत्रादिगतविष्ण्वादिदेवताभ्यो नमः ॥ सम्पूज्य ॥ त्रातारमिन्द्रमन्त्रेण नमस्कारं निवेदयेत् ॥ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवेसुहवꣳशूरमिन्द्रं ह्वयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः॥इति नमस्कृत्य दक्षिणहस्ते खड्गं गृहीत्वा स्तम्भलम्बिसूत्राणि वक्ष्यमाणमन्त्रैश्छेदयेत् ॥ ॐ अखण्डं खण्डयेद्यस्तु ह्यापदां चैव खण्डनम्॥ स्वर्णसूत्रप्रदानेन गोविन्दः प्रीयतामिति।

अखण्डं खण्डयेद्यस्तु ह्यापदां चैव खण्डनम् । रौप्यसूत्रप्रदानेन ब्रह्मा सम्प्रीयतामिति ॥ अखण्डं खण्डयेद्यस्तु ह्यापदां चैव खण्डनम् ॥ ताम्रसूत्रप्रदानेन शिवः सम्प्रीयतामिति ॥अखण्डं खण्डयेद्यस्तु ह्यापदां चैव खण्डनम्॥ताम्रसूत्रप्रदानेन शिवः सम्प्रीयतामिति ॥ अखण्डं खण्डयेद्यस्तु ह्यापदां चैव खण्डनम् ।कार्प्पास-सूत्रदानेन यमः सम्प्रीयतामिति ॥ इति चत्वारि सूत्राणिच्छेदयित्वा ॥ स्वयं वै प्राङ्मुखो भूत्वा सालंकारः सवस्त्रकः ।पाद्यगन्धाक्षतैश्चैव संक्षेपात्पूजयेद्ग्रहान् ॥कुर्य्यात्प्रदक्षिणा राजन् चतस्रश्च तुलातले ॥ ततःस्वस्त्ययनं विप्रैः पाठयेद्विधिपूर्वकम् ॥ ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥ जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ प्रतिपदसीति मन्त्रेण घटपादं विधापयेत्॥ॐ प्रदिपदसि प्रतिपदेत्वाऽनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ ततश्चतुर्षु पूर्वायतेषु घटपादेष्वक्षतपुञ्जरूपेषु क्रमशः दक्षिणपादं न्यसेत ॥ ॐ प्रथमं घटपादेन ब्रह्मा मे प्रीयतामिति ॥ द्वितीयं घटपादेन विष्णुर्मे प्रीयतामिति ॥ तृतीयं घटपादेन रुद्रो मे प्रीयतामिति ॥ चतुर्थं घटपादेन यमो मे प्रीयतामिति ॥ खड्गो वैश्वेति मंत्रेण विदध्यात् खड्गधारणम् ॥ खड्ग इति प्रजापतिर्ऋषिः शक्करीछन्दः खड्गो देवता खड्गग्रहणे विनियोगः ॥ ॐखड्गोवैश्वदेवःश्वाकृष्णकर्णोगर्दभस्तेरक्षसामिन्द्रायसूकरः सिंहोमारुतः कृकलासःपिप्यकाशकुनिस्तेशरव्यायैविश्वेषां देवानां पृषतः ॥ इति खड्गं गृहीत्वा ॥ सूत्रामाणेति मन्त्रेण घटमारोहयेत्ततः । सूत्रामाणाविति गयप्लातर्ऋषिस्त्रिष्टुप्छन्दोदितिर्देवता घटप्रवेशने मिनियोगः ॥ ॐ सूत्रामाणांपृथिवींद्यामुनेहसꣳ सुशर्माणमदितिसुप्रणीतिम् । देवींनाव स्वरित्रामनागसमस्रवन्ती मारुहमास्वस्तये ॥इति घटे प्रविश्य ।यद्देवा इति मन्त्रेण तोलये-

दात्मनस्तनुम् ।यद्देवा इति प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिंगोक्ता देवतास्तोलने विनियोगः ॥ ॐ यद्देवादेवहेडनंदेवासश्चकृमावयम् । अग्निर्मातस्मादेनसोविश्वान्मुंचन्त्व ꣳहसः ॥ ॐ यदि दिवायदिनक्तमेना ꣳ सिचकृमावयम्। वायुर्मातस्मादेनसो विश्वान्मुंचत्व ꣳहसः॥ ॐ यदिजागृद्यदिस्वप्नएना ꣳ सिचकृमावयम् । सूर्य्योमातस्मादेनसोविश्वान्मुंचन्त्व ꣳ हसः ॥ माकांत इति प्रजापतिर्ऋषिः पंक्तिश्छंदो घटो देवता तोलने विनियोगः ॥ॐमाकांतेपक्ष्यस्यांतेपर्य्याकासिदेशेस्वाप्सीःकांतवृत्तंवक्रंपूर्णचंद्रंमत्वारात्रौचेत्क्षुत्क्षामःप्रातर्नेटःखेटोराहुःप्राद्यात्क्रूरस्तस्मप्राध्वांतेहर्म्म्यस्यांतेशस्यैकांतेकर्त्तव्या इति तोलयित्वा पाद्यादीनि समर्प्पयामि संतोलितघृतादिद्रव्येभ्यो नमः ब्राह्मणेभ्यो नमः ॥ सम्पूज्य ॥ कुशतिलजलान्यादाय ॥ अद्येत्यादि० ममक्षेमैश्वर्य्यविजयायुरारोग्यावाप्तये इमानि संतोलितघृतादिद्रव्याणि स्वस्वदैवतानि अमुकामुकगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ ॐ अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदा । सर्वदानफलं तस्मादन्नदानं नृपोत्तम॥ ततः प्रतिष्ठा॥ अद्य कृतैतद्घृतादिद्रव्यदानप्रतिष्ठार्थं हिरण्यमग्निदैवतममुकामुकगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ इति प्रतिष्ठां कृत्वा ॥ ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ यच्चापराह्णे मध्याह्ने सायाह्ने च तथा निशि । कायेन मनसा वाचा कृतं पापमजानता ॥ जानता वा हृषीकेश पुण्डरीकाक्ष माधव । नामत्रयोच्चारणान्मे पापं यातु सहस्रधा ॥ यद्बाल्ये यच्च कौमारे यौवने वार्धकेपि वा । अन्यजन्मकृतं पापमिह जन्मकृतं च यत् ॥ तत्सर्वं नश्यतु क्षिप्रं पुण्यं भवतु चाक्षयम् । देवता ऋषयो नागा गंधर्वाश्चाप्सरोगणाः ॥ हृष्टाः पुष्टा इहागत्य शांतिं कुर्वंतु मे सदा ॥ ततो यजमानः स्नात्वा शरीर-

संधारितवस्त्राणि संत्यज्य नववस्त्राणि वसित्वा संध्यादिकर्म विधाय आचार्य्यं वृत्वा हवनं कारयेत् ॥ कुशैर्हस्तमात्रमितां भूमिं परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रास्तिस्रो रेखा विलिख्य उल्लेखनक्रमेणानामिकां-गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रोपनीतमग्निं तत्र तूष्णीं स्वाभिमुखं स्थापयेत् ॥ पाद्यादीनि समर्प्पयामि ॥ वासोंगुलीयकासनमूल्योपकल्पितवरणद्रव्याय नमः ॥ ब्राह्म-णाय नमः ॥ सम्पूज्य ॥ अद्येत्यादि० ममात्मतोलनकर्म्मणः सांगफलावाप्तये घटांगहवनकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मक-र्तुमनेन वासोंगुलीयकासनमूल्योपकल्पितेन वरणद्रव्येण बृहस्प-तिदैवतेनामुकगोत्रममुकशर्म्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ इति वृत्वा ॥ वृतोस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु। करवाणीति प्रतिवचनम् ॥ अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्याग्निं प्रदक्षिणं कारयित्वा ब्राह्मणमु-दङ्मुखमुपवेशयेत् ॥ अस्मिन्कर्मणि त्वं मे ब्रह्मा भव । भवानीति प्रतिवचनम् ॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निद-ध्यात् ॥ ततः परिस्तरणम्॥ बर्हिषश्चतुर्थभागमादाय आग्नेयादी-शानान्तं ब्रह्मणोग्निपर्य्यंतं नैर्ऋत्याद्वायव्यान्तम् अग्नितः प्रणीतापर्यंतम् ॥ ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्।पवित्रीकरणार्थं साग्रमनंतर्गर्भिकुशद्वयम्।प्रोक्षणीपात्रम् आज्यस्थाली चरुस्थाली सम्मार्जनकुशाः पञ्च।वेणीरूपोपयमन-कुशाः सप्त । पालाशसमिधस्तिस्रः । स्रुवः । आज्यम् । तंडुलपूर्ण-पात्रम् । पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ॥ पवित्रच्छेदनकुशैः स्वप्रादेशमितं पवित्रद्वयं छित्त्वा सपवित्रदक्षि-णकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रं निधाय द्वाभ्यामनामिकांगु-

ष्ठाभ्यामुत्तराग्रं पवित्रद्वयं गृहीत्वा त्रिरुत्पवनम्। प्रोक्षणीपात्रं वामहस्ते निधाय दक्षिणानामिकांगुष्ठाभ्यां पवित्रद्वयं गृहीत्वा त्रिरुद्दिंगनं प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । आज्यस्थाल्यामाज्यं निरूप्याधिश्रित्य दक्षिणतो निदध्यात् । ज्वलत्तृणेन हविर्वेष्टयित्वा वह्नौ तत्प्रक्षिपेत् ॥ स्रुवं प्रतप्य सम्मार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणतः कुशोपरि निदध्यात् । आज्यमग्नेरवतार्य त्रिरुत्पवनमवेक्ष्य च सत्यपद्रव्ये तन्निरस्य ततः प्रोक्षण्युत्पवनम् ॥ तत उत्थायोपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रो जुहुयात् । तत उपविश्य सपवित्रं प्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्य्युक्ष्य प्रणीतापात्रे पवित्रद्वयं निधाय ब्रह्मणाऽन्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् ॥ प्रजापत्यादिचतुर्णां मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मन्त्रोक्ता देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा, इदं प्रजापये। इति मनसा। ॐ इन्द्राय स्वाहा, इदमिन्द्राय। इत्याघारौ॥ ॐ अग्नये स्वाहा, इदमग्नये। ॐ सोमाय स्वाहा, इदं सोमाय। इत्याज्यभागौ॥ व्याहृतित्रयस्य प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्य्या देवता व्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा, इदमग्नये ॥ ॐ भुवः स्वाहा, इदं वायवे॥ ॐ स्वः स्वाहा, इदं सूर्य्याय॥ पाद्यादीनि समर्प्पयामि॥ अग्नये नमः॥ संपूज्य॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम्। सुवर्णवर्णमनलं समिद्धं सर्वतो मुखम्॥ इति सम्प्रार्थ्य॥ त्वन्नो सत्वन्नो द्वयोर्वामदेवऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः॥ ॐ त्वन्नोअग्नेवरुणस्य विद्वान्देवस्यहेडोअवयासिसीष्ठाः। यजिष्ठोवह्नितमः शोशुचानो

विश्वाद्वेषा॑ᳫंसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ॐ सत्वन्नो अग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ। अवयक्ष्वनोवरुणᳫंरराणोवीहिमृडीकᳫंसुहवोनएधिस्वाहा ॥ इदमग्नीवरुणाभ्याम्॥ अयाश्चाग्न इति विराङ्ऋषिर्गायत्रीछंदोग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमया असि।अयानोयज्ञंवहास्ययानो धेहिभेषजᳫंस्वाहा ॥ इदमग्नये ॥ येतेशतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्तहोमे विनियोगः॥ ॐ येतेशतंवरुण येसहस्रंयज्ञियाः पाशावितता महांतः।तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचन्तुमरुतःस्वर्काःस्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यः ॥ उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता प्रायश्चित्तहोमे विनियोगः ॥ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमᳫंश्रथाय । अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा ॥ इदंवरुणायादितये ॥ ॐ गणपतये स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ विष्णवे स्वाहा । ॐ शिवाय स्वाहा ॥ अग्नय इति द्वादशमंत्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्छंदो मंत्रोक्ता देवता आज्यहोमे विनियोगः ॥ ॐ अग्नये पृथिव्यधिपतये स्वाहा । इदमग्नये पृथिव्यधिपतये ॥ ॐ वायवेंतरिक्षाधिपतये स्वाहा। इदं वायवेंतरिक्षाधिपतये॥ॐसूर्य्याय दिवोधिपतये स्वाहा । इदं सूर्य्याय दिवोधिपतये ॥ ॐ चंद्रमसे नक्षत्राधिपतये स्वाहा । इदं चन्द्रमसे नक्षत्राधिपतये ॥ ॐ इंद्राय सुराधिपतये स्वाहा । इदमिन्द्राय सुराधिपतये ॥ ॐ यमाय प्रेताधिपतये स्वाहा। इदं यमाय प्रेताधिपतये ॥ ॐ वरुणायापामधिपतये स्वाहा । इदं वरुणायापामधिपतये ॥ ॐ कुबेराय यक्षाधिपतये स्वाहा । इदं कुबेराय यक्षाधिपतये ॥ ॐ ब्रह्मणे वेदाधिपतये स्वाहा । इदं ब्रह्मणे वेदाधिपतये ॥ ॐ विष्णवे त्रैलोक्याधिपतये स्वाहा ॥ इदं विष्णवे त्रैलोक्याधिपतये ॥ ॐ रुद्राय

भूताधिपतये स्वाहा । इदं रुद्राय भूताधिपतये ॥ ॐ स्कंदाय सेनाधिपतये स्वाहा । इदं स्कंदायसेनाधिपतये ॥ प्रजापत्यादिमंत्रद्वयस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोलिङ्गोक्ते देवते उत्तरांगस्विष्टकृद्धोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॥ संश्रवं प्राश्य घृतयवतिलैर्नवग्रहमन्त्रैरपि होममाचाराद्वा कुर्य्यात् ॥ पाद्यादीनि समर्प्पयामि ॥ सदक्षिणतंडुलपूर्णपात्राय नमः ॥ सम्पूज्य । ब्रह्मणे नमः ॥ अमुकोऽहं मम कृतैतदात्मतोलनाङ्गीभूतहवनकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मणः सांगफलावाप्तये प्रतिष्ठार्थमिदं सदक्षिणं तंडुलपूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥ स्वस्तीति प्रतिवचनम् ॥ पूर्णादर्वीति पूर्णनाभऋषिरनुष्टुप्छन्दोग्निर्देवता पूर्णाहुतिहोमे विनियोग ॥ ॐ पूर्णादर्विपरापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाइषमूर्जꣳ शतक्रतो स्वाहेति ॥ स्रुवस्थं घृतदिग्धं क्रमुकफलं समुत्थायाग्नौ जुहुयात् ॥ तत उपविश्य सुमित्रियान इतिदध्यङ्ङाथर्वणऋषिरापो देवताः शिरःप्रोक्षणमार्जने विनियोगः ॥ ॐ सुमित्रियान आप ओषधयः संत्विति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति प्रणीतापात्रमैशान्यां दिशि न्युब्जीकुर्य्यात् ॥ देवागात्विति अत्रिर्ऋषिरुष्णिकछन्दो मनसस्पतिर्देवता बर्हिर्होमे विनियोगः ॥ ॐ देवागातुविदोगातुं वित्वागातुमितमनसस्पत । इमं देवयज्ञꣳ स्वाहा वातेधाः ॥ इति हस्तेनैव बर्हिर्जुहुयात् ॥ त्र्यायुषमिति नारायणऋषिरुष्णिकछन्दःशिवो देवता त्र्यायुषकरणे विनियोगः ॥ ॐ त्र्यायुषंजमदग्नेरिति ललाटे । कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । यद्देवेषु त्र्यायुषमिति दक्षिणांसे । तन्नो अस्तुत्र्यायुषमिति हृदि । बिन्दुरूपं तिलकं कृत्वा आचार्य्याय दक्षिणां दद्यात् ।

ब्राह्मणभोजनभूयसीसंकल्पं विधाय द्रव्यं विभज्य प्रार्थयेत् ॥ ॐ त्वं तुले सत्यधर्म्मासि प्रमाणमिह कीर्तितम् ॥ मां तोलयन्ती संसाराद्दुद्धरस्व नमोस्तु ते ॥ सिद्धिरस्तु क्रियारम्भे वृद्धिरस्तु धनागमे ॥ पुष्टिरस्तु शरीरे मे शान्तिरस्तु गृहे मम ॥ नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक ॥ हरे तारयसे यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥ स्वर्णरूप्यकताम्रैश्च रांगसीसकलोहकैः ॥ वस्त्रभूषान्नदानाद्यैः प्रीयतां मे महेश्वरः ॥ लवणे वै रसाः सर्वे लवणे सर्वदेवताः ॥ लवणं तु हरेत्पापमतः शान्तिं प्रयच्छ मे ॥ इति प्रार्थना ॥ अनेन विधिना यस्तु तुलादानं पृथात्मज ॥ करोति तस्य पापानि नश्यन्त्येव न संशयः ॥ आयुर्दीर्घं सुखं पूर्णं सन्ततिर्बहुला यशः ॥ दिशामन्तेषु विश्रान्तिर्भवेत्तस्य न संशयः॥ विशेषतो मारकयोगलक्षितग्रहाभिचारे शकुने भयावहे ॥ कुर्वीत धीमाञ्चिरजीवितासये क्षेत्रे तुलादानमिलापते भृशम् ॥ तदन्ते कांस्यपात्रस्थं ससुवर्णं पृथात्मज ॥ धेनुदुग्धोद्भवं सर्प्पिर्दद्यादायुष्यहेतवे ॥

जन्मोत्सवविधिः ।

जन्मतिथौ ब्राह्मे मुहूर्त्ते उत्थाय नित्यक्रियां कृत्वा तिलतण्डुलचूर्णमिश्रगङ्गोदकेन स्नात्वा तिलकल्केनैव वा सामग्रीं सम्पाद्याहतं वासः परिधाय गणेशवरुणादिपूजनं विधाय षोडशाक्षतपुञ्जेषु- षष्ठी च कुलदेवी च भानुर्विघ्नेश एव च । स्वनक्षत्रं च पितरो मार्कण्डेयः प्रजापतिः ॥ अश्वत्थामा बलिर्व्यासः कृपाचार्य्यो विभीषणः । हनुमाञ्जामदग्न्यश्च बलभद्रस्तथैव च ॥ एतन्तेति प्रतिष्ठाप्य चतुर्थ्यन्तैश्च नामभिः । पाद्यादिभिः षोडशभिरुपचारैरिमान्यजेत् ॥ प्रार्थयेत् ॥ चिरजीवी यथा त्वं भो मुनीनां प्रवर द्विज । तथा कुरुष्व मां प्रीत्या मार्कण्डेय चिरायुषम् ॥ जय देवि जगन्मातर्जगदानन्दकारिणि । प्रसीद मम कल्याणि

महाषष्ठि नमोऽस्तु ते ॥ ततो ग्रहनिमित्तकदानानि कृत्वा—निम्ब-गुग्गुलुसिद्धार्थदूर्वागोरोचनादिभिः । विधाय पोटलीं शुद्धामेतन्तेति प्रतिष्ठयेत् ॥ ततः पुरोधसो हस्तात्स्वहस्ते बन्धयेद्बुधः ॥ ॐ यदाबध्नन् दाक्षायणाहिरण्यᳬ शतानीकाय सुमनस्यमानाः । तन्मआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ इति पोटली-बन्धनम् ॥ ततो गुडतिलमिश्रं दुग्धं पिबेत् ॥ सगुडं तिलसम्मिश्रमञ्जल्यर्धमिदं पयः । मार्कण्डेयवरं लब्ध्वा पिबाम्यायुष्य-हेतवे ॥ गोदानभूयसीब्राह्मणभोजनादिसंकल्पं विधाय अभिषेक-तिलकमन्त्रपाठाशीर्वादं गुरुद्वारा गृह्णीयात् ॥ ततो वर्षफलं ज्योतिर्विदः सकाशाच्छृणुयात् ॥ तस्मै स्वर्णवस्त्रादि दद्यात् ॥

योगिनीपूजनम् ।

अथाष्टयोगिनीवैदिकमन्त्राः ॥ मङ्गलायाः ॥ परिवृक्तेवेति मुद्गलऋषिस्त्रिष्टुप्छन्दो मङ्गला देवता मङ्गलावाहने विनियोगः ॥ ध्यानम् ॥ मङ्गला रत्नभूषाढ्या खड्गपाशधरा सिता । कर्त्तव्या श्वेतवसना चन्द्रवामाङ्गसंस्थिता ॥ ऋक्—ॐ परिवृक्ते वपति विद्यमानᳬ पीप्याना कूचक्रेणैव सिञ्चम् । एष्यैष्या चिद्रथ्या जयेम सुमङ्गलं सिनवदस्तु सातम् ॥ ॐ भूर्भुवः स्वः मङ्गले इहागच्छेह तिष्ठ ॥ पिंगलायाः ॥ अस्मिन्निति काश्यपऋषिर्गायत्रीछन्दः पिंगला देवता पिंगलावाहने विनियोगः ॥ ध्यानम् ॥ पिंगला पीतवसना दण्डमुद्गरधारिणी । सूर्य्यशक्तिः प्रकर्त्तव्या पर्जन्यरथगामिनी ॥ ऋक्—ॐ अस्मिन् पिशंगमिन्दवो दधातावेनमादिशे यो अस्मभ्यमरावा ॥ ॐ भूर्भुवः स्वः पिंगले इहागच्छेह तिष्ठ ॥ धन्यायाः ॥ धन्येति भरद्वाज ऋषिस्त्रिष्टुप्छन्दो धन्या देवता धन्यावाहने विनियोगः ॥ ध्यानम् ॥ धन्या पिशंगिला कार्य्या पीतांशुकविशोभिता । शक्तिर्बृहस्पतेश्चारुवेषाढ्या शिखिवाहना ॥ ऋक्—ॐ धन्याचिद्धित्वे धिषणा

वष्टि प्रदेवाजन्मगृणतेयजध्वै ॥ वेपिष्ठो अङ्गिरसां यद्धविप्रोमधु-
च्छन्दो भवतिरेभ इष्टौ ॥ ॐभूर्भुवः स्वः धन्ये इहागच्छेह तिष्ठ ॥
भ्रामर्य्याः ॥ अपहतरक्षस इति जरत्कर्णऋषिर्जगतीछन्दो भ्रामरी
देवता भ्रामर्य्यावाहने विनियोगः ॥ ध्यानम् ॥ भ्रामरी बभ्रुवदना
ताम्रवर्णविभूषिता । भौमशक्तिः प्रकर्त्तव्या द्विहस्ता द्रुघणासिनी ॥
ऋक्—ॐ अपहतरक्षसोभंगुरावतः स्कभायत निर्ऋतिसन्धतामतिम्।
आनारोयसर्ववीरंसुनोतन देवाव्यंभरतश्लोकमद्रयः ॥ ॐ भूर्भुवः
स्वः भ्रामरीहागच्छेहतिष्ठ ॥ भद्रिकायाः ॥ एतानीति ऐलूष
ऋषिस्त्रिष्टुप्छन्दो भद्रिका देवता भद्रिकावाहने विनियोगः ॥
ध्यानम् ।। भद्रिका पीतवसना पीतवर्णा महाद्युतिः । बुधशक्तिः
प्रकर्त्तव्या वराभयकरा सदा ॥ ऋक्—ॐ एतानिभद्राकलशक्रिम-
कुरुश्रवणददतो मघानिदानइन्द्रोमघवानः सोअस्त्वयं च सोमो
हृदि यं बिभर्मि ॥ ॐ भूर्भुवः स्वः भद्रिके इहागच्छेह तिष्ठ ।
उल्कायाः ॥ उद्गा इति काण्वायनावृषी गायत्री छन्द उल्का
देवतोल्कावाहने विनियोगः ॥ उल्का करालवदना कालाञ्ज-
नचयोपमा । शनिशक्तिः प्रकर्त्तव्या द्विबाहुर्यष्टिपाशभृत् ॥
ऋक्—ॐ उद्गाआजदंगिरोभ्य आविष्कृण्वन् गुहासतीअर्वाञ्चं
नुनुदेबलम् ॥ ॐ भूर्भुवः स्वः उल्के इहागच्छेहतिष्ठ । सिद्धायाः ॥
सिद्धा इति अग्निर्ऋषिस्त्रिष्टुप्छन्दः सिद्धादेवता सिद्धावाहने
विनियोगः ॥ ध्यानम् । सिद्धा सुधांशुवदना शुभ्रवर्णा शरासिनी।
शुक्रशक्तिः प्रकर्त्तव्या सर्वालङ्कारभूषिता ॥ ऋक्—ॐ सिद्धा-
अग्नेधियो अस्मे सनुत्रीर्यंत्रायसेदम आ नित्यहोता ऋतावास-
रोहिदश्वः पुरुक्षुर्द्यूभिरस्मा ॥ अहभिर्वाममस्तु ॐ भूर्भुवः स्वः
सिद्धे इहागच्छेहतिष्ठ। संकटायाः ॥ प्रसाक्षितिरितिदीर्घतमा ऋषि
र्जगती छन्दः संकटादेवता संकटावाहने विनियोगः ॥ ध्यानम् ।
संकटा नीलवर्णाभा नीलाम्बरसमावृता । राहुशक्तिः प्रकर्त्तव्या
कर्त्तरीपाशधारिणी ॥ ऋक्—ॐ प्रसाक्षितिरसुरया महिप्रियऋता-

वनावृतमाघोषथोवृहत् । युवंदिवोवृहतोदक्षमाभुवंगांनधुर्षुपयुञा-थेअपः॥ ॐभूर्भुवः स्वः संकटे इहागच्छेहतिष्ठ ॥ अथ योगिनीद्र-व्याणि॥ कुलत्थतिलखण्डाज्यसितातैलपयांसि च । कांस्यस्थनव-नीतं च योगिनीभ्योऽर्पयेत्क्रमात् ॥ अन्यानि च-घृततंडुलदोषा-क्षौद्रमुद्गतिलतण्डुलाः ॥ माषान्नं योगिनीद्रव्यं क्रमशो गदितं बुधैः। योगिनीवस्त्राणि—शुक्लं पीतं पिशंगं च रक्तं पीतं च नीलकम् । शुक्लं नीलं क्रमाद्वस्त्रं योगिनीनां बुधैः स्मृतम्॥ योगिनीधातवः॥ रौप्यं स्वर्णं च कनकं ताम्रं कांस्यं च लोहकम् । रौप्यं त्रपु तथा प्रोक्ता योगिनीधातवः क्रमात्॥योगिनीरत्नानि॥ मुक्तावैदूर्य्यगारु-त्मन्नीलवज्रप्रवालकाः। विद्रुमप्रख्यसंज्ञे च योगिनीरत्नमीरितम् ॥ योगिनीगन्धाः ॥ चन्दनं देवदारु च रक्तचन्दनमारुणिम् । शालं केशरमिन्दुं च कारवीरं क्रमात्स्मृतम् ॥ योगिनीधूपाः ॥ कर्प्पूरमांसीकर्चूरशालबिल्वागुरूणि च । नारिकेलामरतरुर्धूपो मलयजान्वितः ॥ योगिनीनैवेद्यानि ॥ फेणिकापूपशष्कुल्यो वटकौदनसक्तवः । पोलिकाकृसरान्नं च योगिन्यन्नं क्रमात्स्मृ-तम् ॥ योगिनीजपसंख्या ॥ आयुतं पञ्चसाहस्रं शतं पंचशतं शतम् ॥ पंचायुतं शतं पंचायुतं योगिनिकाजपः ॥ अहिं-सासत्यमास्तेयब्रह्मचर्य्यापरिग्रहाः । (पञ्च) यमाः॥ शौच-सन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि (पञ्च) नियमाः ॥ तिलपात्रविधिः। तिलान्नं ताम्रपात्रस्थं सुवर्णेन समन्वितम्। सर्वपापापहत्यर्थं दद्याद्विप्राय वेदवित् ॥ त्र्यम्बकमिति वसिष्ठ ऋषिरनुष्टुप्छन्दस्त्र्यम्बको देवता ताम्रपात्रस्थसुवर्णतिला-न्नदाने विनियोगः। ध्यानम् ॥ पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः। कपाली शूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः ॥ ऋक्-ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। ऊर्वारुकमिवबन्ध-नान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ भूर्भुवः स्वः त्र्यम्बकेहागच्छेति। पाद्यादीनि समर्पयामि त्र्यम्बकाय नमः ।त्र्यम्बकप्रीतिकारक-

ताम्रपात्रस्थसुवर्णतिलान्नाय नमः । ब्राह्मणाय नमः । सम्पूज्य नमो ब्रह्मण्येति सम्प्रार्थ्य अद्येत्यादि० अमुकगोत्रोमुकराशिरमुकशर्म्माहं मम जन्मवर्षगोचरलग्नावधिकैः यथायथास्थानोपपन्नैः शुभपापावलोकितैः शुभपापसमन्वितैः सूर्य्यादिनवग्रहैः संसूचितसंसूचयिष्यमाणभूतभविष्यद्वर्त्तमानकालिकनानाविधानिष्टसूचकशारीरिकबाह्याभ्यन्तर्गतशत्रुनिवृत्तिपूर्वकदुःशकुनदुःस्वप्नदुर्निमित्तदुर्विचिन्तिताधिदैविकाधिभौतिकाध्यात्मिकतापत्रयसमुत्थहृद्गतचर्म्मगताधिव्याधिप्रत्यूहव्यूहनिरसनपुरस्सराशुभस्थानगताशुभग्रहाज्जनिताशुभफलनिराकरणमुखशुभस्थानगतशुभग्रहजनितशुभफलप्राप्तिद्वारा समस्तज्योतिःशास्त्रोक्तसत्फलदीर्घायुष्यनैरुज्यबलपुष्ट्याद्यन्यतमनिखिलसौभाग्यदाम्पत्यैश्वर्य्याभिवृद्धये श्रीनवग्रहात्मकामृतेश्वरीसहितमृत्युञ्जयप्रीतये मृत्युञ्जयप्रीतिकारकं ताम्रपात्रस्थितं सुवर्णतिलान्नमर्काग्निविष्णुदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॥ दत्त्वा प्रार्थयेत् । तिलाः पुण्याः पवित्राश्च सर्वकामफलप्रदाः । शुक्ला वा यदि वा कृष्णा विष्णुगात्रसमुद्भवाः ॥ यानि पापानि देहेऽस्मिन् कालोत्थानि कृतानि च । सुवर्णतिलदानेन तानि नश्यन्तु मे सदा ॥ प्रतिष्ठा ॥ अद्यकृतैतत्ताम्रपात्रस्थसुवर्णतिलान्नदानकर्म्मणः साङ्गफलावाप्तये प्रतिष्ठार्थमिदं रजतं चन्द्रदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यं सम्प्रददे। दत्त्वा स्वस्तीतिप्रतिवचनम् ॥ ब्राह्मणद्वाराभिषेकतिलकमन्त्रपाठो ग्रहीतव्यः ॥ नतिस्तुत्याकृतिगुणावाहनानां विभेदतः । पञ्चधा मन्त्रसम्पत्तिः प्रोदिता यागकर्म्मसु ॥ ऋषिं छन्दश्च दैवत्यं कर्म्मोच्चार्य्यं जपेदृचम् । आहूतिं मण्डपार्चायामेतन्मन्त्रप्रयोजनम् ॥ ध्यानमावाहनं यत्र ह्युभयं परिवर्त्तते । ऋष्याद्यन्तेपि वा वाच्यं ध्यानान्तावाहनं मखे ॥ यत्र ध्यानं विना प्रोक्तमावाहनमनार्षकम् ।

मन्त्रान्ते तत्र तद्वाच्यं होमं त्यक्त्वेति नान्यथा ॥ मन्त्रप्रतीकं प्रागुक्त्वा ऋषिं छन्दश्च देवताम् । कर्म्मणीति वदेदेतद्विनियोगस्य कल्पनम् ॥ आज्यस्थाली तैजसी वा मृण्मयी वा प्रकीर्तिता । द्वादशांगुलविस्तीर्णा प्रादेशोच्चा शुभा स्मृता ॥ आज्यस्थालीसमानैव चरुस्थाली प्रशस्यते ॥ प्रणीतावारणा ग्राह्या द्वादशांगुलसंमिता ॥ खातेन हस्ततलवदाकृत्या पद्मपत्रवत् ॥ पुरोडाशस्य पात्री तु चतुरस्रा समानतः । खातेन वर्तुलेनैव युता यज्ञे प्रशस्यते ॥ खादिरो बाहुमात्रस्तु जुहुस्रुक्संज्ञकः स्रुवः । अरत्निमात्रो हंसास्यो वर्त्तुलोऽङ्गुष्ठपर्ववत् ॥ अर्धपर्वप्रणाल्या च युक्तो नासाकृतिर्भवेत् उपभृत्स्रुक्ध्रुवास्रुक् च पुष्करस्रुक्तथैव च ॥ अग्निहोत्रस्य हवनी तथा वैकंकतः स्रुवः । एते चान्ये च बहवः स्रुवभेदाः प्रकीर्त्तिताः ॥ शम्या प्रादेशमात्री स्यात्खादिरः स्फ्यः प्रकीर्तितः ॥ खड्गाकारोऽरत्निमात्रो वज्ररूपो मखे स्मृतः ॥ यजमानासनं पत्न्यासनं चैव पृथक्पृथक् । होत्रासनं तथा ब्रह्मासनं विस्तारयोगतः ॥ अरत्निमात्राण्येतानि कथितानि मनीषिभिः ॥ समिधः ॥ प्रादेशान्नाधिका नोना न च शाखासमायुताः । न सपर्णा न निर्वीर्य्या होमेषु तु विजानता ॥ आपस्तम्बः—न कुर्य्यादग्निधमनं कदाचिद्व्यजनादिना । मुखेनैव धमेदग्निं धमन्या वेणुजातया ॥ होमनिषेधो हरिहरभाष्ये—क्षुतृट्क्रोधसमायुक्तो हीनमन्त्रो जुहोति यः । अप्रवृद्धे सधूमे वा सोन्धः स्यादन्यजन्मनि ॥ स्कान्दे—अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनश्च ऋत्विजः । यजमानमदाक्षिण्यो नास्ति यज्ञसमो रिपुः ॥ ऋक्साममन्त्रा उच्चैर्य्याजुषां मन्त्रा उपांशवः । पठनीयाः स्वशाखीया अन्यथाऽनर्थभाग्जनः ॥ यज्ञपार्श्वेगर्भाधानादिषु प्राज्ञान्ब्राह्मणान्दश भोजयेत् । आवसथ्ये चतुर्विंशदग्न्याधाने शतात्परम् ॥ आग्रायणे च प्रायश्चित्ते विप्रान्दश पञ्च वा ।

श्राद्धे त्रीन् वा संस्कृतौ च सोमे साहस्रवाडवान् ॥ वाचस्पतौ–आदित्यं गणनाथं च देवीं रुद्रं च केशवम् । पञ्चदैवत्यमित्युक्तं सर्वकर्मसु पूजयेत् ॥ तन्त्रान्तरे–यत्रैव भानुः सततं ह्युदेति प्राचीति तां वेदविदो वदन्ति । ततोऽपरां पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तां तु ॥ कात्यायनः–अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ मार्कण्डेयः–चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् । एकैकन्यूनमुद्दिष्टं वर्णेवर्णे यथाक्रमम् ॥ अत्रिः–अनामिकामूलदेशे पवित्रं धारयेद्द्विजः । द्व्यंगुलं मूलवलयं ग्रन्थिरेकाङ्गुलिर्भवेत् ॥ चतुरङ्गुलमग्रं स्यात्पवित्रस्य प्रमाणकम् । षडंगुलोच्छ्रितं पात्रं त्र्यंगुलं व्यासगर्भकम् । समन्तात्स्रवणं मूर्ध्नि पञ्चपात्रमिति स्मृतम् ॥ प्रादेशमात्रं दैर्घ्येण कर्षपादजलाकृति । वृत्तगर्भात्मकं चाग्रभागे ताम्रमयाचमम् ॥ मध्यमे संहते धार्य्ये मिलितांगुष्ठयोरधः । शेषा अंगुलयो मुक्ता मुद्रेयं सप्तजिह्विका ॥ केशान्तो ब्राह्मणस्योक्त आभ्रुवः क्षत्रियस्य च । नासाग्रान्तो हि वैश्यस्य दण्ड आरोग्यदः स्मृतः ॥

समर्पणम् ।

यदत्र किञ्चित्स्खलितं भवेन्मे सद्भिर्गुणग्राहिभिरार्द्रभावात् । क्षन्तव्यमेव प्रणयेन सन्तः क्षमासुशीलाः प्रभवंत्यजस्रम् ॥ सर्वप्रतीकसम्पन्नः कर्म्मकाण्डसमुच्चयः । आचार्य्याणां सतां प्रीत्यै समाभूयान्निरन्तरम् ॥ मुद्रापयितुमुद्युक्तः फलसिद्धिसमीहया । लोकोपकृतिको भूयाद्येन सङ्ग्रहकृच्छ्रमः ॥

पण्डितो दिवाकरशर्म्मा–
नैठाणी चतुर्वेदी श्रीनगर,
गढवालनिवासी.

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

हमारे प्रकाशनों की अधिक जानकारी
व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर, मुंबई- ४००००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास

६६, हडपसर इण्डस्ट्रियल इस्टेट, पुणे- ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.

गंगाविष्णु श्रीकृष्णदास,

श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डिंग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र- ४२१ ३०१.
दूरभाष- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास

चौक, वाराणसी (उ.प्र.)- २२१ ००१.
दूरभाष- ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS